नागाङ्गनानां न गृहेर्ष्ययेव, भुवा धृता नागमदाभिरामा: ॥
कुत्रापि कृष्णा जनिका विनीला:, पल्लीषु खेलन्ति किरातबाला: ।
विन्ध्याञ्जनोर्वीधरयोरिवाधि-देव्यो धरायां कु[तु]काद् भ्रमन्त्य: ॥ २ ॥
राज्ञी क्वचित्पुञ्जितपामरीणां, वासांसि शुभ्राणि बभौ वहन्ती ।
सुधारुचोचन्द्रिकयावदाता, शृङ्गावलीवाञ्जनभूधरस्य ॥ १ ॥

प्रचण्डचण्डद्युतिदीप्तिताम्य - त्तनूभिरुर्व्वीधरधोरणीभिः ।
यस्मिन्झरन्निर्झरवारिधारो - पधेरिव स्वं स्नपयाम्बभूवे ॥ ३० ॥

स्फुरद्विभूतिर्द्विजराज[1]राजद् - दुर्गाङ्क[2]सुस्वाम्युदयत्प्रमोदः ।
अहीनभूषो वृषभप्रचारो हिरण्यरेता इव [3]दिद्युते यः ॥ ३१ ॥

स्वकन्दरद्वारिविहारिहारि-मृगेन्द्रमन्द्रध्वनितेन शैलाः ।
इतीव गर्वात्ककुदं गिरीणां हुङ्काररावं प्रणयन्ति यत्र ॥ ३२ ॥

न्यक्षक्षमाभृद्विजयोद्यतस्य सवाहिनीकस्य महीधरस्य ।
कुत्रापि झात्कारिझरप्रवाहै-र्भाङ्कारिभेरी निनदैरिवासे ॥ ३३ ॥

क्वचिद्बभे बन्धुरभिल्लपल्ली किरातधात्रीशकृशोदरीभिः ।
कौतुहलाद्भूतलमागताभिः खेलायितुं कुण्डलिनीभिरूहे ॥ ३४ ॥

भिल्लाधिपातां परमाणुमध्या अध्यासत क्वापि परां विभुषाम् ।
गारुन्मतोदात्तमरीचिरुच्याः सङ्केतगेहा इव मीनकेतोः ॥ ३५ ॥

लक्ष्मीः क्वचित्पुञ्जितपामरीभिः शुभ्राम्बराभिर्बिभराम्बभूवे ।
ज्योत्स्नावदातीकृतकज्जलोर्व्वी-धरस्य शङ्के शिखरावलीभिः ॥ ३६ ॥

क्वचिच्चकासे शबराङ्गनाभि-र्मुक्तासरश्रेणिपरिस्कृ(ष्कृ)ताभिः ।
नक्षत्रताराग्रहसङ्ग्रहाभिः कुहूभिरूहेऽङ्कपरिग्रहाभिः ॥ ३७ ॥

कुत्रापि कर्णीकृतदन्तपत्रा बभुः शबर्यः श्रितमञ्जुगुञ्जाः ।
मिलद्बलाकाजलबालिकाङ्का इवोन्नमन्मेदुरमेघमालाः ॥ ३८ ॥ इति

[24]नीलोत्पलश्यामलितान्तरालै-र्यस्मिन्विरेजे सरसीसमूहैः ।
बिभ्यद्भिरेतैरिव सैहिकेयात् भूमौ दशश्वेतहयैरुपेतम् ॥ ३९ ॥

---

1. ०शालि इति टि० । २. ०तः **केलिचलत्कुमारः** [ ?] इति टि० । ३. **यो बभासे** इति टि० ।

**टिप्पणी**

२४. क्रीडत्तुरङ्गद्वीपपद्मनेत्रा, यस्मिन्सरस्यः श्रियमुद्वहन्ते ।
उच्चैःश्रवःस्वद्विरदाप्सरस्का, मन्ये वयस्यो हरिवारिराशेः ॥ ३९ ॥

[25]शशाङ्कदेश्यैः स्मयमानकोशैः सहस्रपत्रैः शुशुभे सरस्सु ।
नन्दीसरःश्रीजयिनामिवैतैः [26]सरो नृपाणां विशदातपत्रैः ॥ ४० ॥

[27]मरन्दलुभ्यन्मधुपानुषङ्गै-र्हैमारविन्दैः कमला ललम्बे ।
महेन्द्रनीलाङ्कितभूषणानां गणैरिवामुष्य तडागलक्ष्म्याः ॥ ४१ ॥

[28]उत्तालतालं करतालिकाभि-र्गीति र्जगे क्वापि कुटुम्बिनीभिः ।
श्रीनन्दनक्षोणिपुरन्दरस्य जगज्जयोपार्जित कीर्त्तिरूहे ॥ ४२ ॥

[29]क्वचिच्चुकूजे कलमानदद्भिः फलादनैः [1]कर्णसुधायमानम् ।
बालैः प्रभिन्नाञ्जनिकाविनील-केदारलक्ष्म्या इव केलिलोलैः ॥ ४३ ॥

[30]च चिद्विनीला विललास यस्मिन्-केदारभूर्भूधरयुग्मसीम्नि ।
उत्तुङ्गपीनस्तनसन्निधाने महीन्दिराया इव रोमराजी ॥ ४४ ॥

[31] उन्मादिकादम्बकदम्बकेन कैदारिकेन स्फु(२)याम्बभूवे ।
अन्तर्मिलन्मौक्तिकमालिनेव नीलोत्तरीयेन महीरमायाः ॥ ४५ ॥

[32]गोपालबालाभिरखेलि लीलाहल्लीसखं यत्र सुखं सखीभिः ।
गीतिं सृजन्तीभिरनन्यजन्म-महीहिमांशोरिवनर्तकीभिः ॥ ४६ ॥

---

1. **श्रोत्र०** इति टि० ।

**टिप्पणी**

२५. मुक्तायितप्रान्तविलग्नपाथः कणैर्बभे स्मेरसहस्रपत्रैः ॥
२६. पद्माकराणां ॥ ४० ॥
२७. यस्मिन्विलुभ्यन्मधुपानुषङ्गै-र्हैमारविन्दैर्विकचैर्विलेसे ।
कासारलक्ष्म्या स्फुरदिन्द्रनील-मणीविमिश्राभरणैरिवैतैः ॥ ४१ ॥
२८. सृजन्ति गीतीरिह शालिगोप्यः, जगत्त्रयीनिर्जयनार्जिताभिः ।
र्ज[ ?]...........त[ ?], कीर्त्तीरिव श्रीतनयावनीन्दोः ॥ ४२ ॥
२९. क्वचिच्चुकूजे० । केदारलक्ष्म्या इव बन्दिवृन्द-वृन्दारकैः संस्तवमुच्चरद्भि ॥ ४३ ॥
३०. कैदारिकं क्वापि नदोपकण्ठे, शालिव्रजैर्मञ्जरितैश्चकासे ।
प्रिया इवाम्भोनिधिमेखलायाः, रोमावली नाभिसवेशदेशे ॥ १ ॥
३१. कैदार्यमुज्जृम्भितशालिशालि, यस्मिन्नशोभिष्ट चरन्मरालैः ।
सन्दृब्धमन्तर्नवमुक्तिकाभिः क्षितिश्रिया नीलमिवान्तरीयम् ॥ १ ॥
३२. आभीरपल्लीषु सुखं सखीभिः, सगीतहल्लीसखखेलिनीभिः ।
गोपालबालाभिरभासि यस्मिन्, स्मरावनीन्दाविव नर्त्तकीभिः ॥ १ ॥

[33]कुत्रापिदम्यैनुगम्यमाना गोधुग्गणैर्द्रोणदुघा निकुञ्जम् ।
यस्मिन्ननीयन्त वनं सुराणां मरुत्कुमारैरिव कामगावः ॥ ५७॥

[34]कुत्रापि दम्यैरनुगम्यमाना मरुत्कुमारैरिव गोपबालैः ।
गवां गणाः कामदुघोपमेयाः यस्मिन्ननीयन्त वनप्रदेशम् ॥ ४७॥ पाठान्तरम् ॥

[35]सुधासुधासिन्धुसुधांशुलक्ष्मी-मुषां मिषाद्यत्सुरभीभराणाम् ।
इवाल्पशेषैः सुकृतैः सुराणां स्वःसौरभेयीभिरिहावतीर्णम् ॥ ४८॥

[36]यस्मिन्नृणां क्रीडितुमागतानां हंसस्वनैः स्वागतवादिनीभिः ।
आदाय पद्मानि तरङ्गहस्तैः सरिद्भिरर्थः किमुकल्प्यते स्म॥ ४९॥

[37]कुरङ्गनाभीकृतपत्रभङ्गै-र्निस्तन्द्रसान्द्रद्विजचन्द्रिकाङ्कैः ।
क्रीडन्महेलावदनारविन्दैर्जज्ञे श्रवन्ती शतचन्द्रिकेव ॥ ५०॥

खेलायितुं यत्र विलासभाजा-माजग्मुषां चन्द्रमुखीसखीनाम् ।
चक्राङ्गचक्रध्वनितेन जाने स्म शैवलिन्यः समम्।ह्वयन्ति ॥ ५१॥

[38]निभाल्य फुल्लद्दलपुण्डरीकं मध्ये प्रवाहं शशभृद्भ्रमेण ।
ज्योत्स्नाप्रियैर्यत्र विमुग्धचितै-रभ्राम्यताभ्यर्ण इवामृतार्थम् ॥ ५२॥

---

**टिप्पणी**

३३. कुत्रापि दम्यैरनुगम्यमानाः, कैलासकेलीशिखरायमाणाः ।
सुधाभुजो द्रोणदुघाश्चरन्ति, मूर्ता समाज्ञा इव [म]ण्डलस्य ॥ १॥

३४. गोपालबालैर्दिविषत्कुमारै-रिवानुयाताः सुरभीसमूहाः ।
दिवोवशेषैः सुकृतैः सुराणा-मिवावनौ कामदुघाः समीयुः ॥ १॥

३५. ब्रह्माण्डभाण्डोपरिभित्तिभाग-प्रोत्तानयानोद्धवदर्त्तिभाजः ।
स्वःसौरभेयीनिवहा इवोर्वी, चरिष्णवो यत्र विभान्ति गावः ॥ १॥

३६. यूनो रिरंसोपगतान्सकान्तान्, किं स्वागतं हंसरुतैः सृजन्त्यः ।
तरङ्गहस्तस्थितवारिजैर्वा, किमर्थमस्मिन्प्रणयन्ति नद्यः ॥ ५०।

३७. कपोलपालीस्फुरदेणनाभी-पत्राङ्कितैश्च द्विजजन्द्रिकाङ्कैः ।
क्रीडन्मृगाक्षीवदनैः सहस्र-चन्द्रेव यस्मिन्नदिनी दिदीपे ॥ ५०॥

३८. विधोर्धिया यत्र सरित्प्रवाहे-र्लीनालिफुल्लद्दलपुम्डरीकम् ।
प्रेक्ष्याभितो मुग्धचकोरडिम्भा, भ्रमन्ति पीयूष पिपासयेव ॥-५२॥

[39]श्रेणीभवन्ती कलहंसमाला लीलायते यत्र सरित्प्रवाहे ।
निर्द्धूतमुक्ताफलमालिकेयं श्रिया श्रवन्त्या इव पर्यधायि ॥ ५३ ॥

[40]उज्जृम्भिजम्बूनदपद्मनिर्य-न्मरन्दनिःस्यन्दपिशङ्गिताङ्गम् ।
पयोधरद्वन्द्वमिव श्रवन्ती श्रिया रथाङ्गद्वयमाबभासे ॥ ५४ ॥

स्ववल्लभं वारिनिधिं व्रजन्त्याः कूलङ्कषायाः कलहंसशब्दैः ।
रणज्झणन्नूपुरझाङ्कृतीनां ध्वानैरिवाभूयत यत्र देशे ॥ ५५ ॥

[41]अशोभि यस्मिन्स्मितहेमपुष्पै-र्मधुव्रतव्रातनिपीतपोष्पैः ।
गाङ्गेयगेहैरिव सन्तुमेतैर्वसन्तकान्तेन निकुञ्जलक्ष्म्याः ॥ ५६ ॥

[42]दन्ध्वन्यमानद्विजराजिराव-तूर्या स्फुरत्कुड्मलकोटिहेतिम् ।
यस्मिन्जगज्जेतुमनन्यजन्मा ससज्ज सेनामिव चूतपङ्क्तिम् ॥ ५७ ॥

[43]सर्वर्त्तुभिर्यत्र पुरोपकण्ठ-क्रीडावनान्तर्वसतिर्वितेने ।
यद्भाविनं हीरकुमारराजं सम्भूय सुश्रूषयितुं किमेतैः ॥ ५८ ॥

प्रेङ्खोलितैर्यत्र जलेन स्वर्गैः सुधांशुदेशीयविकाशिकासैः ।
श्रिया निकुञ्जस्य वसन्तकान्तः प्रकीर्णकौधैरुपवीज्यते स्म ॥ ५९ ॥

केलीवने यत्र पिकद्विरेफध्वानोपधेः पुष्पधनुर्वसन्तौ ।
विनिर्मिमाते स्म मिथः प्रवृत्तिं मृत्युञ्जयं जेतुमिव प्रतीपम् ॥ ६० ॥

---

**टिप्पणी**

३९. मुक्तालताङ्केव निजोपकण्ठ-श्रेणीभवत्सारसमालिकाभिः ।
सि(शि)ञ्जानमञ्जीरवतीव रावैः, स्वकूलकूजत्कलहंसिकानाम् ॥ ५२ ॥

४०. भ्राम्यद्द्विरेफस्मितवारिजेन प्रफुल्ललोलन्नयनाननेव ।
रथाङ्गयुग्मेन गलन्निवाल-पयोधर[द्वन्द्वमि]वोद्वहन्ती ॥ ५३ ॥

४१. रन्तुं वसन्तेन समं प्रियेण, गाङ्गेयगेहैरिव कुञ्जलक्ष्म्याः ॥ ५६ ॥

४१. वसन्तकान्तेन निकुञ्जलक्ष्म्या, विलासहासा इव भान्ति कासाः ।
यद्वा पराभूतमरुद्वनाया-स्त्या जयाङ्का इव रोमगुच्छाः ॥ ५७ ॥

४२. निश्वानरावं तुमुलैरलीनां शाखाशयालम्बित(सून)पुष्पशस्त्रा ।
स्मरस्य विश्वस्य जयाय यस्मि-न्ननीकिनी वाजनि शाखिलेखाः ॥ ५५ ॥

४३. यद्भाविनं हीरकुमारराजं स्वस्वप्रसूनादिनभोपदाभिः ।
प्रभूय शुश्रूषयितुं किमत्र सर्वर्त्तवः केलिवने वसन्ति ॥ ५४ ॥

[44]भृङ्गेक्षणाश्चन्दनपत्रभङ्गा-बिम्बाधरा: कोकिलबालरावा: ।
मत्तेभयाना इव गन्धवाहै-र्यस्मिन्नसेव्यन्त निकुञ्जलक्ष्म्य: ॥ ६१॥

[45]वसन्तभर्त्रा सह संसृजन्त्या वनश्रिया यत्र मुदं वहन्त्या: ।
कुन्दद्रुमाणां कलिकाकलापै-र्दन्तैरिवैतै: प्रकटीबभूवे ॥ ६२॥

[46]यस्मिन्विभान्ति स्म विलासदोला:
स्मितावनीजन्मशिखाप्रणद्धा: ।
समं रतिप्रीतिनितम्बिनीभ्यां ससज्जिरे रन्तुमिव स्मरेण ॥ ६३॥

[47]अगायि यस्मिन्मधुरं निकुञ्जे प्रसूनलुभ्यन्मधुपावलीभि: ।
वसन्तकान्तप्रथमानुषङ्गे वनश्रिया मङ्गलगर्भगीति: ॥ ६४॥

[48]पुष्पायु[धो]र्व्वतलशीतलांशो: सम्प्रस्थितस्येव जगद्विजेतुम् ।
अदुन्दुभीयन्त पिकाङ्गनानां यस्मिन्स्वना: पञ्चमगीतिगर्भा: ॥ ६५॥

पदे पदे यत्र रसालमाला निभाल्य कूजत्कलकण्ठबाला: ।
स्मरावनीन्दुस्तृणवत्त्रिलोकी-मजीगणत्रिस्तुलशस्त्रलाभात् ॥ ६६॥ इति ।

---

**टिप्पणी**

४४. प्रसूननेत्रा कलकण्ठकण्ठी बिम्बाधरा मत्तगजेन्द्रयाना ।
भुजङ्गवेणी स्तबकस्तनी च भुक्ता वनश्रीरिह गन्धवाहै: ॥ ५३॥

४५. स्व:काननश्रीसखितां वहन्त्या: स्वविभ्रमैश्चैत्ररथं हसन्त्या: ।
आरामलक्ष्म्या मुचकुन्दवृन्द-दम्भादिवास्मिन्दशना: स्फुरन्ति ॥ ६३॥

४६. स्मरावनीजन्मशिखावनद्धा यस्मिन्लसन्ति स्म विलासदोला: ।
रन्तुं रतिप्रीतिनितम्बिनीभ्यां वितेनिरे चित्तभुवेव यूनाम् ॥ ६२॥

४७. लीलायमाना: सहकारशाखा-शिखान्तरे केलिशुका: क्वणन्ति ।
न व्यानुषङ्गे मधुनेव भर्त्रा वनश्रिया मङ्गलगर्भगीति: ॥ ६१॥

४८. यस्मिन्प्रवालप्रबलायुधानां संवर्मितानां स्मितताच्छलेन ।
महीरुहां स्वर्द्रु[मतुल्य ?]काना-मदुन्दु [भीयन्त] पिका: क्व[णन्त:] ॥ ६४॥

[49]प्रह्लादनाह्वा नगरी चकास्ति हिरण्मया तत्र हरेः पुरीव ।
श्रीगूर्जरक्षोणिपुरन्दरस्य माणिक्यगर्भेव कुनाभिकुम्भी ॥ ६७ ॥

भर्त्ता मरुत्वान्मम कौशिकश्च गोत्रस्य हन्तेति जुगुप्समाना ।
मिषादमुष्याः परिहृत्य नाकं पुरी किमागादिह पौरुहूती ॥ ६८ ॥

[50]यस्यां मणीकर्मविनिर्मिताना-मभ्रंलिहानां गृहधारणीनाम् ।
मध्यंदिने शृङ्गगणाङ्गणेषु मार्त्तण्डबिम्बं कलशायते स्म ॥ ६९ ॥

[51]छायापथोऽभ्रंलिहमन्द्रिराणां दण्डायते शिखान्तरेषु ।
ध्वजायते सिद्धधुनी ध्वनन्त्यो-ऽप्यकिङ्किणीयन्त तदीयहंस्यः ॥ ७० ॥

[52]अखेलि खे यद्गृहशृङ्गवात-वेल्लत्पताकापटपल्लवौघैः ।
यद्दर्शिभिर्विष्णुपदीप्रवाहैः सहस्रकायैः कुतुकादिवासे ॥ ७१ ॥

यद्वर्णनाकर्णनतद्दिदृक्षा-रत्नाकुलीभूतहृदार्णवेन ।
अस्थायि यस्यां परिखामिषेण, जाने लघूभूतवता समेत्य ॥ ७२ ॥

[53]रोमाञ्चिता वीचचयेन मीनैः, स्मितेक्षणा दर्दुररावचाटुः ।
विलासिभिर्वारविलासिनीव, प्रभञ्जनैर्यत्परिखा न्यषेवि ॥ ७३ ॥

---

**टिप्पणी**

४९. तत्रास्ति पौलस्त्यपुरायमाणं, प्रह्लादनं नाम पुरं प्रधानम् ।
निःशेषनृवृद्धितयोर्जितस्य, श्रीगूर्जरस्येव निधानकुम्भः ॥ १ ॥
४९. हिरण्मयं सूरिकुलाभिरामं, विलासिरामं पुरुषोत्तमश्रि ।
श्रीनन्दनानन्दि समीक्ष्य तार्क्ष्य-पुरं मुरारेरिव यच्चकास्ति ॥ २ ॥
भुजङ्गमानां च सुधाशनानां, निवासयोः सारदलैर्गृहीतैः ।
व्यधायि यद्वारिजनन्दनेन, न चेत्किमाभ्यामतिरिच्यते तत् ॥ ३ ॥
५०. नानामणीकर्मविनिर्मिताना-मभ्रंलिहानामिह मन्दिराणाम् ।
महानिशायां शिखरान्तरेषु, शीतांशुबिम्बं कलशायते स्म ॥ ४ ॥
५१. दण्डायते च त्रिदशाध्वदण्डा, ध्वजायते सिद्धधुनीप्रवाहः ।
अकिङ्किणीयन्त पुनस्तदम्भो-विलासि हंस्यो मधुरं ध्वनन्त्यः ॥ ५ ॥ युग्मम् ॥
५२. अखेलि खे मारुतवेगवेल्ल-द्यद्वैजयन्ती पटपल्ल[वौघैः] ।
सह[स्र]कायैरिव कौतुकाद्य-दिदृक्षुभिर्विष्णुपदीप्रवाहैः ॥ ६ ॥
५३. रोमाञ्चिता वीचिचयैर्डुलीनां स्वनैः स चाटुः शफरैः स्मिताक्षी ।
व्यालोकि लोकैः परिखानिलेन, चलीकृता वारविलासिनीव ॥ ६ ॥

[54]चिराशनायाकुलितं कुरङ्गं, सुधाऋचा चारयितुं नभस्तः ।
उपान्तसंरूढविनीलनीले, बिम्बच्छलाद्यत्सलिलेऽवतेरे ॥ ७४ ॥

[55]उदस्तहस्ते पवनावधूत-वीचिच्छलाद्(त्)खातिकयेव यस्याः ।
एतत्पुरस्ते कियती विभूति-र्वस्वोकसारेति विगीयते स्म ॥ ७५ ॥

[56]मातङ्गिनी पुष्पकरम्बिताङ्गी, कृतानुषङ्गा मधुपैरितीव ।
विगानधूत्यै कुरुते वनश्री-र्बिम्बेन दी(दि)व्यं परिखाप्रवाहे ॥
[57]आरामलक्ष्मीरभिसारिकेव, सालेन यूना सह संसिसृक्षुः ।
बिम्बोपधेः शासनहारिकां स्वां, चिकीर्षुरागात्परिखामिवैषा ॥ ७७ ॥

[58]यद्वप्रनानामणिराजिनिर्य-ज्योतिःप्ररोहैर्दिवि संचरद्भिः ।
प्रपञ्च्यते स्म प्रसरत्पयोदं, विनाऽपि सङ्क्रन्दनचापचक्रम् ॥ ७८ ॥

वहन् हरिं यद्वरणः स लक्ष्मीं, कपाटपक्षोऽथ सुवर्णकायः ।
विगाहमानो गगनं कथं न, लभेत तार्क्ष्येन(ण) सदृक्षभावम् ॥ ७९ ॥

प्रियं ब्रुवाणा जनतारवेण, सारङ्गनाभीसुरभीभवन्तम् ।
गजेन्द्रयानां वरणो युवेव, पुरीमहेलां परिरभ्य तस्थौ ॥ ८० ॥

जगत्त्रयीसंभवशस्तवस्तु-विस्तारसम्पूरितमध्यदेशैः ।
यत्रापणैः कुत्रितयापणानां श्रेणी सगोत्रैरिव भूयते स्म ॥ ८१ ॥

---

**टिप्पणी**

५४. अयं पयः पाययितुं किमस्या-मागान्मृगं चारयितुं च शष्पान् ।
बिम्बं विधोर्यत्परिखाजलान्त-र्व्यालोक्य लोकैरिति कल्प्यते स्म ॥ ७ ॥
५५. यद्(त्)खातिवात(तेन) ललुत्तरङ्ग-हस्तादुदस्य प्लव[न]स्वनेन ।
एतत्पुरस्ते कियती विभूति-र्वस्वोकसारामिति निन्दतीव ॥ ८ ॥
५६. मातङ्गिनी पुष्पवती च नित्यं, कृतानुषङ्गा मधुपैरितीह ।
निन्दाछिदे यत्परिखाम्भसीव, बिम्बेन दिव्यं कुरुते वनश्रीः ॥ ९ ॥
५७. आरामलक्ष्मीरिह पांशुलेव सालेन यूना सह संसिसृक्षुः ।
बिम्बोपधेः शासनहारिकां [स्वां], यद्(त्) खातिकां कर्तुमुपेयुषीव ॥ १० ॥
५८. यदीयवप्रेण मणीमयूखै-र्नीलीविनीले नभसि स्फुरद्भिः ।
अकाण्डमेवाम्बुधरो....प्रपञ्च्यते....चापचक्रम् ॥ ११ ॥

[59]बाहलीककालागुरुगन्धसार-कर्पूरपारीमृगनाभी(भि)गन्धैः ।
आशा अवास्यन्त यदीयहट्टै-र्यशःप्रसारैरिव सज्जनानाम् ॥ ८२॥

गभीररावैर्व्यवहारभाजां, धनोपलाङ्कैः स्फटिकावलीभिः ।
अन्तर्निबद्धारुणलविद्यु - द्विलम्बिमुक्तालतिकाबलाकैः ॥ ८३॥

इतस्ततो निष्पतबिन्दुकान्त-कान्ति प्रतानाङ्कुरवारिधारैः ।
महेन्द्रनीलोपलबद्धहट्टैः, पयोदवृन्दैरिव यत्र जज्ञे ॥ ८४॥ युग्मम् ॥

स्वर्लोकभूलोकभुजङ्गलोक-
पुरीः पराभिभूय(पराभूय) यया विभूत्या ।
मौलौ जयाङ्का इव तुंङ्गगेहे, शृङ्गप्रणद्धा कुटका ध्रियन्ते ॥ ८५॥

परस्परेरेण(पेरण) प्रतिबिं(बिम्ब)ताभि-
र्यस्यां मणीमन्दिरमण्डलीभिः ।
रहस्यवृतिः स्थितभित्तिगर्भ-जनस्वनेनेव वितन्यते स्म ॥ ८६॥

यदालयैर्हेलितहेलिमालै-रभ्रंलिहैनि(र्नि)द्दलिताङ्कारैः ।
मन्ये मणीलोचनमालिकाभि-र्विजेतुमालोक्यत. नाकलोकः ॥ ८७॥

श्रिया जयन्त्या जगदङ्ककरान्, यया स्म याचे श(स्व)शीभवन्त्या।
स्वसौधशुद्धध्वजधोरणीभिः, प्रहस्यते पूरिव पौरुहूती ॥ ८८॥

[60]कुत्राऽपि चन्द्रोपलचन्द्रबद्ध-सौधोपधेः केलिशुकक्कणेन. ।
सुरद्विषं हन्तुमिवद्विषन्त-मालोच्यते चन्द्रनभोमणीभ्याम् ॥ ८९॥

---

**टिप्पणी**

५९. यत्रापणेष्वेणमदभ्रमेण नाशा(सा)पुटे दत्तमपि द्विरेफः ।
लोकारवां गोचरमञ्जुगञ्जी-वेद स्म दण्डशताथया ध्मार्ण [ ?]॥ १७॥
यदद्द[द्रि]कोट्यां हिमवालुकानां क्षोदेषु सिन्धोरिव वालुकासु ।
खेलन्ति मुग्धाः शिशवश्च काच-गोलैरिवानल्पतरङ्गनीलैः ॥ १८॥
६०. यच्चान्द्रचामीकरबद्धसौधो-पधेर्मिथो रात्रिनिशामणिभ्याम् ।
आलोच्यते हन्तुमिव द्विषन्तं सुरद्विषं केलिशुकक्वणेन ॥ २०॥

[61]स्वशात्रवाद्गोत्रभिदो भयार्तै-र्हिमाद्रिहेमाद्रिमुखैर्गिरीन्द्रैः ।
लघूभवद्भिर्भवनच्छलेन, यस्मिन् शरण्ये शरणीबभूवे ॥ १० ॥

सादृश्यसंस्पर्धितयाऽवलेपात्, कपोतहुङ्कारगिरेव यस्याम् ।
परस्परं विग्रहमादधानैः, शोणाश्मगेहैररुणीबभूवे ॥ ११ ॥

गाङ्गेयगारुत्मतपद्मराग-सन्दर्भगर्भालयमालिकाभिः ।
भूकान्तकान्तेन सहानुषङ्गे, पुरीश्रिया क्लृप्तइवाङ्गरागः ॥ १२ ॥

卐विलासवापीजलकेलिलोल-विलासिनीनां पटलच्छलेन ।
प्रादुर्बभूवुः पुरकौतकानि, दृग्गोचरीर्तुमिवाम्बुदेव्यः ॥ १३ ॥

विद्योतिताऽशेषदिगन्तराभि-र्मणीमयीभिर्भवनावलीभिः ।
धिक्कारितध्वान्तमिवाङ्कदम्भा-दुवास राज्ञः शरणार्थमङ्के ॥ १४ ॥

---

1. ०कुम्भनिकेतयोश्चन्द्रनभोमणीभ्याम् । इति टि० । 2. केलिशुकक्कणेन इति टि० ।

## टिप्पणी

[विरे]जिरे चान्द्रमवेक्ष्य बिम्ब-मम्बा विमुग्धा इह याचमानान् ।
लीलामरालेन विलुभ्य बाला-नाश्वासयन्ति स्म कथञ्चनापि ॥ २१ ॥
वेश्मार्हगर्भाननचान्द्रकुम्भं, दृष्ट्वाऽत्र मुग्धाऽभ्रधुनीरथाङ्ग्यः ।
रुषेति विश्लेषयिताऽयमिन्दु-र्न शत्रुराघ्नन्ति किमङ्घ्रिघातैः ॥ २२ ॥
अयं मदुत्सङ्गमृगं स्वकुक्षि-क्षिप्तं सुधामाकुरतामियाय[ ?] ।
समीक्ष्य यस्मिन्गृहशृङ्गसिंह-मभ्रादभ्रे सभयो मृगाङ्कः[ ?] ॥ २३ ॥
माणिक्यकुम्भं गृहतुङ्गशृङ्गे, दृष्ट्वा नभःशेवलिनी रथाङ्ग्यः ।
नित्योदयादित्यधियापि योगात्, पथां वहन्ते स्म कदापि नास्मिन् ॥ २४ ॥
नित्योदितव्योमणीयमानै-र्यस्मिन्मणीमण्डलबद्धसौधैः ।
तिरस्कृतं सन्तमसं किमेतत्, राजाङ्कदम्भात्शरणं बभाज ॥ २५ ॥
卐 प्रादुर्बभूवुः पुरकौतुकानि, दृग्गोचरीकर्तुमिवाम्बुदेव्यः ।
वापीषु केलीरसिका मृगाक्ष्यः समीक्ष्य लोकैरिति तर्क्यते यत् ॥ २६ ॥
६१. शत्रोर्भिया गोत्रभिदो गिरीन्द्रै-र्हिमाद्रिहैमाद्रिमुखैः समेत्य ।
नानाममीहर्म्यनिभादिवास्य लघूभवद्भिः शरणं प्रपेदे ॥ १९ ॥

*नीलाश्मवेश्मप्रतिबिम्बमन्त-र्दधद्भिरेतत् तपनीयगेहैः ।
रामेण नीलं [3]वहता दुकूलं, श्रिया समालम्ब्यत तुल्यभावः ॥ ९५ ॥

वृन्दारकालीभिरलङ्कृताया, असूययेवामरराजपुर्याः ।
तृणीकृतश्रीतनयावनीप-रूपानसौ धारयति स्म मर्त्यान् ॥ ९६ ॥

प्रभापराभावुकवैभवायाः, यस्याः स्वपुर्याश्च परस्परेण ।
उत्तीर्णगीर्वाणगणैर्जनानां,
व्याजादिवाविःत्रि( ष्क्रि)यते स्म साम्यम् ॥ ९७ ॥

लघूकृतस्वर्ललनाविलासा, विलासिनीर्यत्र निभालयित्वा ।
विहाय गेहं स्वमिवादितेयै-रिहावतीर्णं व्यवहारिदम्भात् ॥ ९८ ॥

सर्वानुवादैरिव मीनकेतो-र्लीलालसैर्यत्र विलासिवृन्दैः ।
निर्भर्त्सितैर्भूमितलं भूजङ्गै-र्मदाक्षलक्ष्यैरिव विश्यते स्म ॥ ९९ ॥

विगानितानङ्गकुरङ्गनेत्रा-श्चकासिरे यत्र गजेन्द्रयानाः ।
अमोघशक्तीर्मकरध्वजोर्व्वी-पुरन्दरस्येव जगद्विजेतुम् ॥ १०० ॥

त्यक्त्वा श्रुतीन् कञ्चुकिनो द्विजिह्वान्, प्राणप्रियान् यौवतकैतवेन ।
पुरी किमेतद्युवकामुकीभि-रध्यास्यते नागनितम्बनीभिः ॥ १०१ ॥

मंदालसा यत्सरसीरुहाक्ष्य, श्रीमन्मनोजन्ममणीगघोनः ।
इवाग्रदूत्यः परिकल्पयन्त्य-स्तदेकतानानि मनांसि यूनाम् ॥ १०२ ॥

पदे पदे यत्पुरुषोत्तमौघान्, वीक्ष्य श्रिया चन्द्रमुखीमिषेण ।
पतिव्रतौचित्यमिवोद्वहन्त्या, स्वयं बभूवेव कुमूर्त्तिमत्या ॥ १०३ ॥

---

३. दधता इति टि० ।

### टिप्पणी

* अभ्यर्णसौवर्णगुहानुबिम्बं विभ्रद्भिरत्राऽसितरत्नसौधैः ।
पीतं दुकूलं दधताऽच्युतेन संश्रीयते साम्यमिवात्मलक्ष्म्या ॥ ३० ॥
निमेषनिःस्वैर्नयनैः सुरीभि-र्विभावयन्तीभिरदः समृद्धिम् ।
सौधेषु दन्तादिव पुत्रिकाणां रक्षातिरेकैः स्तिमितीबभूवे ॥ ३१ ॥

कुमारगौरीगणपर्शुपाणि-महेश्वरादीनिदमङ्कमासान् ।
इवावमन्यस्फटिकाचलेन, प्रापेऽनुनेतुं सितसाललक्षात् ॥ १०४॥

[62]निरीक्ष्य यस्यां मणिवेश्मभित्तौ च्छायां विमुग्धेन युवद्वयेन।
निखेलता पुष्पधनुर्मतेऽपि, भ्रान्त्येव यूनोः परयोर्न्यवर्त्ति ॥ १०५॥

[63]विधूदये शृङ्गशशाङ्ककान्त-निष्पातिपाथःप्रसरत्प्रवाहैः ।
निर्यज्झराः सानुमतां समूहा, यस्यां व्यडम्ब्यन्त विलाससौधैः ॥ १०६॥

संज्ञानदानादिव सौधलोल-द्ध्वजोपधेः पाणिययोरुहेण ।
वियोगवत्या वसुधायुवत्या-म्भोवाह आहूयत यत्र कान्तः ॥ १०७॥

यत्कौतुकानीव दृशा निपीय, क्रीडागताभिस्त्रिदशाङ्गनाभिः ।
पाञ्चालिका नाकिभवान् निमेषे
निःस्वेक्षणाभि[:]स्तिमिताभिरासे ॥ १०८॥

आर्योपयामे पुनरङ्गभाजा, कौतूहलेनेव मनोभवेन ।
रत्या स्वमूर्त्तीर्बहुधा विधाय, रेमे युवद्वन्द्वनिभेन यस्याम् ॥ १०९॥
नभेऽतिवाहाद्विगतावलम्ब-श्रमाकुलीभूततयानयेव ।
यत्तुङ्गगेहोपरिवज्रदण्ड-ध्वजोपधेः स्वःसरिता ललम्बे ॥ ११०॥

[64]दिवोबलेर्वेश्मनि यातविष्णोः, पदादिव भ्रष्टसुरेन्द्रसिन्धोः ।
ज्यौत्स्नीषु यच्चान्द्रगृहच्युताम्भो-निभादवापे पृथिवीप्रवाहैः ॥ १११॥

---

**टिप्पणी**

६२. दृष्ट्वा मणीवामगृहे विमुग्ध-युवद्वयेनात्र निजानुबिम्बम् ।
निखेलता पुष्पधनुर्मतेऽपि, न्यवर्त्ति यूनोः परयोर्धियेव ॥ २७॥
६३. चन्द्रोदये मन्दिरचान्द्रशृङ्ग-निष्पातिपाथःप्रस[र]त्प्रवाहैः ।
निर्यज्झराः सानुमतां समूहा, यस्मिन्व्यडम्ब्यन्त विलाससौधैः ॥ २८॥
स्ववेशवातूललुलत्पताका-करेण च किङ्किणीनाम् ।
स्पर्द्धोदया वोढुमिवात्मना यत्पुरीं सुरस्याह्वयतीव दृष्टम् ॥ २९॥
६४. यातस्य विष्णोर्नरकं निहन्तुं भ्रष्टा तदंह्रेर्नभसा...... ।
ज्यौत्स्नीषु यच्चान्द्रगृहच्युताम्भो-दम्भेव भूपीठमिवोपयाताम् ॥ ३२॥

कुत्रापि सन्दृब्धमहेन्द्रनील-निकेतनानामिहक कैतवेन ।
महीमहेलामिव विप्रयुक्तां, चिरादवापे मिलितुं घनेन ॥ ११२॥

[65]चिरात्स्वविश्लेषवतीं धरित्रीं, पयोमुचा स्थासयितुं नभस्तः ।
प्रस्थापिता यत्र मणीसुवर्ण-प्रासाददम्भाजजलबालिकेव ॥ ११३॥

कुत्रापि जागर्त्ति पुरीतडाको-दरे प्रतिच्छायितमुद्वहन्ती ।
यद्वैभवेनेव पराभिभूता, प्रदत्तरूपा नगरी सुराणाम् ॥ ११४॥

शोचिर्निशुम्भिततमस्ततिसान्द्रचन्द्र-सम्बद्धसौधनिवहा अवहन् विभूषाम् ।
भक्तिप्रसन्नहरलब्धवरक्षताङ्कां, शीतांशवः किमु महीमवतीर्णवन्तः ॥ १५॥

[66]बालारुणज्योतिरखर्व्वगर्व्व-[1]सर्व्वङ्कषैः शोणमणीनिकेतैः ।
धरा तुरासाहमिवस्वकान्त - मुद्गीर्णरागप्रसरैर्नगर्याः ॥ ११५॥ इति ॥

1. **निर्व्वासि शोणाश्मगृहैर्बभासे** इति टि० ।

**टिप्पणी**

६५. ज्योतिःपयःपूरतरङ्गितैतन्निवासनीलाश्मशिखामिषेण ।
एतत्पथेनार्कसुता स्ववप्तुः सम्प्रस्थितोच्चैर्मिलितोत्सुकेव ॥ ३३॥
[1]गाङ्गो(ङ्गे)यगारुन्मतपद्मराग-चन्द्राश्मसंदृब्धगृहच्छलेन ।
स्वभूपभर्त्रा सह सङ्गरङ्गे पुरश्रिया क्लृप्त इवानुरागः ॥ ३४॥
६६. बालारुणज्योतिरखर्वगर्व-सर्वङ्कषैः शोणमणीनिकेतैः ।
धरातुरा साहमि नु( ?) स्वकान्तं पुरश्रियोद्गीर्ण इवानुरागः ॥ ३५॥
भक्तिप्रसन्नाद्गिरिशादवाप्तां, गलत्कलङ्कां बहुरूपविद्याम् ।
यच्चान्द्रसद्मच्छलतः सितांशुः किं कौतुकीव प्रथयाञ्चकार ॥ ३६॥
यत्पौरपुंसै रतिजानिगर्व-निर्वासिभिः श्रीभिरिवाभिभूतः ।
मन्दीभवन्भूभृदधित्यकाया-मावासमालम्बत नारकारिः ॥ १॥
यत्रागरैर्भर्त्सितमच्छय(त्स्य)केतु-श्रीभिः पराभूतिमवाप्यमाना ।
विहस्तचित्तेव ततिः सुराणां, स्वःसार्वभौमं शरणीचकार ॥ २॥
पौरश्रियं प्रेक्ष्य तदेकतानी-भूतां स्वकान्तामवलोक्य यत्र ।
लक्ष्मच्छलेनाऽपररागशीका, शङ्के शशी श्याममुखीबभूव ॥ ३॥
यत्पौरलोकानवलोक्य मा स्ता-त्तलुब्धचेता गिरिनन्दनाऽसौ ।
स्वाङ्गं तदङ्गेन तदन्यसङ्ग-शङ्कीव शम्भुर्व्यतिसीव्यते स्म ॥ ४॥

1. अयं श्लोकः १२तमश्लोकस्य पाठान्तरोऽस्ति ।

[६७]अस्ति स्म तस्यां महमूंदनामा,

म्लेच्छावनीन्द्रः ककुदं नृपाणाम् ।

रामः पुनः शासितुमब्धिनेमी-मिवावतीर्णः कलिपीड्यमानाम् ॥ ११६ ॥

[६८]कृपाणगीर्व्वाणगिरीमन्द्रमथ्य-मानाहवक्षीरनिधेर्भवन्त्या ।

जयश्रियाऽऽश्रीयत वारिराशि-शायीव भूचक्रशतक्रतुर्यः ॥ ११७ ॥

[६९]पराभिभूतैरिव कामवर्षं लीलायितैरुन्नतवारिवाहैः ।

उन्मत्तमातङ्गगणच्छलेना-नुकूल्य वे(वै)मध्यमलोकपालः ॥ ११८ ॥

[७०]इदं महौजः प्रसभाभिभूय-मानैरिवामुष्य विपक्षलक्षैः ।

क्षेत्रस्य वृत्तिर्वनितासहायैः स्वक्षत्रवृत्तीरपहाय भेजे ॥ ११९ ॥

---

**टिप्पणी**

हराक्षिवह्नौ ज्वलदात्मयोनेः सारं गृहीत्वेव सरोजजन्मा ।
यत्पौररागो रचयाञ्चकार, न चेत्कुतस्तत्र तदीयलक्ष्मीः ॥ ५ ॥
[२]विगानितानङ्गकुरङ्गनेत्रा-श्चकासिरे मत्तचकोरनेत्राः ।
अमूरमोघा इह शक्तयः किं जगद्विजेतुं मकरध्वजस्य ॥ ६ ॥
श्री सूनुभूभर्त्तुरिवाग्रदूत्यः स्वर्वर्णिनीनां किमुतानुवादाः ।
नागाङ्गा[ना]नां किमु वा वयस्यो-ऽलङ्कुर्वते यन्नगरं मृगाक्ष्यः ॥ ११ ॥

६७. तत्रास्ति बाहादर(भूमिभानु)पातिसाहि-सूनुर्महीन्द्रो महमून्दनामा ।
वधूर्नवोढेव दिने दिने भूः, श्रियं दधौ यत्करपीडिताऽपि ॥ १२ ॥

६७. प्रजाप्रशास्तारमितात्मतानं, नीतेर्निकेतं तमवेक्ष्य विज्ञैः ।
स्वयं पुनः शासितुमेष विश्वं, रामोऽवतीर्णः किमिति व्यतर्कि ॥ १३ ॥

६८. निस्त्रिंशमन्थानघनव्यमान-महाहवक्षीरतरङ्गिणीशे ।
प्रसूतया यो बलिशासतोऽब्धि-शायीव वव्रे विजयस्य लक्ष्म्या ॥ १४ ॥

६९. पराजितैरप्रतिमैः स्वदान-लीलायितैरुन्नमदम्बुवाहैः ।
मातङ्गतुङ्गाङ्गदधैरिवेत्या-ऽनुकूल्य [वै]मध्यमलोकपालः ॥ १५ ॥

७०. हन्तुं व्यवस्यन्तमवेत्य भूपं, द्विषद्ध्रयात्मानमदः प्रतीपैः ।
स्वक्षत्रवृत्तीरपहाय भेजे, क्षेत्रस्य वृत्तिः कृषिकैरिवात्र ॥ १६ ॥

---

2. अयं श्लोकः १००तमश्लोकस्य पाठान्तरोऽस्ति ।

[71]भूमी[न्द्र]चन्द्रप्रबलप्रतापै-र्जेतुं प्रवृत्ते जगदङ्करान् ।
प्राकारगुप्तपरिवेषदम्भात्;
बिभ्यन्निव स्वं विदधे विवश्वान्(स्वान्) ॥ १२० ॥

[72]माद्यत्पदोदानपयःप्रवाह-जम्बालितोपान्तमहीमतङ्गाः ।
दिग्जैत्रयात्रासु जितैर्दिगीशै-र्दिग्वारणेन्द्रा उपदी कृताः किम् ॥ १२१ ॥

[73]आपूर्वापरवारिराशिपुलिनाऽलङ्कारहारोपम-
क्षोणीभृन्निकुरम्बचुम्बिपदद्वन्द्वारविन्दश्चिरम् ।
द्यां स्वर्णाचलसार्वभौम इव यो निःशेषविश्वम्भरां
शासत्शात्रवगोत्रजिद्विजयते श्रीगूर्जरोर्व्वीपतिः ॥ १२२ ॥

**॥ इति सकलमहीवलयकमलालङ्कारहीर श्रीसी(सिं)हविमलपादारविन्दद्वन्द्वभृङ्गायमान(ण)देवविमलविरचिते हीरसुन्दरनाम्नि काव्ये प्रथमप्रारम्भे देशनगरादिवर्णनो नाम प्रथमः सर्गः ॥**

---

**टिप्पणी**

७१. भूपालमौलेः प्रबलप्रतापे, जेतुं प्रवृत्ते जगदङ्ककारान् ।
भयेन भानुः परिवेषवज्र-प्राकारगुप्तं कृतवानिव स्वम् ॥ १७ ॥

७२. यत्रावृषेण्याम्बुदमञ्जुगर्जि-गजा व्यराजन्त सदानधाराः ।
दिग्जैत्रयात्रासु जितैदिगीशै-र्डुढौकिरे दिग्द्विरदा इवास्य ॥ १८ ॥

७३. विकचविटपिवल्ली छन्नलीलागिरीन्द्रा, गलितनिलयमालाप्यात्मना राजधानी ।
यदरिधरणिपालैः वप्रकान्तारचारै-र्गिरिगहनमहा वाश्रीयते निर्विशेषम् ॥ १९ ॥

७३. यस्य द्वेषिनिषूदनव्रतजुषस्त्रासाद् द्विषद्भूभुजां
सन्तानस्य कलिन्दभूधरगुहालीनस्य लोलदृशाम् ।
अश्रान्तां नतमेचकीकृतगलद्बाष्पाम्बुपूरैरिवा-
विर्भूता प्रस[र]द्भिरङ्करुहिणीप्राणेशितुर्नन्दना ॥ २० ॥

७३. यत्त्रासातिशयेन कान[न]चराः प्रत्यर्थिपृथ्वीभुजा
निद्रां येषु नितम्बिनीभुजलतां प्रेक्ष्यात्मकण्ठस्थिताम् ।
यत्पाशस्यं धियेव मुग्धमनसो हाहारवव्याकुला-
स्तद्भ्रूवल्लिनिभालनाद्धनुरपि व्याशङ्क्य मुर्च्छामगुः ॥ २१ ॥

७३. सुत्रामाम्बुधिधामदिग्गिरिकुचद्वन्द्वावनीश्रीधवः
क्ष्माभृद्भालविशेषकापिलनखज्योतिःपदाम्भोरुहः ।
क्षोणीपालशिरोवतंसितलसत्पादारविन्दद्वय-
द्योस्वर्णाचल सार्वभौम इव यो निःशेषविश्वम्भरां
शासत्शात्रवगोत्रभिद्विजयते श्रीगूर्जरोर्वीश्वरः ॥ २२ ॥

# द्वितीयः सर्गः

कुमुदस्मिता षट्पदपङ्क्तिकुन्तला,
स्मिता(तो)त्पलाक्षी कजकुड्मलस्तना ।
प्रियेव केलीसमये सहंसका, तरङ्गहस्तैः सरिदालिलिङ्गत ॥ १ ॥

सकाकतुण्डैणमदद्रवाङ्कितो-रसोपरिक्षालनतः कदापि नौ ।
सुतामिवार्कस्य विहारगेहिनीं विनिर्मिमाते जलकेलिशालिनौ ॥ २ ॥

स्मितारविन्दोदयदिन्दुमण्डली-धियेन यूनो प्रमदोन्मिषन्मुखे ।
विमुग्धचित्ता स्म नयन्ति चुम्बन-क्रियां द्विरेफांश्च चकोरशावकाः ॥ ३ ॥

प्रफुल्लकङ्केलिरसालमल्लिका-कदम्बजम्बूनिकुरम्बचुम्बितें ।
अलीव साकं प्रियया स निष्कुटं कदापि रेमे श्रितसूनशीलनः ॥ ४ ॥

कदापि लीला कलधौतभूधरे समं स चिक्रीड कुरङ्गनेत्रया ।
मृगाङ्कमौलिः स्फटिकावनीधरे, शतक्रतोर्नन्दनयेव भूभृताम् ॥ ५ ॥

.........................कदापि निद्रां परिरभ्य तस्थुषी ।
............................................................... ॥ ६ ॥

निष्पादितं यत्तनुजन्मनः कृते गजेन्द्रयानस्य शतक्रतोरिव ।
प्रमथ्य दुग्धाम्बुधिमभ्रमूप्रियं परं पुनः कं स जितेव कर्षितम् ॥ ७ ॥

विजित्य लक्ष्म्याखिलदिग्गजानिवा-मितैर्जयाङ्कैश्च(व?)रैर्विराजितम् ।
किमस्तसन्ध्या परसौ(शौ)र्यभास्वतां, स्वमूर्ध्नि सिन्दूररुचिं च बिभ्रतम् ॥ ८ ॥

मदाम्बुभिः षड्रसभोजनैरिव स्वगण्डयोर्दाननिकेतयोरिव ।
मधुव्रतानामिव मार्गगामिनां, सृजन्तमद्वैत मुदं वदान्यवत् ॥ ९ ॥

जलं करं प्रणव ( ?) निर्गतं शरद्-विभावरीवल्लभबिम्बमध्यतः ।
महीतलेऽभ्यागतया कथञ्चना-वतिष्ठमानं किमु वा सुधारसम् ॥ १० ॥

सृजन्तमुच्चैः स्वकरं मदोदया, कुलाद्रिसान्द्रप्रतिनादमेदुरैः ।
ध्वनिप्रतिस्पर्द्धितयात्मगर्जितै - रुषावगायन्तमिवाम्बुदान्वयम् ॥ ११ ॥

कुतूह [ले]नैव महीविहारिणं, महीधरं कैर[व]बन्धुधारिणः ।
शरत्सुधांशोरिव पिण्डितं महः, किमेतयोर्भाग्यनभोमणेरहः ॥ १२ ॥
आदि सप्तभिः कुलकम् ॥

अमोचितं स्वप्नमवेक्ष्य संलये विलोचनाम्भोरुहमुद्रणानया ।
पयोरुहिण्येव पुलोशमासना-वनीधरे वारिजबान्धवदोयम् ॥ १३ ॥

असौ प्रसुप्ता सुखनिद्रयाङ्गना, समीक्ष्य स्वप्नं तमवाप संमदम् ।
यथा परब्रह्म समीररुन्धनै-र्निबद्धवीरासनयोगिमण्डली ॥ १४ ॥

गभीरताबन्धुरितोपकाननं स्मितप्रसूनव्रजराजितान्तरात् ।
स्वहंसतूली शयनोदरादसौ क्षणादुदस्तात्करिणीव सैकतात् ॥ १५ ॥

मरालबालेव विलासगामिनी क्षितौ क्षिपन्ती [पद]पद्मयामलम् ।
नितम्बिनी मन्थरमन्थरं ततो ययौ संमुद्दिश्य पतिं पतिव्रता ॥ १६ ॥

क्षणादथोर्व्वीवलयोर्वसीमणी-विभूषणप्रोषितरोदसीतमाः ।
असौ पुरस्तात्प्रकटीबभूवुषी प्रियस्य पूर्त्तेव कुलाधिदेवता ॥ १७ ॥

तया क्रमादिभ्यविभावरीवरो विनिद्रणागोचरतामवापितः ।
वचोविलासैररुणांशुभिर्यथा-रविन्दविन्दं दिवसाननश्रिया ॥ १८ ॥

सुमध्वजोर्वीधरजैत्रशस्त्रया, रहस्यवत्स्वप्नउदात्तनेत्रया ।
विनिद्रतां लोचनयोर्वितन्वते, न्यवेदि तस्मै व्यवहारिभास्वते ॥ १९ ॥

गिरं सुधापामिव जामिमुद्रतां, सुधासमुद्रादिदमाननाद्विधोः ।
निपीयकर्णैः पुटकैरिवान्तरा स कूणिताक्षः परमां मुदं दधौ ॥ २० ॥

किमावयोरेष फलं प्रदास्यति स्वपाणिसक्तस्मयमानशालिवत् ।
इदं निगद्य प्रमदाद् वसुन्धरा-प्सरा अनाध्यायमवासयन्मुखे ॥ २१ ॥

द्विजावलीचन्द्रिकयानुविद्धया स्मितश्रिया सेवितसृक्कदेशया ।
भुजान्तराभोगविलासमौक्तिका-वलीसरश्रेणिमिवोपचिन्वता ॥ २२ ॥

निगद्यते स्म व्यवहारिणा क्षणं, विमृश्य तेनाथ विलोललोचना ।
रथाङ्गनाम्नेव रथाङ्गबान्धवो-दये रथा[ङ्गी] स्वसमीपमीयुषी ॥ २३ ॥

७

श्रीपद्मसागरगणिरचितं

# जगद्गुरुकाव्यम् ।

नत्वा श्रीबलिजं जिनं जयकरं श्रीपार्श्वनाथं पुन-
र्ध्यात्वा श्रीत्रिपुरां त्रिलोकमहितां सद्बुद्धिसिद्धिश्रियम् ।
काव्यं वक्ति जगद्गुरोः शिशुरसौ भावाऽवनभ्रस्त्रिधा
हीराह्वस्मृति पद्मसागरकविः सौराष्ट्रराष्ट्रस्थितः ॥ १ ॥

जम्बूद्वीपभुवो विभूषणतरे क्षेत्रे वरे भारते
स्वर्णस्थालतलस्य दीपक इवोद्यन्मोदकक्षोदके ।
अस्ति स्वस्तिगृहं द्विषोडशसहस्रोद्दामदेशोल्वणं
खण्डं मध्यममुत्तमैर्नरवरै र्भोज्यं सदाज्यान्नवत् ॥ २ ॥

देशस्तत्र च गूर्जरोऽजरजनः स्वर्वत् सुवर्णान्वितो
गीर्वाणाऽचलवद् गुणादरकरः कामं धनुर्द्धारिवत् ।
साध्वीसाधुविशेषसंयमसुखः सद्गच्छवच्छ्रीयुतः
शश्वत् केशववद्विचित्ररचनः शृङ्गारवद्राजते ॥ ३ ॥

श्रीप्रह्लाऽक्षतपूरपूर्णनिधिकं चित्राङ्गमातङ्गजो-
दाराश्वं च पुरोहिताङ्गसचिवं वीराधिवीराश्रितम् ॥ ४ ॥

कुंरस्तत्र वणिक्कलासु निपुणः सम्यक्त्वपूतोऽभव-
दोकेशान्वयभूषणं धनवतां मध्ये प्रतिष्ठां गतः ।
जिग्ये येन सितोदरः पटुधनैर्वर्गत्रयीसाधनै-
र्नोचेदेष ततः कथं नरपुरे नामाऽवशिष्टोऽधुना ? ॥ ५ ॥

नाथी तस्य पतिव्रता कुलवधूर्धर्मोदिता सुन्दरी
गेहं भूषयतीव कल्पलतिका मेरुं सुपर्वोत्सवम् ।

यस्याः शीलगुणेन नागरजनैः सीता स्मृतिं प्रापिता
शृङ्गारैः कमला धिया भगवती रूपेण कामाङ्गना ॥ ६ ॥

सा सौख्यं विषयोत्थितं निजपतिप्रत्तं मयूरी यथा
वार्वाहार्पितमम्बु शोकरहिताऽप्यास्वादयन्ती सती ।
सिंहस्वप्नमवाप्य पुत्रमनघं गर्भेऽवतीर्णं निजे
मेने पूरितदोहदेहितफलप्राप्तेः स्वभर्तुर्गिरा ॥ ७ ॥

साऽसूतान्यदिने सुतं दिनकरं पूर्वेव तेजस्विनं
हंसी हंसमिवेन्दिरेव मदनं स्कन्दं पुनः पार्वती ।
यज्जन्मन्यभवन् प्रसन्नवदनाः काष्ठा गृहान्तःस्थिता-
दीपाः कान्तिविलोपकार्भकभया मन्दाः पतद्वृत्तयः ॥ ८ ॥

वप्ता तत्र ददर्श बालमनघं विज्ञो यथा देवराट्
जातं तीर्थकरं सुलक्षणतया चक्रे विचारं त्विमम् ।
दुष्टैस्तावदभेद्य एष भविता हीरो यथाऽमूल्यक-
स्तद्धीरेत्यभिधानमस्त्विति कुटुम्बाग्रेऽवदन्मोदतः ॥ ९ ॥

**हीरः** कुरगृहाङ्गणेऽथ ववृधे कल्पद्रुमस्ताविषे
विन्ध्याद्राविव कुञ्जरो मणिगणः श्रीरोहणे पर्वते ।
चन्द्रः पक्ष इवाऽमले च कमले कोशः शुचावम्बुदः
कन्दोऽम्भोधितले प्रवालज इवाऽर्हद्धाम्नि धर्मक्रमः ॥ १० ॥

हीरोऽध्यापकहृद्गतानि सकलान्यादत्तवान् बुद्धितः
कुंरस्तस्य ददौ च काञ्चनचयं हीराङ्गभारप्रमम् ।
विद्याप्राप्तिरिह त्रिधा हि विनयैरर्थैः पुनर्विद्यया
जानन्नीतिमिमां विचारचतुरः सर्वोचितार्थप्रदः ॥ ११ ॥

हीरो द्वादशवार्षिकोऽभवदथ स्पष्टैर्गुणैर्दक्षतौ-
दार्याद्यैर्गुणवत्सु भारतभुवि प्राप्तैकरेखः परम् ।
लोकानां नयनेषु रूपकमलारेखा अनेका ददौ

बुद्ध्यानन्त्यमशेषरोचकतया चित्तेषु चाश्चर्यतः ॥१२॥

अन्येद्युर्नगरान्निजात् स्वभगिनीगेहे समाजग्मिवान्
श्रीमद्गूर्जरपत्तने कविजनैः स्वःखण्डताख्यापिते ।
हीरस्तत्र मुनीश्वरान् विजयतो दानाऽभिधानान् मुदा
प्राप्तः साधुगृहस्थितांस्तपगणस्वामित्वमाप्तान् स्फुटम् ॥ १३॥

तेषां वाचमनेकवाङ्मयरसक्लिन्नां विरक्तात्मनां
वैराग्याऽमृतवर्द्धिनीं श्रुतिपुटद्वारा हृदि न्यस्तवान् ।
हीरो हीरकवद्द्रवाऽधिकरणैर्लोहैरभेद्यस्ततः
शुद्धाचारतपोग्रहोद्यतमतिर्जातः सुजाताङ्गवत् ॥ १४॥

वैराग्यं भवरङ्गरूक्षहृदयादाविश्चकार स्वसु-
र्गत्वा धाम्नि पुरस्तथाविधवचःश्रेण्याऽतिपुण्यास्थया ।
मृत्खण्डादिव काञ्चनं रचनया स्वर्णधमः शुद्धया
भूमध्यादिव वा जलं खननकृच्छक्त्या करप्राप्तया ॥ १५॥

तं दीक्षापरमानसं स्वसृवरा ज्ञात्वा कुटुम्बं निजं
तत्राऽऽकार्य पितुः पुरोऽवददिदं मुक्ताश्रुभूभेदिनी ।
भ्रांता मे भवभीरुरेष भवतां पुत्रस्तपस्याग्रही
वार्यो वर्यधिया कुलाचल इवास्त्येको भवन्मन्दिरे ॥ १६॥

पुत्रीवाक्यमिदं निशम्य जनकः स्माख्याति हीरं सुतं
वत्स ! त्वं मम जीवनं मम गृहस्तम्भः समर्थः पुनः ।
आशा ते महती ममास्ति मम तद्वृद्धस्थितिं पालय
त्वं मद्देहधुरं वहाऽहमधुना धर्मं करोमि स्थिरः ॥ १७॥

श्रुत्वा वाक्यमिदं पितुः समवदद्धीरः पवित्राशयः
संसारो यमवन्ममाऽतिभयकृद्भ्रातः पितः ! सांप्रतम् ।
तत्त्वं तारय संसृतेः सुजनको यत् सौख्यदः सन्तते-
श्चारित्रग्रहणे ममास्तु भवतां वंशस्य चास्तूदयः ॥ १८॥

वाग्युक्त्या पितरं प्रबोध्य भगिनीं वा मातरं शुद्धया
तैर्दत्ताऽनुमतिर्व्रतं स जगृहे पौरैः कृतात्युत्सवम् ।
बाले प्रव्रजति प्रधानधनभुक् त्यक्त्वा कुटुम्बं निजं
धन्यंमन्यतयाऽत्र को न कुरुते श्राद्धो निजर्द्धिव्ययम् ॥ १९ ॥

हर्षस्तत्र बभूव हीरकमणिप्राप्त्येव हीरादतः
साधूनां व्यवहारिणामिति गुरुः श्री**हीरहर्षाभिधाम्** ।
चक्रे वर्गविलोकनादपि निजाह्वाद्यक्षरप्रीतितः
सन्तोऽन्वर्थकनाम यद्विदधति प्राज्ञे विनेये सुते ॥ २० ॥

धृत्वा पञ्चमहाव्रतानि समितिप्रोद्दामगुप्त्यङ्किता-
न्येष प्रोद्धृतमेरुमानवमहीसाम्यं क्षमातोऽभजत् ।
साधूनां विविधैर्गुणैर्धुरि तपःकृत्येऽभवद्धौर्यवत्
शाकट्येऽध्ययने च देवगुरुवद्दर्भाग्रबुद्धिर्मुनिः ॥ २१ ॥

**विद्यासागर**वाचकस्य गुणिभिः शिष्यैर्वयोधीसमैः
सार्द्धं सद्व्रति**धर्मसागर**वरैः श्रीमद्गुरोरग्रतः ।
सम्यग् व्याकरणं कवित्वरचनाग्रन्थांस्तथाऽर्हन्मत-
न्यायं कर्मविचारसंग्रहणिकां स्माध्येति **हीरो** मुनिः ॥ २२ ॥

सर्वार्हन्मतशास्त्रपारमगमच्छ्री**हीरहर्षो** मुनि-
र्जातोऽन्यागमदर्शनोत्सुकमनाः श्रीमद्गुरोर्नीतिवित् ।
सार्द्धं **धर्ममुनी**श्वैररिति गिरा विज्ञप्तिकामातनोत्
स्वामिन् ! मे परशासनागमवचोयुक्तिप्रकाशे मनः ॥ २३ ॥

श्रुत्वेत्याह गुरुस्ततो व्रज मुने ! श्रीदक्षिणाशां प्रति
योग्यं धर्ममुनिं सहायमधुनैवादाय रामो यथा ।
श्रीमल्लक्ष्मणमन्यशास्त्रपठनं तत्रान्यपार्श्वे कुरु
स्पष्टाः स्वागमयुक्तयो हि धनिनां तत्रैव तद्वादिनः ॥ २४ ॥

लब्ध्वाज्ञामिति सद्गुरोः कविवरः **श्रीहीरहर्षो** मुनिः
सार्द्धं **धर्ममुनीश्वरेण** चलितः श्रीदक्षिणाशां प्रति ।

गत्वा देवगिरौ सदाऽऽस्तिककृतद्रव्यव्ययाद्भट्टतो
मण्याद्यागमयुक्तिपीठमनघं प्रारब्धवानादृतः ॥ २५ ॥

ग्रन्था न्यायविदां विवेचनकृतां वैशेषिकाणां पुन-
र्भाट्टस्याऽपि तथागतस्य कपिलप्राभाकराणां पुनः ।
मीमांसाद्वयवादिनामपि परब्रह्माद्वयोत्संविदां
भट्टात्पण्डितचक्रिणोऽत्र पठिताः श्रीहीरहर्षेण ते ॥ २६ ॥

सार्द्धं **धर्ममुनीश्वरेण** सकलग्रन्थार्थपारङ्गमी
भूत्वा श्रीगुरुसन्निधौ पुनरगात्तत्स्तोत्रपाठे पटुः ।
शिष्याणां हि गुणार्थिनां चिरतरं दूरे गुरोर्न स्थितिः
सिद्धेऽर्थे तु गुरुर्न शिष्यमनघं दूरे व्यवस्थापयत् ॥ २७ ॥

योग्यत्वं गुरुरेतयोर्निजधिया विज्ञाय शास्त्रश्रियो-
श्चक्रे वाचकसंज्ञितं पदमुदारानेकसभ्याग्रहात् ।
शिष्यं योग्यमवाप्य चेन्न पदवीमारोपयेद्यो गुरुः
स स्यात्प्राज्यभवभ्रमी निजगुणध्वंसी गुणोपेक्षणात् ॥ २८ ॥

गच्छैश्वर्यमथ प्रदातुमनयोर्मध्ये विशेषं गुरु-
र्जिज्ञासुर्जिनशासनामरमसावाराधयत् साधनात् ।
मन्त्रस्योत्तमगच्छनाथजपनार्हस्याघविध्वंसिनः
षण्मासी तपसा विमुक्तवचनव्यापारदीप्तिस्पृशा ॥ २९ ॥

ध्यानाकृष्टतया ततोऽमरवरः सद्यः समाजग्मिवा-
न्नत्वा पादपयोरुहं गणपतेराख्यद्विशिष्टं गुणैः ।
**श्रीहीरं** गुरुपङ्क्तिभूषणकरं राजप्रबोधोदितं
व्यक्तं भाविनमत्र सूरिपदवीयोग्ये तपाख्ये गणे ॥ ३० ॥

दैवं वाक्यमिदं निशम्य मुमुदे श्रीमत्तपागच्छराट्
मोदः कस्य भवेन्न यत् स्वपदवीयोग्ये सुशिष्ये श्रुते ।
मुक्त्वा ध्यानमथागमन्निजयतिश्राद्धौघपर्षद्यह-
र्वक्त्रे भानुरिवोदयाऽद्रिशिरसि प्रोल्लासितेजःस्थितिः ॥ ३१ ॥

सङ्घाग्रे सुरवाक्यमेतदभवच्छ्रीमद्गुरुर्गौरवात्
सङ्घो यज्जिनसंमतो गुरुतरैर्नोपेक्ष्यते बुद्धिमान् ।
कृत्वा सङ्घमतं न्यवेशयदसौ श्रीहीरहर्षं निजे
पट्टेऽर्हन्मतसारसूरिपदवीयोग्ये मुहूर्ते सुधीः ॥ ३२॥

**सीरोहीनगरे** बभूव विजयो हीरादतस्तद्गुरु-
र्नामास्याशु चकार **हीरविजयं** सद्भिस्तदा स्वीकृतम् ।
इभ्यैः सूरिपदोत्सवस्तु विविधश्चक्रे तथेन्द्रैर्यथा
श्रीवीरेण सुधर्मगौतमशिरःपट्टप्रदानक्षणे ॥ ३३॥

आचार्यैः सममेतके गुरुवरादेशात्ततः प्रस्थिता-
आयाता **अणहिल्लपत्तनपुरे** तस्थुश्चतुर्मासकम् ।
पोता अम्बुनिधाविवोडुपभरैर्नीडे यथा पक्षिणः
स्वापत्यैर्मुनिचक्रसेवितपदाः संसारलेपोज्झिताः ॥ ३४॥

गूढाम्नायजिनोक्तवाङ्मयरसं **श्रीहीरकोष्ठे** गुरु-
र्व्याघ्रीदुग्धमिव प्रकृष्टकनकामत्रेऽनिशं क्षिप्तवान् ।
लब्धे शिष्यवरे हि यः शुचितमां दत्ते न विद्यां निजां
निर्विद्यः स भवे परत्र भविता धिक्कारमेत्यत्र च ॥ ३४॥

शुद्धांशे सकलग्रहेषु पदवीमुच्चाङ्गतेषूत्तमे
लग्ने श्रीगुरुभूपतिर्विधिधरः श्रीसूरिमन्त्रं ददौ ।
लक्षेभ्यैर्विहितेऽत्र **हीरविजयाचार्याय** कोटिव्यये
हीरार्थं कुरुते न किं धनिजनः कोटिव्ययं बुद्धिमान् ? ॥ ३६॥

निश्चिन्ता गुरवः स्वपट्टविवधारोपात् स्वशिष्येऽधिके
**श्रीहीरे** निजकार्यसाधनपरा व्यापारमासूत्रितम् ।
गच्छस्यास्य विमुच्य संयमसुखे मग्ना रसे शान्तिके
जग्मुर्देवगृहं विशुद्धमनसोऽर्हद्ध्यानलीनास्ततः ॥ ३७॥

गच्छेऽस्मिन्नथ चारु**हीरविजया** भट्टारकत्वं गता-
निर्ग्रन्थान् द्विसहस्रमानगणितान् संशिक्षयन्त्यादृताः ।

वाक्यैर्हृद्रुचितैर्मितै र्हितकरैर्जैनैरिवाकर्कशै-
श्चारित्रोपकृतिप्रदानविधिना सन्तोषयन्ति क्रमात् ॥ ३८ ॥

देशे यत्र पुरेषु येषु विहृतिं चक्रुस्त्विमे सूरयः
सप्तक्षेत्रधनव्ययो धनिकृतस्तत्राऽभवत्तेषु वा ।
जीवाऽमारिरहर्निशं व्रतकृतिर्दीनोद्धृतिर्भाविनां
प्रासादोद्धरणं च भक्तिकरणं साधर्मिकाणां पुनः ॥ ३९ ॥

अन्येद्युर्भुवि सूरि**हीरविजया** **गन्धार**पुर्यां स्थिताः
कृत्वाऽवग्रहमब्धिमासनियतं साधुव्रजभ्राजिताः ।
दिल्लीशेन यथा श्रुताः कृतिनरैराकारिताः सत्कृता-
जीवामारणवर्त्तनैरिति तथा सर्वं मया प्रोच्यते ॥ ४० ॥

अस्ति श्रीमति **भारत**क्षितितले श्री**मध्यदेशः** शुचि-
प्रासादप्रतिमासुपुस्तकनिधिर्वर्यार्यलोकाश्रितः ।
देशाः सार्द्धकपञ्चविंशतिमिताः सन्त्येव यत्र स्फुर-
च्चक्रिश्रीजिनविष्णुमुख्यपुरुषश्रेष्ठाऽवतारोदिताः ॥ ४१ ॥

अस्त्यत्र प्रवरा पुरी नरभरैरापूरिता **काबिला-**
भिख्या **सत्खुरसानदेश**निकटे धीराधिवासोचिता ।
यस्यां मुद्गललक्षमक्षतबलं **हिन्दासुरत्रासकं**
स्वैरं द्रव्यशतानि सार्द्धघटिकामध्येऽत्ति भोगैर्धनैः ॥ ४२ ॥

आसीत्तत्र **हमाउनाम**नृपतिर्दैत्यावतारोऽरिषु
म्लेच्छानामधिपः प्रतापतपनश्चक्रीव युद्धे जयी ?
यस्याश्वा इव राक्षसा गिरिशिरःस्फालाः प्रलम्बानना-
स्त्रासं हस्तिवरानपीव महिषान्नित्यं नयन्ति क्षणात् ॥ ४३ ॥

अन्येद्युः स सुतेऽष्टवर्षवयसि स्पष्टोदये**ऽकब्बरा-**
भिख्ये राज्यभरं निवेश्य चलितः कर्तुं महीमात्मसात् ।
अब्ध्यन्तां प्रलयाब्धिसैन्यकलितस्तावत् समेतः पुरे
**दिल्लीनाम्नि** भटालिदुर्घटतटे कोटीश्वराभ्याश्रिते ॥ ४४ ॥

तत्राभून्नवलक्षवाजिसुभट: **सूरः** प्रतिष्ठानपो
मत्तेभाद्विचतु:सहस्रगुणन: कोट्युग्रपत्तीश्वर: ।
युद्धे येन च राष्ट्रकूटकुलभू: **श्रीमल्लदेवो** जित:
श्री**मद्योधपुरे**श्वरो मरुपतिदुर्वारवीरावृत: ॥ ४५ ॥

तस्मै सूरनरेश्वराय निपुणं दूतं तदा प्राहिणो-
च्छ्री**मन्मुद्गल**नायक: परिसरे स्थित्वा सुनीतिं वहन् ।
दूतोऽप्याऽऽख्यदिदं **हमाउ**नृपते: पादप्रणामं कुरु
श्रीदिल्लीश ! भवाहवाय सुतरां सज्जोऽथवेतो व्रज ॥ ४६ ॥

श्रुत्वा दूतवचोऽवदन्नरपतिः सूरोऽतिगर्वोद्धुर:
कोऽयं मत्पुरतो हमाउनृपतिर्वाणिज्यकृद्वम्भ्रमी ।
दत्त्वाऽश्वांश्चिरसञ्चितान्मणिगणान् स्वर्णं च रुप्यं वशा
वीराणां च शिरांसि यास्यति वपु:शेष: सुशेषीभवन् ॥ ४७ ॥

याहि त्वं वद दूत ! मद्वच इदं तस्मै निजस्वामिने
भूया: सज्ज इहाहवेऽहमनुगस्तेऽभ्यागत: सांप्रतम् ।
इत्युक्त्वा गलहस्तदानमकरोद्दूतस्य सूरो नृप:
कोपो यत्स्वविनाशकारिसमये दुष्टं विधिं कारयेत् ॥ ४८ ॥

दूतस्तद्वचनं स्वलाघवकृतिं स्माख्याति तन्मत्ततां
श्रुत्वा काबिलनायकोऽपि हृदयेऽप्युल्लासमुच्चैर्दधौ ।
नो भीतिं निजबाणवीर्यचकितं जानन्नदृश्यं हरिं
किं पर्जन्यविगर्जनश्रवणतो बिभ्येति पाथ:पति: ? ॥ ४९ ॥

ढक्कावादनपूर्वकं नरपति: सूरोऽपि सैन्यं निजं
सन्नद्धं विविधाऽस्त्रपङ्क्तिकिरणैर्लुप्तोष्णपादांशुकम् ।
एकीकृत्य चचाल मुद्गलपते: सैन्यं तृणप्रायकं
जानन् मत्तमतङ्गजावलिरणद्धण्टारवाडम्बर: ॥ ५० ॥

सङ्ग्रामाङ्गणमागतं क्षितिपतिं दृष्ट्वा हमाऊनृप-
स्तं वीरान् द्विसहस्रमानगणितान् युद्धार्थमाज्ञापयत् ।

प्राज्यान् यत्तृणपूलकान् शिखिकणा द्वित्रा न किं भस्मय-
न्त्येवं चेतसि चिन्तयन्निजबलस्कन्धे स्थितः सोद्यमः ॥ ५१॥

तावद्भिः सुभटैर्घनैरिव भृशं बाणाम्बुधारोच्चयान्
वर्षद्भिर्नवलक्षसैन्यमसमं चक्रे विपय्व्याकुलम् ।
द्वित्राः किं न मृगारिमत्तशिशवः कोटीभदर्पापहा-
द्वित्रा वामृतबिन्दवः पृथुतराऽसाध्यैकरोगापहाः ॥ ५२॥

तैः सैन्यं निजमाकुलं कृमिदं वीक्ष्याशु सूरो नृपः
सङ्ग्रामाभिमुखोऽभवद्गजघटाध्यास्फालितारिव्रजः ।
निघ्नन् बाणगणैरलक्ष्यचरितैः कान्ताकटाक्षैरिव
त्यक्तास्त्रं द्विसहस्रमानगणितं सैन्यं चकारानुगम् ॥ ५३॥

सैन्ये तावति शस्त्रदर्परहिते पश्चात् समागच्छति
द्विट्चक्रे जयतीह सूरनृपतिश्चेत्युद्धतं गर्जति ।
श्रीमन्मुद्गलनायकोऽपि सुभटैर्लक्षप्रमैरुत्थितः
किं शेषः स्वफणावृतः क्षितितलादागादारिग्रासकृत् ? ॥ ५४॥

श्रीसूरोऽपि **हमाउर**प्यभिमुखं वीरैर्निजैर्वेष्टितौ
कुर्वाणाविव युद्धमुद्धतमिमावादित्यराहू क्षितौ ।
किं व्योम्नः पतितौ पुनः धुनरिवोत्प्लुत्यान्तरिक्षाशया-
यातोऽप्यूर्द्ध्वमितीह साधु कुरुतस्तर्कं सतां मानसे ॥ ५५॥

तावत्काबिलनायकः करतले धृत्वा धनुर्दोष्मतां
मुख्यः सूरबले ललाटतिलकं केषां विभिन्नं पुनः ।
केषाञ्चिद् हृदयं चकार जठरं मूत्रप्रदेशं पुनः
केषाञ्चित्करयामलं करयुगं केषाञ्चिदस्त्रव्रजम् ॥ ५६॥

बाणासारमिति प्रवर्षति नृपे तस्मिन् स्वयं तद्भटे-
ष्वेवं वर्षदनेकशस्त्रनिकरेष्वेकोऽपि कश्चिद्दले ।
सौरेऽभून्न भटः पटुः स्फुटकणैर्यो जर्जरश्चेषुभि-
स्त्वत्किं ध्वान्तमिहाऽस्ति यद्रविकरैर्नो भिद्यतेऽत्युज्ज्वलैः ? ॥ ५७॥

भग्नं सौरबलं विमुच्य सकलं वित्तं गजाश्वादिकं
नष्टं दिक्षु विदिक्षु निःस्वतुषवत्फूत्कारसाध्यं गतम् ।
देशं तस्य विभुत्वमश्वनिकरं स्वर्णं मणीन् हस्तिनः
कोशं वा जगृहे हमाउसुभटश्रेणिः स्वनाथाज्ञया ॥ ५८॥

नष्टे सूरनृपे तदीयसुभटान् कृत्वा स्वसेवापरान्.
निर्दण्डान् सुखिनश्च देश्यमनुजान्निर्भीतिराज्यं दधौ ।
दिल्लीकाबिलमार्गसञ्चरदिभाश्वोक्षोष्ट्रमानुष्कं
मुक्तारत्नसुवर्णराशिरचितोत्तुङ्गाद्रिकोट्यालयम् ॥ ५९॥

किं चाऽस्मिन् समये विशिष्टमनुजे श्री**गूर्जरे** मण्डले
भूभुग् बादरसंज्ञितः करिबलः षड्लक्षसैन्योद्धुरः ।
सामुद्रानपि भूपतीन्निजपदाम्भोजन्मसेवोद्यतान्
कुर्वन्मालवदक्षिणोत्तमपतिश्रेण्यर्चितश्चाभवत् ॥ ६०॥

अन्येद्युः स च मेदपाटधनिकं श्री**रत्नसिंहं** रणे
जित्वा तन्नगरं बभञ्ज हठतः श्री**चित्रकूटा**भिधम् ।
तत्र क्षत्रियपुत्रिकाततिरभूद्वह्निप्रवेशादृत-
प्राणाश्चापरमानवा भटचयव्यापारितास्त्रात्तथा ॥ ६१॥

तदुःखादसमाधिवासितहृदा श्रीरत्नसिंहक्षमा-
पालेनेति **हमाउ**भूमिपतये विज्ञप्तिराविष्कृता ।
साहाय्यं कुरु मे तथा नरपते ! दुष्टं यथाऽन्यायिनं
बध्वा **बादरनामकं** करतले देहि क्षमस्त्वं यतः ॥ ६२॥

तस्याभ्यर्थनयेति काबिलपतिः सैन्यावृतो बादर-
क्षोणीशग्रहणाय बद्धकवचः सद्यश्चचालोद्धतः ।
दिल्लीतस्तृणवच्च गूर्जरभटांश्चित्ते निजे कल्पयन्
दोर्वीर्यं निजमग्निवद्धरिहरब्रह्मादिवीर्याधिकम् ॥ ६३॥

यावच्छ्रीमति चित्रकूटनिकटे दिल्लीपतिश्चागत-
स्तावद्बादरभूपतिर्निजबलाविष्टः प्रनष्टस्तदा ।

गत्वा मालवमण्डलेऽतिगहने कोट्टं दृढं **मण्डपा-**
भिख्यं सज्जयति स्म सज्जविभवस्तत् स्पष्टयुद्धासहः ॥ ६४॥

तं नष्टं स निशम्य मालवपथे व्यक्ताभिमानोऽचल-
द्दूरे मालवको यमस्य किमयं दृष्टान्त इत्येष यत् ।
रुद्ध्वा **मण्डप**कोट्टमुद्भटभटैर्जम्ब्वाखयमब्धिर्यथा
द्वीपं दुर्द्धरवीचिभिः स्थितिमसौ दिल्लीपतिर्निर्ममे ॥ ६५॥

भग्नः स्तोकदिनैर्गजैर्भटघटानुन्नैः स वप्रो दृढो-
ऽपीवाद्रिः कुलिशानलैर्हरिकराध्यास्फालनोत्थैस्ततः ।
नष्टस्तुच्छभटः प्रकम्पहृदयः स्पष्टं गतो गौर्जरे
पावाद्रौ विविधर्द्धिभूषितगृहे स्वर्गावतारेऽधिकम् ॥ ६६॥

लात्वा मण्डपपर्वतं धनरथाश्वेभैश्च मर्त्यैर्भृतं
कोटीशैः स्वविलासधिक्कृतनराधीशैरुदारात्मभिः ।
आज्ञां मालवमण्डले निजभटैर्सार्द्धं समारोपय-
द्वाट्यां कल्पलतामिवोत्तमफलामारामिकः सिद्धिवित् ॥ ६७॥

पावाद्रौ विहितस्थितिं निजचरैर्मत्वा पुनर्बादरं
दिल्लीशः स्वभटावृतोऽतत्र गतवान् सद्यः प्रयाणैः सुधीः ।
कर्तुं यद्विबुधैः समस्तपुरुषाध्यक्षं मुखे भाषितं
तत्कार्यं न समाप्तिमेति सुधियां यावत्र तावत् स्थितिः ॥ ६८॥

श्रुत्वा काबिलनायकागममसौ नष्टस्ततो बादरो-
यो यस्माच्चकितो हि तस्य पुरतस्तस्यैवमेवं गतिः ।
श्रीमत्**स्तम्भनपार्श्वनाथ**विशदे श्री**स्तम्भतीर्थे** गतः
सद्धर्मादिकवर्गसाधकजनाकीर्णे धनाध्यासिते ॥ ६९॥

ज्ञात्वा तत्र गतं चरैश्च चलितः सद्यो **हमाउस्त**तः
सनध्यायां स तथा यथागमदिह प्रातर्भटावेष्टितः ।
अब्धेर्भानुरिवांशुपूरकलितः खेऽन्यायिधूकक्षयी
तेजस्वी नयतः करोति हृदये शङ्कां व्रजन् सर्वतः ॥ ७०॥

रत्नस्वर्णभृतान्यनेकशकटान्यब्धेस्तटे **बादर-**
स्त्यक्त्वा तुच्छभटावृतोऽम्बुधितरद्द्वीपेऽविशद्भेकवत् ।
तीर्थान्तस्तु **हमाउ**नामनृपतिर्भूभुग् गृहान्तर्यथा
हस्ती गन्धवरः स्ववैरिमदहृत्प्राप्तप्रतिष्ठोऽभितः ॥ ७१ ॥

मत्वा नष्टसमस्तसंपदमसौ जीवन्मृतं बादरं
तद्बन्धाग्रहमामुमोच हृदये दिल्लीपतिः शक्तिमान् ।
यद्वायुर्न तृणानि नीचनमनान्युन्मूलयत्युद्धतः
सद्यो वृक्षचयं समुच्छ्रिततरं विस्तीर्णभूच्छायकम् ॥ ७२ ॥

तत्राज्ञां स्वभटैः समं कृतिवरः श्रीगुर्जरे मण्डले
दिल्लीशः स समग्रभूमिवलये कीर्त्तिं यथाऽरोपयत् ।
खड्गं क्षालयति स्म नीरधिजले तीर्थे यथा निर्मलः
प्राणी पाप्म निजं सुपात्रततये सद्वस्तुदानोद्यतः ॥ ७३ ॥

कृत्वा गुर्जरमालवादिकमहादेशेषु सौस्थ्यं पुन-
र्दिल्ल्यां मुद्गलनायकः शतगुणश्रीवृद्धिमानागतः ।
एकच्छत्रमकण्टकं सुखभरं राज्यं बभारोत्तरं
पुण्ये जाग्रति को न वाञ्छिततर्तिं प्राप्नोति यस्माज्जनः ॥ ७४ ॥

अन्येद्युः स सुपर्वपर्वतसमप्रोच्चालयोर्द्ध्वं गतः
पश्यन् स्वं नगरं विशालनयनः प्रोत्फुल्लचित्ताम्बुजः ।
मत्तुल्योऽयमभूदितीव विधिना स्पर्द्धिष्णुना पातितः
संप्राप्तभ्रमिराशु कालसदनं प्राप्तः पृथिव्यां पतन् ॥ ७५ ॥

धिग् धिग् धिग् विधिमेनमङ्गिनिवहं कृत्वा जगत्स्वामिनं
गर्त्ताधूलिशयं करोति सहसा यः सज्जनो दुर्जनः ।
एवं सर्वजना विलापतुमुलं चक्रुस्तदा तत्पुरे
सूर्येऽस्तं व्रजतीह को न विवशः शोके न चान्धो भवेत् ॥ ७६ ॥

खद्योता इव तत्र सूरसुभटा अस्तङ्गते भास्करे
तस्मिन् कालगृहं गते गतभयास्तत्पुत्रमग्रेसरम् ।

कृत्वा दुर्वहशस्त्रपाणिपटवो निर्नायकान् मुद्गला-
नागत्य स्म विनर्जयन्ति हि जयो निर्नायकानां कुतः ॥ ७७ ॥

ते संभूय ततः स्वकाबिलपुरीमुद्दिश्य तत्तर्जिता-
नेशुश्चारकसंस्थितो नरभरः प्राप्नोति यद्वारकम् ।
यावत्तावद**कब्बरो** लघुवया अप्युग्रतेजःस्फुर-
न्नश्रौषीत् स्वपितुर्मृतिं निजभटत्रासं च दस्यूदयम् ॥ ७८ ॥

शोकं स क्षणमात्रमात्मकुलजैः कृत्वा समं **काबिला**-
पुर्याः पञ्चशतीभटैः परिवृतः सद्यः समाजग्मिवान् ।
स्वं बन्धुं च निवेश्य तत्र नगरे शिक्षाविधानोद्यतं
तेजो यत् सहते न वैरिकुलजं वीराधिवीरः परम् ॥ ७९ ॥

श्रीमल्लाहुरनाम्न्यऽपूर्वनगरे सैन्याय तत्त्रासतो-
ऽत्रायाताय नरेश्वरोऽमिलदिवाऽकाण्डेऽभिमन्युक्षये ।
पार्थो धिक्कृतिकारकः कथमहो नश्यद्भिरत्रागतं
श्रीभद्भिर्न मृतं निहत्य सकलान् सौरान् भटानित्यवक् ॥ ८० ॥

तेऽप्यूचुः सुभटास्त्वदभियुगलस्याग्रे वयं तान् ध्रुवं
हन्तुं सज्जकरा रवेरिव तमांस्येषोऽरुणो नान्यथा ।
एवं तान् वदतो वचः कुशलतावेदी भृशं सत्कृतां-
श्चक्रेऽकब्बरभूपतिर्निजबलाऽवबज्ञातदैत्याधिपः ॥ ८१ ॥

तत्र द्वादशवार्षिकोऽपि नृपतिस्तत्सैन्यवीरावृतः
सौरे सैन्यभरे समापतदिवागस्तिः सरिन्नायके ।
चित्रं तद्भटशोषमेष विदधे स्वाह्वाक्षरश्रावणात्
स्वं सैन्यामृतवारिधिं जयरसापूर्णं पुनर्निर्ममे ॥ ८२ ॥

भग्नं सौरबलं गतं यमगृहे किञ्चिद्गिरेर्गह्वरे
किञ्चिद्वारिनिधौ वनेऽतिगहने किञ्चिन्न किञ्चित्करम् ।
जातं वीक्ष्य पुनर्निजं नरपतिर्लब्धर्द्धिहस्त्यश्वकं
प्रत्येकं स्वभटेषु चक्रितुलनां मेने जयावाप्तितः ॥ ८३ ॥

लब्धोऽनेन जयो नृपेण विशदो यस्मिन् महीमण्डलं
तस्मिन् यावनभाषयाऽक्षरवरं **फत्तेपुरं** वासितम् ।
**कृष्णेनेव** विशालसुन्दरगृहं श्री**द्वारिका**नामकं
भूपानां स्थितिरेषकैव हि जयस्थाने पुरस्थापनम् ॥ ८४ ॥

राज्यं तत्र करोति लब्धविजयः श्रीपातिसाकब्बरः
श्रीफत्तेपुरनामके पुरवरे व्यापारिवर्गाश्रिते ।
चातुर्वर्ण्यगृहैर्जिनेशसदनैः षड्दर्शनोद्यन्मठैः
शोफीसद्दरवेशमुद्गलपदैश्चाट्टवरैर्भ्राजिते ॥ ८५ ॥

अश्वा लक्षचतुष्टयं गजवरा द्वित्वे सहस्रा दश
क्रीडन्तीप्सितभोज्यलाभपटवो गावस्तु संख्यातिगाः ।
उष्ट्रा वा महिषीगणा नृपगृहद्वारेऽधिकाः पत्तयो
वीरा यत्र विलासलालसवपुःशोभा नृपाऽऽत्तैर्द्धनैः ॥ ८६ ॥

द्वात्रिंशन्मणभारलोहकमयीं हस्तेन यः शृङ्खला-
मुत्पाट्याभ्रपथेऽल्पकन्दुकमिव प्रोच्छालयत्यञ्जसा ।
एष श्रीमदकब्बरः क्षितितिले केषां न हिन्द्वासुर-
क्ष्मापानां हृदये चमत्कृतिकरोऽस्त्यादर्शयन् दोर्बलम् ॥ ८७ ॥

केचिद् हिन्दुनृपा बलश्रवणतस्तस्य स्वपुत्रीगणं
गाढाभ्यर्थनया ददत्यविकला राज्यं निजं रक्षितुम् ।
केचित्प्राभृतमिन्दुकान्तरचनं मुक्त्वा पुरः पादयोः
पेतुः केचिदिवानुगाः परमिमे सर्वेऽपि तत्सेविनः ॥ ८८ ॥

हिन्दुम्लेच्छसुताः स्वरूपविजितश्रीशादिदेवाङ्गनाः
श्रूयन्तेऽस्य सहस्रमानगणिताः कान्ता लसद्भाग्यतः ।
तासां भोगफलं तु पुण्यललितं पुत्रत्रयं श्रूयते
जीवाः स्तोकतरा भवे सुततया ये स्युः क्षितिस्वामिनः ॥ ८९ ॥

अन्येद्युः स समस्तहिन्दुकलशं श्रीमेदपाटाधिपं
**श्रीराणोदयसिंह**मुद्धतबलं म्लेच्छाय पुत्री निजा ।

दत्ताऽस्मत्कुलपूर्वजैर्न च मया देयेति गर्वं गिरा
व्याख्यान्तं श्रुतवानकब्बरनृपः क्षोणीश-शिक्षापरः ॥ १० ॥

तस्मै भूपतये विचारचतुरः प्रैषीन्निजं मन्त्रिणं
भूपः श्रीमदकब्बरः क्षितिपतिं **राणं** विशिष्टं विदन् ।
गत्वा मन्त्र्यवदत्तदीयसदसि स्पष्टं गिरा सारया
सन्तो यत्र वचः स्थितिं क्वचिदपि प्रोल्लङ्घयन्त्यग्रतः ॥ ११ ॥

देहि त्वं स्वसुतामकब्बरमहीभर्त्रे परैर्हिन्दुभि-
र्यद्दत्ताः स्वसुताः स्वराज्यविभवक्षेमाय नाभ्यर्थितैः ।
एतावत् समयं प्रतीक्षितमिहाप्यर्थेन तद्युक्तिम-
द्यत्त्वं दक्षतमोऽसि योग्यसमयज्ञानाय किं कथ्यते ? ॥ १२ ॥

राणोऽप्याख्यदिदं कुलस्थितिरियं मे पूर्वजैः पालिता
यन्म्लेच्छाय न दीयते निजसुतेत्युल्लङ्घ्यते नो मया ।
देशो यातु गजाश्च यान्तु विभवध्वंसोऽस्तु मे पर्वते
वासोऽप्यस्तु कुलस्थितिः पितृकृताप्येकैव मे तिष्ठतु ॥ १३ ॥

**॥ तदुक्तम् ॥**

लब्धां गुणौधजननीं जननीमिवार्या-
मत्यन्तशुद्धहृदया अनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ १४ ॥

मन्त्र्याख्यन् नृपराण ! यन्निजसुतादाने हठः सांप्रतं
वाक्यं वादयतीह तादृशफलं तत्तेऽचिराद्दास्यति ।
यद्यद्भावि तदग्रतो निजमुखात् प्रायेण निष्काशये-
देवं प्रोच्य गतः प्रधानसचिवश्चाकब्बरस्यान्तिके ॥ १५ ॥

उक्तं तस्य पुरो यथार्थवचनं राणोदितं मन्त्रिणा
सन्तोऽपीष्टमनिष्टमप्यवितथं कुर्वन्ति वाग्गोचरे ।

तद्वाक्यश्रवणादनन्तरमसौ फत्तेपुरान्निर्गतः
सैन्यैः सारतरैर्वृतो गिरिशिरःकोट्टादिभङ्गोद्यतैः ॥ ९६ ॥

तस्याऽभ्यागमनश्रुतेर्निजपुराद्राणो धनाद्यं निजं
लात्वा **कुम्भलमेरु**कोट्टमभजद् ग्राह्यं न वीरोत्तमैः ।
सामन्तो **जयमल्ल**नामनृपतिः श्रीचित्रकूटेऽचट-
द्योद्धुं म्लेच्छबलैः समं खरभटस्तन्मार्गमध्यस्थिते ॥ ९७ ॥

तं वृत्तान्तमकब्बरक्षितिपतिः शुश्राव मार्गे वहं-
श्चित्ते चिन्तयदित्यशेषसुभटैः किं चित्रकूटाचलः ।
पूर्वं ग्राह्य उतैष कुम्भलगिरिः श्रीराणभूपाश्रय-
स्तद्भृत्यो जयमल्लभूपतिरसौ मन्मार्गवक्त्रे स्थितः ॥ ९८ ॥

एवं तर्कपरस्य तस्य नृपतेर्मार्गे समागच्छतः
पार्श्वे श्रीजयमल्लनामनृपतिर्दूतं तदा प्राहिणोत् ।
दूतोऽप्याख्यदिदं महीश ! नृपतिश्रीराणभृत्यान्तिमो
मद्वक्त्रे जयमल्लभूपतिरिति त्वां ख्यापयत्युत्कटः ॥ ९९ ॥

त्वं चेद्भूप हमाउनन्दन इति ख्यातोऽसि तर्ह्यत्र मे
वक्त्रं दर्शय चेन्न तर्हि रुचिते स्थाने व्रजान्यत्र वा ।
त्वद्भक्तिं च विधातुमत्र विभुना राणेन संस्थापितः
प्रेष्योऽहं परमेश्वरस्य तदनु श्रीराणभूस्वामिनः ॥ १०० ॥

दूताख्यातमिदं निशम्य नृपतिः पूर्वं ततोऽत्रापतत्
कोट्टं पर्वतमस्तकस्थितमसौ श्रीचित्रकूटाभिधम् ।
दध्यौ वीक्ष्य हृदीति किं सुरगिरिः किं वैष कैलासको
वैताढ्यः किमु किं हिमाचल इव श्रीरोहणाद्रिः कथम् ? ॥ १०१ ॥

एवं तर्कपरोऽपि सत्त्वजलधिस्तद्भञ्जनायोद्यत-
श्चक्रेऽकब्बरभूपतिर्घनतरोपायान् भटप्रेरकः ।

उच्चैःस्थो जयमल्लभूपतिरमुं वाणिज्यकारोपमं
चित्ते चिन्तयति स्म नृत्यमनिशं पात्रैस्तदाऽकारयत् ॥ १०२॥

वीरास्तत्कपिशीर्षकेषु सबला भूपेन संस्थापिता-
वर्षन्तो विविधाश्मलोहनिबिडास्त्राणीव मेघाश्छटाः ।
चित्रं मुद्गललोकधान्यविषयं दुष्कालनीतिं तदा
चक्रुः कोट्टमहीतले च विजयव्यासङ्गसौभिक्षकम् ॥ १०३॥

सामान्योऽपि जनस्तदा धनिबलात् कोट्टोर्द्ध्वभूमौ स्थितो
धिक्कारं वचसा विधाय मुमुचे यत् प्रस्तरार्द्धार्द्धकम् ।
तत् सैन्येऽजनि मौद्गले हरिकरव्यामुक्तवज्रोपमं
तेजस्विन्यधिपे दिवाकर इवाहःसन्निभाः सेवकाः ॥ १०४॥

एवं श्रीजयमल्लभूपसुभटश्रीचित्रकूटाचल-
त्राणार्थं स्वकरद्वयं खरतरैः शस्त्रैर्न शून्यं कृतम् ।
वक्त्रं मुद्गनाथधिक्कृतिकृते दुष्टैर्वचोभिर्जनैः
सामान्यैरपि चित्रकूटनगरान्तर्वासिभिः सादरम् ॥ १०५॥

दृष्ट्वा वीरकरान् समस्तमनुजास्योद्भूतदुर्वाक्चयं
श्रुत्वा चाख्यदकब्बरो नरपतिर्गृह्णामि चेदेतकम् ।
तत्सर्वान् पुरुषान्निहन्मि वनिताबन्धं भटैः कारया-
मीति स्पष्टगिरा समस्तसुभटानुत्साहयन् सत्त्वतः ॥ १०६॥

क्रुद्धोऽकब्बरभूपतिर्गिरितले गुप्तं तथा खानयन्
मातं तत्र यथा चतुर्दशशतप्रायैर्मणैरौषधम् ।
भृत्पात्रं शिखिबिन्दुसङ्गविलसत्तेजोऽतिशक्त्या दृष-
द्दुर्गास्फालनतो मनुष्यनिकरव्यापत्तये सज्जितम् ॥ १०७॥

तद्भाग्याद् जयमल्लनामनृपतेः श्रीचित्रकूटाचल-
व्याबाधां न चकार सम्मुखमदः सैन्ये पतन्मौद्गले ।

मातङ्गांश्च नरान् सहस्त्रगणितान् हन्ति स्म जातं ततः
सत्यं यच्च परस्य चिन्त्यत इहाभ्येत्येव तत् सम्मुखम् ॥ १०८॥

तज्ज्ञात्वा जयमल्लनामनृपतेर्वीरा जहर्षुस्तदा
गायन्ति स्म च राणगीतनिकरं नित्योत्सवानन्दिनः ।
मत्वाऽकब्बरभूपतिर्निजबलध्वंसं मनोदुःखवान्
यावत्तद् ग्रहणग्रहं श्लथतरं कृत्वा विखिन्नोऽभवत् ॥ १०९॥

तावन्नागपुरीयगच्छशिथिलोपाध्यायलिङ्गी खरः
शास्त्राजीवनकृच्चकार विशदं कोट्टस्य चक्रं हृदा ।
आख्यत् सप्तदिनैश्च भङ्गमतुलव्यायाससाध्यं गिरे-
र्भूपाग्रे जयमल्लभूपमरणं रोमीकरायोधनात् ॥ ११०॥

तच्छ्रुत्वा स्वबलं गिरिग्रहपरं सज्जास्त्रमश्वस्थितं
भूपः प्रेरितवान् करासिविभवः पृष्ठे स्थितो भापयन् ।
पश्चादापततो भटान्निजपदोपास्त्युद्यतं **रोमिकं**
चैकं श्रीजयमल्लभूपतिवधे स्वर्णार्पणेनादिशत् ॥ १११॥

दुष्टात्मा किल **रोमिको**ऽपि सहसोत्प्लुत्याद्रिमूर्द्धस्थितः
स्वास्त्रं गोलकमग्निपुञ्जकलितं चिक्षेप तत्सम्मुखम् ।
सोऽपि श्रीजयमल्लभूपतिशिरोमध्ये विशन्निर्गतः
शास्त्रं जाल्महृदीव धार्मिकहृदीवासभ्यवाक्यान्वयः ॥ ११२॥

तावच्छ्रीजयमल्लभूपतिरसौ भूमौ पतन्नित्यवक्
भो वीराः ! अथ यास्यतीव कुसुतो हस्तादयं पर्वतः ।
तस्मान्मन्मुखदर्शिनो धनजनानत्राधिरूढान्निजं
स्थानं साधु नयन्तु मार्गकरणे नात्मीयदोर्वीर्यतः ॥ ११३॥

जल्पन् श्रीजयमल्लभूपतिरिति प्राप्तस्तदा पञ्चतां
लोकास्तत्र घनाः स्थिता निजनिजश्रीदेवसेवापराः ।
वीराः श्रीमति चित्रकूटनगरद्वारेऽसिकुन्तग्रहा
निघ्नन्तोऽभिपतद्भटावलिशिरांसीवाममृद्गोलकान् ॥ ११४॥

भूपाकब्बरनुन्नवीरनिचयाः सद्योऽधिरूढा गिरौ
हत्वा श्रीजयमल्लभूपतिभटाग्निर्नायिका यत् कृतः ।
जीवन्तो जयिनो भवन्ति च तथा वीराधिवीराग्रतः
प्रायः स्वामिदशानुसारिबलिनः स्युः सेवकाः सर्वदा ॥ ११५॥

वीरैस्तत्र वृतोऽप्यकब्बरनृपोऽध्यारूढ उच्चैरिव
व्योम्न्यर्कः प्रबलप्रतापकलितः कोपोद्धुरस्तन्नृषु ।
आदेशं स वधस्य मुद्गलततेः शीघ्रं ददौ यन्नरः
कोपात् किं न करोति वक्ति च हृदन्धीकारकत्वस्पृशः ? ॥ ११६॥

भूपाकब्बरवाक्यमाप्य सुभटा दुष्टास्तथा चक्रिरे
तत्राऽभूद्भुवि शोणितोदकनदीपूरं यथा सर्वतः ।
तत्र स्थातुमशक्त एष नृपतिर्नीचैस्ततोऽप्युत्तरन्
मार्गस्थां च विदारितोदरतलां निष्कातिताऽङ्गोद्भवाम् ॥ ११७॥

दृष्ट्वा सुन्दरसुन्दरीं नरपतिः कारुण्यपूर्णं सदा ।
हा हा किं मयकाऽत्र कारितमिदं चण्डालकर्माधिकम् ?।
कुर्वंश्चानुशयं शिरः करयुगेणास्फालयन्नित्यवक्
यः पापं किल चित्रकूटरचनं गृह्णाति तस्याव्यहम् ॥ ११८॥

एनं देशपुरान्वितं गिरिवरं स्वर्णादिकं चार्पया-
मीत्याकर्ण्य नराऽधमोऽथ जगृहे कश्चित्त्वघं मुद्गलः ।
तद्दत्तं च गिरीश्वरं पुरवरग्रामाद्युपेतं तदा
लोभात् किं न नरः प्रपद्यत इह स्वाम्युक्तवाक्सञ्चयम् ? ॥ ११९॥

॥ त्रिभिः कुलकम् ॥

भूपोऽप्येष समाधिमान्निजभटैरावेष्टितो राणके
देशे शासनमुत्तमं निजपदेनावर्त्तयत् सर्वतः ।
जीवन्तं किल पापभीरुकतया राणं पुनर्मुक्तवान्
भव्यः पापकृतेर्बिभेति हृदये कृत्वैकवारं पुनः ॥ १२०॥

एवं मालवमेदपाटधनिकान् श्रीगुर्जरस्वामिनो
जित्वाऽकब्बरभूपतिर्निजपुरे सौख्यात्समापेतिवान् ।
राज्यं पालयति प्रपञ्चनिपुणः षाड्गुण्यसच्छक्तिमान्
सम्यग्दर्शनपण्डितादरकरस्तच्छास्त्रशुश्रूषया ॥ १२१ ॥

अन्येद्युः स समस्तदर्शनयतीनाकार्य धर्मस्य स-
त्तत्त्वं पृच्छति शुद्धबुद्धिविभवः स्मार्थी शिवस्यादरात् ।
तेऽप्याहुर्निजदर्शनोदितपथं वाग्विभ्रमैरभ्रमै-
र्नैकस्यापि बभूव तस्य रुचये मार्गो विचाराऽसहः ॥ १२२ ॥

एवं तस्य शिवार्थिनः प्रतिदिनं धर्मं बुभुत्सोः शुचिं
शुद्धाध्वैकगवेषकस्य नगरे काचित्परा श्राविका ।
षण्मासप्रतिमोपवासरचनां कुर्वत्यसंख्योदया
यान्त्यर्हत्प्रतिमाप्रणामविधये दृग्मार्गमभ्यागता ॥ १२३ ॥

इभ्यैर्या नरवाह्यवाहनचतुष्कोणाङ्गणे स्थापिता
वाद्याडम्बरमण्डिता धनजनव्यूहान्विता निर्मला ।
गङ्गेवाऽखिलपण्डितस्तुतिपदान्यासादयन्ती सती
शुद्धानन्ततपःप्रभावजनितं तेजो वहन्त्युत्तरम् ॥ १२४ ॥

केयं याति किमर्थमत्र नगरे कृत्वा महाडम्बर-
मित्थं प्रश्नपरं नरेश्वरवरं प्रत्याह **रामात्मजः** ।
मन्त्री **स्थानकसिंह** आर्हतपतिर्बद्धाञ्जलिर्हे प्रभो !
षण्मासीतप एतयाद्दतमिहार्हच्छास्त्रवित्कारितम् ॥ १२५ ॥

नान्नं नापि फलं न दुग्धमथवा तक्रं न दध्यादिकं
पक्कान्नं न लवङ्गपूगशकलं नास्वादयत्यह्नि वा ।
रात्रौ यावादियं विशिष्टतपसः षण्मासकालस्थितेः
पूर्त्तिं चोष्णजलं दिवैव पिबति श्रीवीतरागाज्ञया ॥ १२६ ॥

इत्याकर्ण्य नरेश्वरो निजचरैच्छन्नं हि तस्याः स्थितिं
रात्रौ वाह्नि गवेषयत्यनुदिनं तद्वाक्परीक्षाकृते ।

तस्यास्ते विमलं तपोविधिमलं निश्चित्य सत्यंवदाः
सत्यं प्राहुरिहाऽस्ति नैव कपटं न्याये यथा त्वत्कृते ॥ १२७॥

श्रुत्वा वाचमिमां चरव्रजमुखाच्चित्ते चमत्कारवां-
स्तामाकार्य वरादरेण नृपतिः पप्रच्छ भक्त्येत्यसौ ।
हे मातः ! तप ईदृशं खरतरं कस्याऽनुभावात्त्वया
शुद्धं साधु विधीयते वद मनःशङ्कां विहायोत्तमे ! ॥ १२८॥

सा प्राहाऽत्र तपस्कृतौ नरपते ! श्रीदेवगुर्वोर्ममा-
ऽतुच्छः सूर्यकरावदातचरितः सम्यक्प्रभावोऽस्त्यहो ।
को देवस्तव को गुरुश्च जगतीत्युक्ते नृपेणाऽवदत्
सा श्राद्धी जिनशास्त्रतत्त्वविशदा चेत्थं स्वरूपं तयोः ॥ १२९॥

नो रागाङ्गारसङ्गो न मदनमदिरा न द्विषद्द्वेषदोषो
नो सम्मोहप्ररोहो न विकटकपटाटोपसंपच्च यस्य ।
शान्तः कान्तस्त्रिलोकीकलनकुशलवित् कोऽपि कोपादिमुक्त-
स्त्यक्तः संसारपाशैः स भवति भविनां देवता दैवयोगात् ॥ १३०॥

ईदृग् देव इहाऽस्ति बिम्बरचनाध्येयोऽधुना सिद्धिद-
श्चित्ते मे सुगुरुस्तु संयमधनः स्वान्यात्मतुल्याशयः ।
मित्रे शत्रुचये समोऽश्मनि मणौ स्त्रैणे तृणोघे पुन-
र्नाम्ना सांप्रतमस्ति **हीरविजयाचार्यः** सुसाधूत्तमः ॥ १३१॥

श्राद्धीवाक्यमिदं निशम्य नृपतिस्तां पूजयित्वाऽधिकं
स्वस्थाने विससर्ज मन्त्रिणमथोचे **स्थानसिंहाभिधम्** ।
कस्मिन्नस्ति पुरे स **हीरविजयाचार्यः** सुसाधूत्तमः
संप्रत्यऽप्यधिको यदीयमहिमाऽऽचारश्च पूर्वं श्रुतः ॥ १३२॥

मन्त्र्याख्यन् नृप! नास्ति तस्य वसतिर्ह्येकत्र देशे पुरे
सर्वत्र द्विसहस्रसंयमिगुरोः पादश्रमेणाटनम् ।
वर्षामासचतुष्टयस्थितिमसावेकत्र कुर्वन् क्रमात्
संप्रत्युत्तमधार्मिकेऽस्ति नगरे **गन्धारके** बन्दिरे ॥ १३३॥

श्रुत्वेत्याह महीपतिर्मम महाभृत्यान् सलेखानितः
पार्श्वे तस्य गुरोरिहोत्तमगुरोराकारणायोद्यतान् ।
शीघ्रं प्रेषय तं च शिष्यकलितं ह्यत्रानयेत्युत्तमा-
माज्ञां प्राप्य महीपतेः स सचिवः सर्वं तथा निर्ममे ॥ १३४॥

**गन्धाराख्युपरे** तदैव नृपतेर्दूताः सलेखाः शुभा-
आयाता इति **रामजीकमनजीका**द्यैर्महाश्रावकैः ।
श्रुत्वा हर्षभरात् सुवर्णमणिभिर्वर्द्धापिताः श्रीगुरो-
र्भूपाज्ञां निजहस्तलेखलिखितां सन्दर्शयन्त्युद्वदाः ॥ १३५॥

आज्ञां भूमिपतेर्विचार्य यतिराट् शिष्यान्वितस्तत्पुरा-
द्वर्षामासचतुष्टयादनु शुभे सद्यश्चचाल क्षणे ।
रात्रौ ध्यानधरस्य तस्य सुगुरोः सुप्तस्य पेतुः पुरे
कस्मिंश्चिज्जिनसासनामरकरान्मुक्ताः शिरस्युज्ज्वलाः ॥ १३६॥

ईर्याशुद्धिधरा विहारपटवः श्रीसूरयोऽभ्यागताः
दीप्रे**ऽहम्मदवाद**नामनगरे भूभूषणेऽर्हद्गृहैः ।
श्राद्धास्तत्र निवासिनो घनतरं चक्रुः प्रवेशोत्सवं
कान्तारेऽपि सतां महोत्सवभवश्चेत्तत्र किं सत्पुरे ? ॥ १३७॥

खानस्तत्र च **साहिबाख्य**नृपतिः श्रीपातिसाऽकब्बरा-
देशस्थः स्वसभाङ्गणे गुरुवरानाकार्य चक्रेऽर्चनाम् ।
अग्रे ढौकितवांश्च रत्नकनकस्थालं विशालं न त-
न्निर्ग्रन्थावलिनायकैर्गुरुवरैः स्पृष्टं करेणाप्यहो ॥ १३८॥

एते निःस्पृहपुङ्गवा यतिवराः श्रीमत्खुदारूपिणो
दृश्यन्तेऽत्र न चेदृशाः क्षितितले दृष्टा विशिष्टाः क्वचित् ।
एवं तेन तदीयमुद्गलभटैः सम्यक्स्तवं प्रापिता-
वाद्याडम्बरपूर्वकं निजगृहात् साध्वाश्रमे प्रेषिताः ॥ १३९॥

तस्माच्छ्रीगुरवः पुराच्छुभदिने चेलुर्यतिभ्राजिताः
स्युर्हंसा इव सांधव स्वसमये नैव प्रमत्ता यतः ।
आयाताः क्रमतो विहारचरिणः **श्रीपत्तनाख्ये** पुरे
तत्रत्यैर्व्यवहारिभिर्वरमुदाङ्गेष्वर्चिताः स्वर्णकैः ॥ १४० ॥

श्राद्धया तत्र कयाचिदत्यधिकया भावेन चित्तेन च
कर्त्तुं श्रीजिनशासनोदयमिति श्रीमद्गुरोरागमात् ।
षड्लक्षै रचनां त्रिकोट्टघटनामर्हद्गृहस्यादरा-
द्बिम्बन्यासमकारयच्च विविधानेकाङ्गिबोधिप्रदम् ॥ १४१ ॥

**विजयसेन**महोदयसूरिभि**र्विमलवाचकधर्मकसागरैः** ।
घनतरैरपरैश्च कवीश्वरैः परिवृता गुरवोऽत्र समागताः ॥ १४२ ॥

तत्राभूव्द्यवहारिवर्गविहितस्तादृक् तदाऽत्युत्सवो
यादृग् वीरजिने समस्तगणभृत्साध्वन्वितेऽप्यागते ।
देवेन्द्रैर्विहितश्चतुर्थसमये साक्षात्त्रिकोट्टाश्रये
सत्सु स्यात्र हि किं सतामनुकृतिः सर्वत्र सञ्चारिषु ? ॥ १४३ ॥

एवं सप्त दिनानि **हीरविजयाचार्याः** पुरेऽत्र स्थिता-
नित्यं तत्प्रतिमाप्रणामसमये तादृग्महःपूर्वकम् ।
चेलुस्तत्र च **धर्मसागर**महोपाध्यायमुख्यान् यतीन्
संस्थाप्याऽनुगमोद्यतान् हितकरीं दत्त्वा सुशिक्षां ततः ॥ १४४ ॥

**विजयसेन**महोदयसूरयो हठधरा निजसद्गुरुसेवने ।
अनुचरा इव सद्गुरुभिः समं पुरवरे खलु **सिद्धपुरे** गताः ॥ १४५ ॥

तांस्तत्रैव विशिष्टवाक्यरचनां शिक्षां स्वगच्छार्पणा-
द्दत्त्वाऽऽस्थाप्य च तेऽथ शिष्यकलिताः श्री**शान्तिचन्द्रादि**कान् ।
लात्वा सार्द्धमनल्पशास्त्रनिपुणांश्चेलुस्ततः पण्डितान्
विज्ञा एव हि राजसंसदि सदा स्युर्भूषणं नापरे ॥ १४६ ॥

ते श्रीसूरिवराः **सुहीरविजया**चार्या विहारक्रमाद्
ग्रामे कौलिकराजके सुरतरौ प्राप्ताः सुशिष्यान्विताः ।
तत्राऽनेकमहोत्सवं धनिजनैः सार्द्धं स राजा व्यधा-
च्छ्रीगुर्वागममोदतो गुरुगुणश्रुत्यैव सावर्जनः ॥ १४७ ॥

राजा तत्र निजे गृहे निजवशावन्दापनार्थं गुरू-
नाकार्य स्वगृहाङ्गणे धृतपदान्मुक्ताफलैर्देववत् ।
वर्द्धाप्योत्तमवस्त्रचक्रममुचत्तेषां पुरो भावतः
संगृह्णन्ति न तस्य खण्डमपि ते स्म त्यक्तलोभास्तदा ॥ १४८ ॥

तेषां निःस्पृहचेतसां नरवरः शुद्धपदेशं तदा
श्रुत्वा कौलिकनायकः पशुवधस्तैन्यादिदुष्कर्मणाम् ।
प्रत्याख्यानमनन्तसौख्यकरणं चक्रे स्वभृत्यैः समं
सन्तो दुष्कृतवर्जका निजगिरा स्युर्दुष्कृतध्यायिनाम् ॥ १४९ ॥

भूपं कौलिकचक्रमादृतमहाधर्मं विधायोद्यता-
श्चेलुस्तन्नगरात् **सुहीरविजयाचार्या** विहारक्रमात् ।
**सीरोह्यां** जिनचैत्यसन्ततिजितस्वर्नाथपुर्यां गताः
पुर्यां भावुकलोकनेत्रयुगलानन्दप्रदास्याम्बुजाः ॥ १५० ॥

तत्र श्री**सुलतान**नामनृपतिः श्रुत्वा तदीयागमं
पुर्यां घोषणमित्यकारयदहो हट्टे गृहे मण्डनम् ।
स्वे स्वे यो न करिष्यति प्रणयतः श्रीमद्गुरोरागमे
दण्ड्यो मे भविता स सर्वविभवध्वंसस्तु तस्यागतः ॥ १५१ ॥

श्रुत्वैवं सुगुरुप्रवेशमहसे चक्रुर्जना मण्डनं
धाम्नां हट्टततेरिवात्ममनसां द्रव्यव्ययाद्वर्णकैः ।
मातङ्गांश्च हयान् विशिष्टरचनान् कृत्वा नृपोऽभ्यागतः
पौरैर्निर्मलभूषणैः सममसौ तेषां पपात क्रमे ॥ १५२ ॥

पादाभ्यां नृपतिर्गुरोः पुर इव प्रेष्यश्चलन् भक्तितः
पुर्यां कारयति स्म दत्तविभवोऽर्थिभ्यः प्रवेशं तदा ।

श्राद्धानां हृदयेऽभवद्धरिकृतश्रीनेमिनाथागम-
प्रोद्दामोत्सवराजिराजितत्तरश्री**द्वारिका**पूःस्मृति ॥ १५३ ॥

तत्रार्हत्सदनेषु बिम्बनिवहं रूप्याश्मचामीकरा-
रब्धं सूरिवराः प्रणेमुरनिशं राजेभ्यवर्गान्विताः ।
व्याख्यान्ति स्म च जैनवाङ्मयरसं राजादिसभ्याग्रतो ।
राजस्त्रीभिरनेकयुक्तिरचनोद्यन्मौक्तिकस्वस्तिकाः ॥ १५४ ॥

स्थित्वा तत्र कियाद्दिनानि सुकृतप्राग्भारसंवर्द्धनं ।
कुर्वन्तः पुरतस्ततोऽथ चलिताः सूरीश्वराश्चर्यया ।
ग्रामोऽनेकपुराणि पावितमहीपीठानि नित्याक्रमा-
दुल्लङ्घ्याशु गताः सुसाधुकलिताः श्री**मेडताख्ये** पुरे ॥ १५५ ॥

श्रुत्वा तत्र भटालिसेवितपदः श्री**सादिमो** मुद्दल-
श्चक्रे सङ्घपुरस्कृतो हयगजैर्वीरैः सहाभ्यागतः ।
सूरीणां नगरप्रवेशमहसे सर्वार्थिसाल्लक्षशो-
वित्तानि स्वभुजार्जितानि रचयन् श्रीजैनमार्गोदयम् ॥ १५६ ॥

तेनेत्थं विविधोत्सवेन गुरवस्तत्र प्रवेश्यार्चिता-
स्तेषां शासनमात्ममूर्द्धनि धृतं जीवाऽवनाद्यं निजे ।
तत्र श्रीगुरुजातमत्सरभराः केचित् पुनर्लिङ्गिन-
स्तद्योग्योत्कटशिक्षया निजधिया कामं निषिद्धास्तदा ॥ १५७॥

तत्रार्हत्प्रतिमाप्रणामविधये श्रीसूरयः सोद्यमाः
सप्तक्षेत्रधनव्ययोत्थितफलं व्याख्यानयन्तोऽङ्गिनाम् ।
सम्यक्त्वं व्रतधारितां यतिपथं वा भद्रकान्तःस्थितिम्
केषाञ्चित् स्म ददत्यनन्तगुणिनः स्युर्यत्परार्थाग्रहाः ॥ १५८॥

स्थित्वा तत्र दिनद्वयं गुरुवराः शीघ्रं ततश्चारिणो
मार्गाऽतिक्रमणेन संयमियुताः सन्मार्गनिर्वाहकाः ।
**साङ्गानेरपुरे** गता धनजनानन्दप्रदा दुर्मति-
च्छेदैर्विश्रुतनामधेयमहिमव्याप्तान्तररीक्षोदराः ॥ १५९ ॥

**साङ्गानेर**पुरागमं यतिपते: शुश्राव दिल्लीपति:
**श्रीफत्तेपुर**सर्ववर्णनिकरं चाभ्यागमे प्राहिणोत् ।
श्राद्धास्तत्र सुखासनोत्तमगजाध्यारूढपुत्राङ्गना-
युक्तास्तच्चरणारविन्दनतये तावत्ततोऽभ्यागता: ॥ १६० ॥

श्राद्धास्तत्र नवाङ्गपूजनमिमे चक्रु: सुवर्णैस्तथा
सूरीशस्य यथा च तै: समुदितै: कोशो भवेद्भूपते: ।
एकस्तीर्थकरोपम: कलियुगे संसारदु:खार्त्तिहृ-
च्चेशायं किल पूज्यते तदिह क: स्यात्पूजनार्ह: पर: ॥ १६१ ॥

श्राद्धैर्लक्षमितैर्द्विलक्षगणितैश्चान्यैर्नरैर्दिल्लिराट्-
शिक्षातोऽत्र समागतै: परिवृताश्चेलुस्तत: सूरय: ।
श्रीमद्वीरजिनेन्द्रमन्त्रजपकास्तच्छासनोद्दीप्तये
भूपाकब्बरसंगमाय विहितोत्साहा: पवित्राशया: ॥ १६२ ॥

आयाता इह नाथ**हीरविजया**चार्या: सुशिष्यान्विता-
इत्थं स्थानकसिंहवाचिकमसौ श्रुत्वा नृपोऽकब्बर: ।
स्वं सैन्यं सकलं **फत्तेपुरपुराद्** गव्यूतषट्कान्तरा-
यातानामभिसम्मुखं यतिपतीनां प्राहिणोत् स्फीतियुक् ॥ १६३ ॥

पुत्रैरेव निजैस्त्रिभि: परिवृतस्तस्थौ नृप: पर्षदि
म्लेछा: काफर एष जात इति मा कुर्वन्तु हत्खेदिताम् ।
ध्यात्वैवेति न राज्यसंभवमदाद्यत्तादशानां तथा
सर्वेषामनुवर्त्तनं न च मद: स्वप्नेऽपि संपत्तिज: ॥ १६४ ॥

तत्सैन्यैर्हयहस्तिवीरपदिकैरावेष्टिता: सर्वत:
श्रीसूरिप्रवरास्तदीयवदनाम्भोजेक्षणप्रार्थिभि: ।
ब्रह्माण्डोदरपूरकारवभरेषूद्दामवाद्येष्विभ-
स्कन्धारूढसहस्रसंख्यमनुजाध्यास्फालितेषूच्चकै: ॥ १६५ ॥

श्राद्धीभिश्च पदे पदे निजकरप्रोच्छालितेषूल्लसन्-
मुक्ताराशिषु सर्वलोकवनितावर्गेण संनिर्मिते ।

रूप्यैर्न्युञ्छनकं विशिष्टवनिताक्लसेषु गीतेष्विह
प्राप्ताः **श्रीमदकब्बरौ**कसि तदा **फत्तेपुरान्त**:स्थिते ॥ १६६ ॥

॥ **युग्मम्** ॥

स्वौकोद्वारि समागतान् यतिपतीन् दृष्ट्वा नृपोऽकब्बरः
पुत्रैः स्वैः सममेव संभ्रमवशादुत्थाय सिंहासनात् ।
अभ्यागत्य ननाम तेन विधिना येनैष विज्ञैस्तदा
श्राद्धः प्राचि भवे बभूव मनसीत्याशङ्कितं तार्किकैः ॥ १६७ ॥

चङ्गा हो गुरुजीतिवाक्यचतुरो हस्ते निजे तत्करम्
कृत्वा सूरिवरान्निनाय सदनान्तर्वस्त्ररुद्धाङ्गणे ।
तावच्छ्रीगुरवस्तु पादकमलं नारोपयन्तस्तदा
वस्त्राणामुपरीति भूमिपविना पृष्टाः किमेतद् गुरो ! ॥ १६८ ॥

आहुः सूरिवरा नरेन्द्र ! वसनाधः कीटिकाद्यङ्गिनां
पीडा मत्क्रमजास्तु मेति हृदये धीः स्याद्यतेर्यत्नतः ।
नैतस्योपरि मुच्यते न मयका स्वं पादपद्मं जिनैः
सर्वत्रापि यतेर्विशेषयतना प्रोक्ता स्वकीयागमे ॥ १६९ ॥

सूरीणामितिवाक्यसंश्रवणतः श्रीपातिसाऽकब्बर-
स्तद्वस्त्रे स्वकरेण दूरविहितेऽधःकीटिकानिर्गमम् ।
दृष्ट्वा प्राप चमत्कृतिं गुरुगिरिप्रत्यक्षसंवादतः
सर्वज्ञागम एव शुद्ध इति चार्हच्छासनस्थां पुनः ॥ १७० ॥

शुद्धायां भुवि सञ्चरन्नथ नृपः सञ्चारयंस्तान् गुरून्
स्वस्वर्णासनसन्निधिं सुवचनैर्नीत्वाऽवदन्नातिमान् ।
अत्रैवोपदिशन्तु धार्मिकशिरश्चूडामणिस्वक्रम-
स्पर्शात्पावितमध्यमेतदपि च स्याद्धालवन्मे गुरो ! ॥ १७१ ॥

आहुः श्रीगुरवः सुवर्णरजतस्पर्शो न कल्प्यः सदा
भिक्षूणामिति भूपते ! ननु मया तत्रोपवेश्यं त्विह ।

इत्युक्त्वा नृपतेरवग्रहमहीदेशे पवित्रे स्थिता-
भास्वत्पण्डित**शान्तिचन्द्र**गणिराड्धन्यादिशिष्यान्विताः ॥ १७२ ॥

तेषां भूमिपतिः पुरः स्थित इति स्पष्टं जगौ शुद्धधी-
र्धर्मं मुक्तिकरं वदन्तु मम भोः ! निर्दम्भवाक्यैर्मुदा ।
यादृग् वाङ्मयसन्ततौ त्रिजगतीनाथेन सन्दर्शितो-
यादृक् संप्रति साधुभिश्च गृहिभिर्जैनैरनुष्ठीयते ॥ १७३ ॥

इत्युक्ते क्षितिपेन भिक्षुपतयः प्राहुर्जिनोक्तागम-
श्लोकोच्चारपुरस्सरं विशदया वाचा सुधासारया ।
धर्मं साधुगृहस्थयोग्यमसमैः सत्त्वाधिकैः पालितं
पाल्यं साम्प्रतबिन्दुमात्रमपि तं सिद्धिप्रदं शुद्धितः ॥ १७४ ॥

तद्धर्मश्रवणादनन्तरमसौ चक्रे परीक्षां नृपः
सूरीणां पुरतः सुवर्णनिभृतं स्थालत्रयं मुक्तवान् ।
द्रव्याऽमूल्यकवस्त्रराशिममुचद् गृह्णन्तु यच्छन्तु वा-
ऽन्येभ्यश्चेत्यवदद्विनीतवचनः श्रीपातिसाऽकब्बरः ॥ १७५ ॥

प्राहुः सूरिवरास्तपोधनततेः कल्प्यं न चामीकरं
द्रव्यं चान्यदपीह मोहजननात् संसारसंवर्द्धकम् ।
वस्त्रं चैतदपीशपिण्डकतया 'मूल्याऽतिरेकादपि
ग्राह्यं नैव परप्रदानविधयोऽन्यार्थस्य नो सङ्गताः ॥ १७६ ॥

इत्थं सूरिवरान् परीक्ष्य विविधोपायैर्महीनायक-
स्तद्युक्तिक्षमतां परीक्षितुमथ स्वैस्तार्किकैः पण्डितैः ।
सार्द्धं शास्त्रविचारसत्यसमयज्ञानाय सोऽवादय-
द्दक्षः शक्तियुतो दृढं हि कुरुते कार्यं जनश्लाघितम् ॥ १७७ ॥

तत्रैकेन समस्तभूपविबुधोत्तंसेन सूरीश्वराः
सार्द्धं जल्पमनल्पकल्परचितं कुर्वन्त्यनिन्द्यं स्म ते ।
भास्वत्पण्डित**शान्तिचन्द्र**गणयस्त्वन्यैः समग्रैः समं
दत्ताज्ञा गुरुभिर्नृपेण च समं शिष्या विनीता यतः ॥ १७८ ॥

ते सर्वे विबुधास्तदीयवचनैर्न्यायोपपन्नैश्चम-
त्कारं प्राप्तहृदो वदन्ति नृपतेः स्मेत्यग्रतस्तात्त्विकाः ।
नास्माभिर्नरनाथ ! सुश्रुतवरा एतादृशाः पण्डिता-
युक्तिक्षोदसहार्यमार्गरचनावक्तृत्वयुक्पालनाः ॥ १७९ ॥

इत्थं तैर्विहितस्तवं निजधियाऽऽचारं च तेषां नृपः
श्रुत्वा वीक्ष्य परीक्षणक्षममसौ निर्दूषणं रञ्जितः ।
सूरीणामिदमाह योजितकरद्वन्द्वः पतन्मस्तको-
भूपाः स्युर्ननु भृत्यकर्मनिपुणा यन्निःस्पृहाणां पुरः ॥ १८० ॥

तुष्टोऽहं भवतां विचारचतुराचारं पुनस्तार्किक-
श्रेणिश्लाघ्यविचक्षणत्वमसमं दृष्ट्वा गुणावर्जितः ।
भो श्रीसूरिवराः ! तदिष्टमनघं मत्तो ध्रुवं मार्गय-
न्तूक्तं यद्भवदागमे नृपहरिश्रीचक्रिभिः साधितम् ॥ १८१ ॥

इत्युक्ते क्षितिपेन हीरविजयाचार्या जगुर्भो नृप !
त्वत्पार्श्वेऽत्र यमर्थिभिर्गतभयैरस्माभिरभ्यर्थ्यते ।
गुप्तिक्षिप्तसमस्तबन्दिजनतामोक्षः पुनर्डाबरे
नो मत्स्यादिवधो न चागालितवाग्ग्राहस्तटाकोत्तमे ॥ १८२ ॥

प्राप्ते पर्युषणाख्यपर्वणि तथाऽमारिप्रघोषो दिनान्
यावत् सूर्यमितांस्त्वदीयसकले देशे त्वयाब्दं प्रति ।
कार्यश्चेति मदीप्सितं त्रयमिदं राज्याङ्कमुद्राङ्कितं
कामं दत्तवता न किं नरपते ! दत्तं त्वया सांप्रतम् ? ॥ १८३ ॥

इत्युक्ते यतिपुङ्गवैर्नरपतिस्तान् बन्दिलोकान् घनान्
गुप्त्यन्तश्चिरसञ्चितान् कृतमहामन्तून् मुमोच स्वयम् ।
यातस्तान्निजपादनत्यनुरतान् श्रीमद्गुरूणां क्रम-
द्वन्द्वे पातयति स्म चाशिषदिमान् श्रीहीरनामाक्षरान् ॥ १८४ ॥

मत्स्याद्यङ्गिगणावधं गलितवाग्ग्राहं समुद्दिश्य स
श्रीमड्डाबरनामकेऽग्रसरसि श्रीपातिसाऽकब्बरः ।

भृत्यैरुत्पटहं परेऽखिलजनज्ञानाय चाऽवादय-
त्तत्रैतद्विधिलोपकग्रहकृते छत्रं चरानादिशत् ॥ १८५ ॥

प्रत्यब्दं नृपतिः समागतमहापर्वण्यमारिक्रमः
कार्यो मद्विषयेष्विति स्वलिखितं दत्ते स्म सङ्घाय सः ।
यावद्द्वाशवासरानथ महापर्वागमे तादृशं
तत्सर्वत्र तदर्थमेति सचरं तत्साधकं वर्त्तते ॥ १८६ ॥

एवं श्रीगुरुमार्गितं नरपतिर्वस्तुत्रयं दत्तवान्
सन्तः प्रार्थितदायका इति वचस्तेनैव सत्यं कृतम् ।
धन्यास्ते गुरवो यदीयवचनं भूमौ मनाग्नापत-
द्धन्योऽसावपि यत्पुरो गुरुवरा जातास्तदभ्यर्थकाः ॥ १८७ ॥

श्राद्धोपाश्रयभूमिपावनकृते तेनैव भूस्वामिना
दत्ताज्ञा अथ सूरि**हीरविजया** राजाङ्गणादुत्थिताः ।
तन्नुत्रैः कविराजतार्किकगणैर्वीरैरमात्यैः पुर-
श्रेष्ठैश्चानुगतास्तदीयसदनद्वाराद्बहिर्निर्गताः ॥ १८८ ॥

तावत्पादचरोऽनुगः क्षितिपतिः पादौ प्रणम्य स्थितः
स्वौकोद्वारि समस्तसैनिकजनांस्तेषामनुप्राहिणोत् ।
वाद्यानीभशिरःस्थयोग्यपुरुषाध्यांस्फालितान्युच्चकैः
सूरीणां पुरतश्चकार च रथाश्वेभादिकां स्वश्रियम् ॥ १८९ ॥

एवं भूपतिकारितेन महता ह्याडम्बरेणाथ ते
सूरीशा नगरे चतुष्पथपथान्तःसञ्चरन्तस्तदा ।
शङ्कां तीर्थकरागमस्य हृदये केषां न चक्रुस्तथा
प्रेम्णे तीर्थकरा इवाधिकधियां चासन् गुणैर्निर्मलैः ॥ १९० ॥

श्राद्धास्तत्र पदे पदेऽथ मुमुचुर्वस्त्राणि सौवर्णिकान्
सूरीणां जगृहुश्च याचकजनास्तेषां गुणाभाषिणः ।
श्राद्धीभिर्वरमौक्तिकैर्मणिगणैर्वर्द्धापनार्थं तदा
नुन्नैः पाणियुगेन वारिनिधिवत्तद्भूतलं व्यानशे ॥ १९१ ॥

आयाता अथ सूरयो यतियुता योग्ये पवित्राश्रये
श्लोकं धार्मिकमेकमाप्तवचनं व्याख्यान्ति ते स्माऽनघम् ।
ब्रह्माऽयं किमिहागतः शुचितरं धर्मं पुरस्ताच्चतु-
र्वर्णानामुपदेष्टुमेवमखिलाश्चक्रुर्द्विजाः शङ्कितम् ॥ १९२॥

तत्र स्वस्तिकलक्षमक्षतगणाकीर्णं धनिस्त्रीकृता-
नेकन्युञ्छनवित्तकोटिरभवच्छ्री**स्थानसिंहा**दिकैः ।
इभ्यै रूप्यसुवर्णनव्यवसनत्यागेन कोटिव्यया-
द्देश्यो मार्गणसञ्चयः परमहीजातोऽपि सन्तोषितः ॥ १९३॥

कश्चिद्भट्टकविः कवित्वमतुलं नव्यं विधायोच्चकैः
सूरीणां पुरतोऽवदच्च भवतां स्तोत्रेण लक्षं धनम् ।
लप्स्ये मत्तमतङ्गजं यदि भवद्भक्तैकसभ्येभ्यत-
स्तर्हि श्रीगुरुनायकान् क्षितितले श्रीधर्मराजान् ब्रुवे ॥ १९४॥

श्रुत्वा तद्वचनं गुरून्नतिकृते श्राद्ध सदारङ्गकः
सान्वर्थो गजराजयुक्तमखिलं तस्मै धनं दत्तवान् ।
एवं श्रीगुरुराजहीरविजयाचार्यस्तवाधायिनः
के के तत्र महार्थपात्रमभवन्नो मार्गणाः पण्डिताः ॥ १९५॥

तस्मिन् वर्षचतुष्टयं नरवरस्यासन्नदेशे स्थिताः
सूरीशा नृपपुङ्गवेन विविधोपायज्ञविज्ञैर्निजैः ।
रात्रावह्नि परीक्षिताः स्वयमपि च्छन्नं कृतश्रावका-
नेकास्तिक्यसुलक्षणेन विशदप्रज्ञेन शुद्ध्यर्थिना ॥ १९६॥

शुद्धाः सर्वपरीक्षणैर्गुरुवरा ज्ञात्वेति पृथ्वीपतिः
सभ्यानां पुरतः स्वपर्षदि गुणांस्तेषां स्वधीशोधितान् ।
उक्त्वा सर्वयतीशहीरविजयाख्यानामदाद् भक्तितः
स्वैर्वाक्यैर्बिरुदं जगद्गुरुरिति स्पष्टं महःपूर्वकम् ॥ १९७॥

सूरीणां करतोऽथ शान्तिविबुधस्यादापयत्तार्किक-
श्रेष्ठत्वादिगुणैश्चमत्कृतमनाः श्रीवाचकाख्यं पदम् ।

सद्यः **स्थानकसिंह**मुख्यसकलश्राद्धास्तदात्युत्सवं
चक्रुः श्रीमति वित्तकोटिकलिताः **फत्तेपुरे** सर्वतः ॥ १९८॥

अन्येद्युर्नरनाथहस्तलिखितं लात्वा त्रिलोकीगुरोः
शिष्याः श्रीगुरुमान्य**धन्यविजयास्तद्**भृत्यसंसेविताः ।
**सूरत्यादि**षु मुद्गलाश्रितजिनौकःसाधुसद्मव्रजं
तन्मुक्तं जिनबिम्बसाधुकलितं श्राद्धैस्तदाऽकारयन् ॥ १९९॥

एवं श्रीगुरुहीर**हीरविजया**चार्यान्नृपा**ऽकब्बरे**-
णात्यन्तं रचितस्तुतीन् कृतमहापूजान् पुनः सत्कृतान् ।
आयातानथ गौर्जरे क्षितितले श्रुत्वा **पुरान्मङ्गलात्**
स्तौतीत्थं शिशु**पद्मसागरकविः** प्रेम्णा विवेकान्वितः ॥ २००॥

नत्वा सत्त्वनिधत्ततत्त्वचरितं **श्रीपार्श्वनाथं** जिनं
स्तौमि श्रीनिधिमूर्त्ति**हीरविजयं** भट्टारकाग्रेसरम् ।
यस्य स्तोत्रधनुष्यसंख्यविदुषामासेदुषां शेमुषी-
बाणाली गुणसंस्थिताऽपि भुवने व्याप्ता न कैः श्लाघ्यते ॥ २०१॥

श्लाघ्या ते मुनिराज ! कस्य वदने चिह्वेव नो विद्यते
विद्या साऽपि न काऽस्ति देव ! तव या जिह्वान्तमासेदुषी ।
सन्ति त्वय्यनघाः पवित्रितदिशः सम्यग्गुणाश्चापरे
मत्वेतीव समस्तगच्छजनता त्वां स्वामिनं मन्यते ॥ २०२॥

सोमत्वं तव निष्कलङ्कमतुलं नित्यप्रसारैः करै-
र्मन्ये व्योम्नि समेत्य शीतकिरणो जात्यार्थिवद्याचते ।
आदित्यस्तु तव प्रतापमचलं विश्वत्रयव्यापिनं
तेन त्वत्पुरतो न कः क्षितितले सञ्जायते याचकः ॥ २०३॥

सूर्याचन्द्रमसौ गुणान्तममलं ते वीक्षितुं नायक !
स्रष्ट्रा व्योमतलाध्वशीघ्रतरगौ दूताविव प्रेषितौ ।
अप्राप्येव तदन्तमम्बुधितले खिन्नोऽविशद्भानुमान्
श्यामास्यः पुनरागतः शशधरो रात्रौ कलङ्कच्छलात् ॥ २०४॥

स्रष्टाऽथ स्वयमेव निर्मितगतिर्व्योम्नीव ताराच्छलात्
स्वामिंस्त्वद्गुणसंग्रहं निशि करोत्याक्षेपवान् सर्वदा ।
तद्यत्नाय दिवा तु निश्चलमतिर्भूत्वेव तिग्मच्छवि-
स्तिष्ठत्येष यतः सतां मतिरियं सद्वस्तुनः पालने ॥ २०५॥

मूर्त्तिस्ते जिनमूर्त्तिवत्कलियुगे दुष्कल्मषध्वंसिनी
शान्तैः कान्तमनोभिरीहितहितैश्चित्ते निजे न्यस्यते ।
दुष्टैः कैश्चिदुपेक्ष्यतेऽथ तव न द्वेषो न चोल्लासिता
शीतांशोरमृते दुरम्बुनि समः किं नो भवेत्सङ्क्रमः ? ॥ २०६॥

देव ! त्वद्गुणसन्ततिर्गुणिजनैर्न्यस्ता निजे मानसे
चित्रावल्लिरिव प्रवृद्धिजनिकाऽभूत्तद्गुणानां जने ।
दोषासक्तैरथ दूरिताऽद्भुतमिदं तद्दोषसंवर्द्धिनी
यद्वा नाऽद्भुतमेतदुग्रमनसामुग्रा प्रवृत्तिर्भवेत् ॥ २०७॥

श्रीवीरस्य शिवङ्गतस्य विरहे दुःखार्दितप्राणिनां
दुःखध्वंसकृते कलाविव विधिस्तत्तुल्यहीरं व्यधात् ।
तस्यैवास्य भवेद्यदीयहृदयेऽभेदप्रतीतिः परा
श्रेयःश्रीः करपङ्कजे स्थितवती कुर्याच्च तं तन्निभम् ॥ २०८॥

स्वस्त्यऽर्काय तमोभिदे भगवते लोकप्रकाशात्मने
विश्वायाघनदानतो ह्यवसरे वृत्तिं परां तन्वते ।
जाड्यच्छेदपराय दूरगजनोत्तापाय शस्तोदये
भूदेवैर्विहितार्चनाय भवते भूयात् स्फुरद्रोचिषे ॥ २०९॥

लोकोन्मार्गनिदर्शनोद्भवमिव स्वागः स्मरन् लौकिकः
शंभुस्त्व्युदिते श्रुते मुनिपते ! नश्यन् सुनीत्यद्भुते ।
भारं मूर्ध्नि विमृश्य शीतकिरणं यं पुष्करे मुक्तवान्
सोऽयं प्रभ्रमतीव सार्थपतिना मुक्तो गलिर्गौः पथे ॥ २१०॥

कुर्वाणस्तव दर्शनं नयनयोर्लोकोऽनिमेषोऽभवत्
त्वद्भाषाश्रवणाद्विवेकविकलोऽप्यासीद्विवेकान्वितः ।

त्वत्पादाब्जनमस्कृतेर्मुनिपते ! निःस्वोऽपि सस्वोऽभव-
न्माहात्म्यं ननु कस्य मानसमिदं नो रञ्जयत्यद्भुतम् ॥ २११॥

व्याप्तस्य प्रकटं त्रिलोकमपि ते स्वामिन् ! प्रतापोज्ज्वल-
द्वह्नेर्व्योम्नि गतेषु तारकमिषात्तारं स्फुलिङ्गेष्वहो ।
मन्ये दाहभयेन रात्रिसमये नोदेति भासांपति-
र्वीरोऽप्युत्कटशक्तिमत्यपबलोऽदृश्यो भवेदागते ॥ २१२॥

मत्वैकं सुभटं त्रिलोकविकटं श्रीनन्दनं भस्मसा-
च्चक्रे ते मुनिराट् ! प्रतापहुतभुग् दुःसाध्यतेजा असौ ।
तस्मादप्यधिकस्य नेत्रकपटाद्भालं स्वयं भिन्नवान्
गौरीशस्य ततस्त्रिलोचनतयैवाख्याऽभवद्भूतले ॥ २१३॥

ये श्रीवीरजिनेन्द्रशासनमिदं विस्तारयन्तः क्षिता-
वंभोदा इव दुग्धसिन्धुसलिलं प्राप्तास्ततोऽप्युन्नतिम् ।
केषां नो रुचये भवन्ति गुरुताश्रद्धानपूतात्मनां
कामं काङ्क्षितदर्शना घनजनैर्जाग्रत्प्रभावाः कलौ ॥ २१४॥

यान्नूनं प्रणमन्ति मानवगणाः सम्यग्गुरुत्वाशया-
निर्णीयाऽपरगच्छनायकगणे सम्यग्गुरुत्वक्षयम् ।
प्रत्यूषे शशलाञ्छनादिनिकरे दृष्ट्वा प्रकाशक्षयं
मार्त्तण्डं किमु नार्चयन्ति दिवसाधीशत्वसम्भावनात् ॥ २१५॥

यैश्चक्रे कृतिनां मतिः शुभतरा श्रद्धानपूतात्मनां
श्रीमद्वीरजिनेन्द्रशासनतरोर्भास्वत्फलास्वादने ।
उच्छेद्यापरतीर्थमोहमदनद्रून्मादनिष्णाततां
यद्वैद्यान्निपुणात्र कः प्रकुरुते पथ्यादनं शुद्धधीः ॥ २१६॥

येभ्योऽयं गुणिपूरितस्तपगणः प्राप्नोत्युदग्रं यश-
स्तेजोजात्यमणेर्यतोऽधिकतरं हारोऽपि मुक्तान्वितः ।
येभ्यश्चेह परत्र मङ्गलधिया के के नमस्यन्ति न
प्राप्तं केन यतोऽमृतं क्षितितले नास्वाद्यते धीमता ॥ २१७॥

येभ्यो नश्यति शासनं हरिहरब्रह्मादिदेवोदितं
ध्वान्तं तिग्मकरादिवाधिकतमं रात्रिप्रभावोदितम् ।
येभ्यश्चापि चकास्ति शासनमिदं स्याद्वादवादाङ्कितं
व्योमेवोष्णकरान् मनुष्यनिकरावस्थानमूर्द्धस्थितम् ॥ २१८ ॥

येषां प्राप्य पवित्रदक्षिणकरस्पर्शं निजे मस्तके
जायन्तेऽतिनिकृष्टवृत्तय इमेऽप्युत्कृष्टशिष्टश्रियः ।
स्वर्णत्वं किमु नाश्रयन्ति भुवने लोहानि योगीशितु-
र्लब्ध्वा शुद्धरसान्वयं यत इह स्याद्रङ्गितासङ्गतः ॥ २१९ ॥

संक्रान्ता बत येषु निर्मलगुणाः ख्यातिं लभन्तेतरां
शीतांशोरिव चन्द्रकान्तिमणिषु ज्योत्स्नाः सुधासङ्गतिम् ।
येषु स्वामिषु सत्सु भारतमिदं विभ्राजते सर्वतः
श्री**सीमन्धर**तीर्थनेतरि यथा क्षेत्रं **विदेहा**ऽभिधम् ॥ २२० ॥

तेषां सद्वचनानि शुद्धरचनान्याकर्ण्य विद्वज्जना-
जानन्तीति कलावपीह **भरते** किं तीर्थनाथागमः ? ।
किंवा गच्छभृदागमः परकृते क्षेत्राद्विदेहाभिधात्
स्वर्गाद्वा धिषणागमः किमथवा शुक्रागमो भूतलात् ॥ २२१ ॥

स्वामिंस्त्वच्चरणे पतन्ति विमलात्मानो जनाः केवलं
ये ते स्युर्भुवि भूरिमूर्द्धमणयश्चित्रं समानोदयाः ।
श्रुत्वा ख्यातिमिमां तवेश ! विशदां भाग्याधिलब्धर्द्धयः
के के न भ्रमरीभवन्ति चरणाम्भोजे सदास्वादिनि ॥ २२२ ॥

नाथ ! त्वद्वदनोपमानमनघं दत्तं कवीशैः शशी
आसाद्येव हरस्य मूर्द्ध्नि वसतिं लेभे कलाभ्युन्नतः
त्वद्वाणीसमतामवाप्य वसुधा मन्येऽभवन्नाकिनां
भोग्या योग्यतया हि वस्तुनि न कः स्यादुद्यतः शुद्धधीः ॥ २२३ ॥

दृष्टं त्वद्वदनं गणेश ! गुणिनां दोषापहं सर्वदा
चान्द्रं मण्डलमन्यथेति विबुधैः किं गीयते तत्समम् ? ।

एषा मे वचनीयता क्षितितले माभूदितीवैणभृ-
च्छम्भोर्मूर्ध्नि तपस्तनोत्यतनुकं गङ्गातटे निर्मले ॥ २२४॥

पीत्वा त्वद्वचनं मनुष्यनिकरः सुस्थः समाध्युद्भवा-
देवानां निकरस्तु तत्समसुधां तृप्तस्तथा चाभवत् ।
त्वं त्वेवं भुवनोपकारकरणेनैवाऽसि तृप्तः सदा
त्वामेवं विबुधाः स्तुवन्ति गुणिषु प्राप्तैकरेखं समम् ॥ २२५॥

त्वत्कण्ठोपमितिं मुनीश्वर ! समासाद्येव कम्बुर्वरः
कृष्णस्याऽपि जयप्रदाननिपुणः संजायते मङ्गलम् ।
तत्रत्यां स्वरसारतां बुधजनाः पीत्वेव तृप्ता इदं
भाषन्तेऽमृतपूर्णपूर्णकलशः किं वेधसाऽयं कृतः ? ॥ २२६॥

विद्याभिस्तव गच्छनाथ ! हृदयं सर्वाभिरप्याश्रितं
क्षीराम्भोधिरिवाऽमलाभिरमलं स्रोतस्विनीभिः श्रिये ।
तज्जानेऽजनि सर्वतः पृथुतरं तद्वासदानाय यत्
सन्तः स्युर्वसतिप्रदानमतयः स्वैकाश्रयप्राणिनाम् ॥ २२७॥

देव ! त्वद्भुजयामलं मतिमतां दृग्मार्गमभ्यागतं
हृद्येवं विदधाति तर्कमिह किं धात्रा समर्थाविमौ ? ।
सृष्टौ मूर्द्धनि दुष्प्रहारविधये दण्डौ त्रिलोकोद्भव-
स्यानङ्गस्य महाभटस्य परमस्थाम्नाऽधिकत्वस्पृशा ॥ २२८॥

त्वत्कोष्ठे जलधाविवाऽतिगहने सिद्धान्तरत्नान्यहो !
तिष्ठन्ति प्रकटानि नायक ! तथा तस्थुर्यथा निर्मले ।
श्रीसौधर्मगणेशमुख्यसकलाचार्योदरे तद्बुधा-
मत्वेतीव वदन्ति तत्तदनुगं त्वां ख्यातविद्यागुणम् ॥ २२९॥

उत्सङ्गस्तव देव ! देववनितातुल्याङ्गनालिङ्गन-
त्यागी शैशवजातितोऽपि विबुधाधीशोऽस्ति मन्ये ततः ।

साधुत्वे सदृशेऽपि देववनितोत्सङ्गा वशिष्ठादिका-
लज्जातो मुनयो गताः क्वचिदहो ! निर्मानुषे कानने ॥ २३० ॥

देवोरुद्वयमद्भुतं तव सदारम्भाफलाभ्यन्तर-
स्पर्शं नैव कदाचिदद्भुततरं पस्पर्श नारीतलम् ।
मत्वेतीव सुवृत्तजानुमिषतः सद्वृत्तकोशं न्यधा-
द्धाता तत्र ततस्तपोगणपते ! सद्वृत्तता ते मता ॥ २३१ ॥

मत्वेतीव विधिश्चकार विशदच्छत्रादिचिह्नाङ्कितौ ।
सर्वोद्ध्वर्थिविशेषसंगमवशात्तत्रोद्ध्वरेखां व्यधा-
देवं त्वां स्तवनं नयन्ति विबुधाः *श्रीहीरभट्टारक* ! ॥ २३२ ॥

**मङ्गलाख्ये** पुरे मोदादेवं काव्यं जगद्गुरोः ।
चकार स्वसिद्ध्यर्थं पण्डितः **पद्मसागरः** ॥ २३३ ॥

**इति महोपाध्यायश्रीधर्मसागरगणिपण्डितोत्तंस-**
**श्रीविमलसागरगणिशिष्य पं. पद्मसागरगणिविरचितं**
**जगद्गुरुकाव्यं संपूर्णम् ।**
**लिखितं मङ्गलपुरे संवत् १६४६ वर्षे**
**द्वितीयाभाद्रपदसित ११ दिने ॥**

८

जगद्गुरु-भट्टारक-आचार्यश्री

# हीरविजयसूरीश्वरसंक्षिप्तजीवनचरितम्

।। मङ्गलाचरणम् ।।

वीरः सर्वसुरासुरेन्द्रमहितो, वीरं बुधाः संश्रिताः,
वीरेणाभिहतः स्वकर्मनिचयो, वीराय नित्यं नमः ॥
वीरात्तीर्थमिदं प्रवृत्तमतुलं, वीरस्य घोरं तपो,
वीरे श्रीघृतिकीर्तिकान्तिनिचयः, श्रीवीर ! भद्रं दिश ॥ १ ॥

एकादशाऽऽसन् गणधारिधुर्याः, श्रीइन्द्रभूतिप्रमुखा अमुष्य ।
आर्योपयामे पुनराप्तमूर्तिं, रुद्राः स्मरं हन्तुमिवेहमानाः ॥ २ ॥

आसीत्सुधर्मा गणभृत्सु तेषु श्रीवर्धमानप्रभुपट्टधुर्यः ।
विहाय विश्वे सुरभीतनुजं, कः स्यात् परोधुर्यपदावलम्बी ॥ ३ ॥

यशः श्रियाऽधःकृतकुन्दकम्बुजम्बुकुमारोऽजनि तस्य पट्टे ।
लघीरपि स्वस्य यतोऽभि भूतिं, पश्यन् ह्रियाद्दृश्य इव स्मरोऽभूत् ॥ ४ ॥

अभूत्पट्टे तस्यास्खलित विजयो **हीरविजयो**,
गुरुर्वृन्दारौघप्रथितमहिमाऽत्रापि समये ।
सुरत्राणो बुद्धो ह्यकबर नृपो यस्य वचसा,
घृणा ध्यानं ध्यायन् व्यतनुत महीमार्हतमयीम् ॥ ५ ॥

**॥ श्रीगुर्जरदेशे तारंगगिरिप्रमुखतीर्थानि वर्तन्ते ॥**

यत्तुङ्गतारङ्गगिरौ गिरीशशलोपमे कोटिशिला समस्ति ।
स्वयंवरोर्वीव शिवाम्बुजाक्षी पाणिग्रहे कोटिमुनीश्वराणाम् ॥ ६ ॥

देशे पुनस्तत्र समस्ति शंखेश्वरोऽन्तिक-स्थायुक-नागनाथः ।
धात्रा धरित्र्यां जगदिष्टसिद्ध्यै मेरोरिवादाय- सुरद्रुरुप्तः ॥ ७ ॥

विद्याधरेन्द्रौ विनमिर्नमिश्च, यद् बिम्बमभ्यर्चयतः स्म पूर्वम् ।
स्वर्गे ततोऽपूजि बिडौजसा यत्स्वधाम्नि एव स्पृहयेव सिद्धेः ॥ ८॥

तत्रापि च स्फूर्तिमियर्त्यपूर्वां, श्रीस्तम्भने स्तम्भनपार्श्वदेवः ।
व्यध्वसि धन्वन्तरिणेव येन, कुष्ठोपतापोऽभयदेव सूरेः ॥ ९॥

**श्री हीरसूरीश्वरस्य पालनपुरे झवेरी गृहे प्रादुर्भावः**

विख्याते गुर्जरे प्रान्ते झवेरीवृन्दपूरिते ।
पालनाख्यापुरे रम्ये वणिजः शोभने गृहे ॥ १॥

**हीरो** हीरमिवोत्पन्नः सप्तदशवियुक्तषो-
डश शततमे वर्षे (१५८३) माग शुक्लदले तिथौ ॥ २॥

नवम्यां शोभने काले कान्त्या चन्द्रसमः पुमान् ।
कुलस्य दीपको नित्यं वीरधर्मप्रचारकः ॥ ३॥

**त्रिभिर्विशेषकम्**

**॥ सूरीश्वरस्य नामकरणम् ॥**

वीरधर्मं सदा रक्षन् कुराशा जनको महान् ।
माता नाथी महादेवी नित्यं गुरुपदानुगा ॥ ४॥

चक्राते स्वशिशोराख्यां **हीरजी**ति शुभप्रदाम् ।
ववृधे चन्द्र वत्सोऽति पित्रोर्हर्षप्रदायकः ॥ ५॥ युग्मम्,

**॥ सूरेः मातापित्रोः स्वर्गवासः ॥**

सप्तसु भ्रातृवर्गेषु हीरजी भाग्यवान् खलु ।
पूर्वपुण्योदयाज्जातो वीतरागेऽनुरागवान् ॥ ६॥

वर्षे त्रयोदशे तस्य पितरौ तु दिवं गतौ ।
तदा बन्धन मुक्तोऽसौ पत्तनं प्रत्यगात्मुदा ॥ ७॥

**श्री हीरजी महोदयस्य सद्गुरु समागमः ।**

गुर्जरदेशमूर्धन्यं पत्तनं प्रोच्यते बुधः ।
तत्र सद्गुरुभिर्नित्यं वीरधर्मः प्रकाश्यते ॥ ८॥

दानसूरेर्हि व्याख्याने श्रोतृणां मुह्यते मनः ।
तस्योपदेशतो नूनं हीरस्य विमलं मनः ॥ ९ ॥

॥ श्री हीरजी भाविकस्य वैराग्यभावना ॥

दीक्षां ग्रहाय निश्चिक्ये दानसूरे गुरोर्मुदा ।
महावीरस्य सन्मार्गे प्रतस्थे निजतेजसा ॥ १० ॥

महामहोत्सवाद् धीरः षण्णवति युते मुदा ।
पञ्चदशशते वर्षे (१५९६) दीक्षां जग्राह कार्तिके ॥ ११ ॥

॥ हीरजी दीक्षामहोत्सवो दीक्षानामकरणं च ॥

दानसूरिगुरुश्चके हीर हर्षाभिधं मुनेः ।
तदा सम्बन्धिमित्रैश्च पत्तनस्थैर्जनैर्मुदा ॥ १२ ॥

चक्रे महोत्सवो नूनं दृष्ट्वा देवा मुदं गताः ।
स्थितानां तत्र जन्तूनामवक्तव्यो मुदोऽभवत् ॥ १३ ॥

॥ शास्त्राध्ययनाय हीरहर्षस्य देवगिरिं प्रति प्रयाणम् ॥

अध्येतुं न्यायशास्त्राणि हीरो देवगिरिं गतः ।
धर्मसागरमुनिस्तेन सहासीत् विमलोऽनघः ॥ १४ ॥

तत्र देवगिरौ देवी जशमा सपर्तिमुदा ।
प्रबन्धं सर्ववस्तुनां चकार मुनये हितम् ॥ १५ ॥

॥ श्री हीरहर्षस्य पण्डितपदवी ॥

न्यायचिन्तामणिर्ग्रन्थान् सर्वसोऽधितवान् सुखम् ।
ज्ञानदीपावलिर्जज्ञे हृदि तस्य गुरुर्महान् ॥ १६ ॥

पण्डितपदवीं तस्मै दत्तवान् योग्यता वशात् ।
सप्तदश सताब्धादौ (१६०७) धर्मधीरभवच्छुभा ॥ १७ ॥

॥ उपाध्यायपदवी ॥

दानसूरिकृपालेशात् अष्टोतरे तु षोडश-
शते (१६०८) मार्गसिते नागे (पचमी संघस्य सन्निधौ गुरुः ॥ १८ ॥

उपाध्यायस्य पदवीं, परीक्षां तु परीक्षकः ।
विधाय विधिवत्प्राज्ञः, ददौ तां हीरस्वामिने ॥ १९ ॥

**॥ सिरोहीनगरे आचार्यपदमहोत्सवः ॥**

मरुभूम्यां सिरोही रा-जधान्याः नगरं महत् ।
तस्य सधर्मकार्यात्तु प्रशस्या धर्मभावना ॥ २० ॥

पौषे शुक्ले तु पञ्चम्यां, दशोत्तरे तु षोडश-
शतके (१६१०) हीरहर्षाया-चार्यपदमदाद् गुरुः ॥ २१ ॥

**श्री हीरसूरीश्वरस्य भट्टारकपदवी ॥**

पत्तने हीरहर्षस्य पाटोत्सवोऽभवत् महान् ।
तादृशो नाभवत् क्वापि. संघेन यादृशः कृतः ॥ २२ ॥

संघेन तूत्सवं चक्रे, देवानंदकरो महान् ।
भट्टारकपदं तस्मै, दानसूरिर्ददौ मुदा ॥ २३ ॥

**॥ सूरीश्वरस्य गुरोः स्वर्गवासः ॥**

विहरन् प्रतिदेश स, द्वादशाब्दावधिं गतः ।
सर्वत्रोपदिशन् धर्मं, वीरमार्गमपालयत् ॥ २४ ॥

विचित्रकर्मणो योगात्, वडाल्यां व्यरमद् गुरुः ।
दानसूरौ दिवं याते, संघः शोकमवाप्तवान् ॥ २५ ॥

वैशाखे सितद्वादश्यां, द्वाविंशत्यधिके गुरुः ।
षोडशशतके (१६२२) काल-धर्म प्राप्तः सुनिश्चितम् ॥ २६ ॥

गुरोः श्रद्धाञ्जलिं दत्वा, संघोऽकार्षीत् महोत्सवं ।
प्रतापाद् हीरसूरेस्तु, धर्माज्ञां शिरसाऽवहत् ॥ २७ ॥

**॥ सूरीश्वरस्य प्रभावात् नष्टापदः ॥**

शताब्दी षोडशी भूता, विपदां सहचारिणी ।
तथाऽराजकता जाता, सर्वत्र भारते भुवि ॥ २८ ॥

भारताऽपेक्षया देशे, गुर्जरे विदशाऽभवत् ।
स्थले स्थले च सन्मानं, प्राप्नुवन् सुमनोहरम् ॥ २९ ॥

हीरसूरीश्वरो धीमान् खंभाते सुखमागमत् ।
वचनसिद्धितो वर्धमाने पराक्रमे महान् ॥ ३० ॥

उपद्रवः समुत्पन्नः, महतां खेदकारकः ।
वरेण रत्नपालस्य, सुपुत्रेच्छामपूरयत् ॥ ३१ ॥

वचनपालन प्रेषान्तः, सूरो निग्रहोऽभवत् ।
बोरसदे पुरेऽव्राजीत्, त्रिंशदधिकषोडशे (१६३०) ॥ ३२ ॥

शतके हीरसूरिस्तु, जगमालेन गच्छतः ।
बहिष्कृतस्ततः पेट-लादं गत्वा निरोधतः ॥ ३३ ॥

**पत्रं निष्कासितं किन्तु, सूरे र्नाभूत् क्षतिस्तथा ।**
निर्भयो जायते लोके, पुमान् धर्मस्य रक्षणात् ॥ ३४ ॥ (सप्तभिः कुलकम्)

**॥ आपत्तावपि सूरेर्धर्मदृढता ॥**

कुणधेर पुरे जातः, चतुस्त्रिंशोत्तरे महान् ।
षोडशशतके (१६३४) नित्यं, वन्दनस्य कलिर्मुधा ॥ ३५ ॥

आपत्तेरागतत्वेऽपि, मनो न चलित गुरोः ।
अमदावादपुर्यां तु, षट्त्रिंशे षोडशे (१६३६) गुरुः ॥ ३६ ॥

**हीरसूरी**श्वरो धीमान् आगतो मुनिभिर्युतः ।
पुनर्निरोधपत्रस्य, निर्गतत्वेऽपि शत्रवः ॥ ३७ ॥

नाप्नुवन् हि फलं किञ्चित्, धर्मो रक्षति रक्षितः ।
धर्मस्य रक्षणे तस्मिन् आपत्तिः पतिता बहु ॥ ३८ ॥

संकट दुःसहं प्राप्य, मान्यतां नात्यजम् गुरुः ।
वीरशासनवीरोऽसौ, व्यजैष्ट गुरुधर्मतः ॥ ३९ ॥

आपत्तिः सकला नष्टा, सूरिः बोरसदे पुरे ।
सप्तत्रिंशोत्तरे वर्षे, षोडशशतके पुनः ॥ ४० ॥

समागत्य चतुर्मास्या,-मकार्षीत् सुखपूर्वकम् ।
निमंत्रणं च संप्राप्तं, त्वष्टात्रिंशे च षोडशे ॥ ४१ ॥

पुनर्गुरुस्तु खंभाते प्रत्यगात् सुखमानसः ।
चन्द्रप्रभं प्रतिष्ठाप्य, पूर्णोदयस्य भावना ॥ ४२ ॥

गुर्जरे तीर्थभूते तु गंधारे नगरे गुरुः ।
कृतवान् हि चतुर्मास्यां, **हीरो** धर्मधुरन्धरः ॥ ४३ ॥

विकासं वीरधर्मस्य कुर्वतः प्रभुता भृशम् ।
प्रशस्यते प्रतिस्थानं जनैर्निश्चलमानसैः ॥ ४४ ॥

कालक्रमात् समायातो दिल्लीराज्यासने शुभे ।
अकबरेति विख्यातः प्रजानां हितकारकः ॥ ४५ ॥

श्रुता तेन प्रशंसा तु हीरसूरेः मुहुर्मुहुः ।
अहोहीरो महाधन्यः कीर्तिर्यस्य हि विश्रुता ॥ ४६ ॥

**॥ सम्राजाऽकबरेण श्रुतसूरिप्रशंसा ॥**

अट्टालिकोपविष्टस्य पश्यतोऽकबरस्य तु ।
तपस्यन्त्यास्तु चंपायाः वराश्वो निःसृतः पथि ॥ ४७ ॥

सुवाद्यं शृण्वता राज्ञो-त्कण्ठया शोधितं जनैः ।
श्रुत्वा हीरप्रभावन्तु संगमायाऽऽतुरो नृपः ॥ ४८ ॥

अकबरोऽविलम्बेन मार्गं शोधितवान् धिया ।
गुणिनस्तु प्रपूज्यन्ते सर्वे सर्वत्र सर्वदा ॥ ४९ ॥

**॥ सम्राजा निमन्त्रितः सूरिः ॥**

आग्रासंघेन सार्धं तु राज्ञा सूरिर्निमन्त्रितः ।
संघान्तिकेतु स्वीचक्रे सूरिरुत्साहचेतसा ॥ ५० ॥

नवत्रिषट्चन्द्र वर्षे (१६३९) मार्गासितनगे तिथौ ।
त्रिचन्द्रमुनिभिः सार्द्धमुत्तरस्यां तु वै मुदा ॥ ५१॥

हीरो गन्धारतो कामं विजहार गुरुर्महान् ।
स्थाने स्थाने तु विश्राम्यन् गुरुस्तु गतवान् मुदा ॥ ५२॥

सीक्रीफतेहपुर्यां तु भृशमुत्साहपूरितः ।
द्वादश्यां ज्येष्ठकृष्णे तु प्रविष्टो नगरे गुरुः ॥ ५३॥

संघेन स्वर्णपुष्पैश्च संवर्धापनिका कृता ।
वन्दमान प्रजावर्गैः ददौ मानं तु सूरये ॥ ५४॥

॥ सूरीश्वरसम्राजोर्मिलनम् ॥

त्रयोदशयान्तु शाहेना-मिलत् सूरिः सुखप्रदः ।
अबुलफजलं नीत्वा शान्तमूर्त्तिस्तपोधनः ॥ ५५॥

दिव्यरूपं गुरुं दृष्ट्वो-त्पन्ना पूजनभावना ।
सूरिं सन्मान्य शाहेन प्रोक्ता वाणी सुखावहा ॥ ५६॥

विधाप्य कठिनां यात्रां दुःख दत्तं मया भृशम् ।
ततो दयां विधायैव क्षमस्व गुरुपुंगव ॥ ५७॥

॥ सूरिणा वर्णितं साधुजीवनम् ॥

न साधुजीवने दुःखं धर्माद्याचरणे भवेत् ।
पारमार्थिकन्तु कार्यं नः कर्तव्यं सूरिरब्रवीत् ॥ ५८॥

अन्येषां प्राणिनां कष्टं समुद्धर्तुं स्वयं सहे ।
धर्मोपदशना कार्या स्थाने स्थाने पदाटनम् ॥ ५९॥

॥ सूरीश्वरस्य त्यागः सम्राजंप्रति प्रदर्सितवीरधर्मभावना ॥

वचनं त्यागवृत्तेस्तु श्रुत्वा शाहः सुखी भवत् ।
विधाय नमनं सुरेश्चित्रं गेहे तु नीतवान् ॥ ६०॥

सिंहासेन च संवेष्टुं प्रीत्या प्रार्थितवान् नृपः ।
द्वारान्तिके गुरुस्तस्थौ शाहः पप्रच्छ कारणम् ॥ ६१॥

शय्योर्ध्वे न पदन्यासः नीचैर्जन्तुर्भवेद् बहुः ।
श्रुत्वा शाहोऽवदत् स्वच्छे नात्र जन्तुर्भवेद् ध्रुवम् ॥ ६२ ॥

शय्यामुत्थाप्य तन्नीचैः जन्तुजातं प्रदर्शितम् ।
वीरधर्मस्य सद्भावः सम्राजं प्रति दर्शितः ॥ ६३ ॥

**॥ सम्राजे सूरिप्रदत्तप्रतिबोधः ॥**

इत्थं गुरोश्चमत्कारं, दृष्ट्वा शाहस्तु विस्मितः ।
नम्रभावाद् ययाचे यद् देशनां श्रावयन्तु माम् ॥ ६४ ॥

प्रसन्नसूरिराड् राज्ञे, प्रतिबोधं प्रदत्तवान् ।
सत्यं दया च धर्मश्च, हृदये तस्य रक्षितः ॥ ६५ ॥

**॥ सूरिणा निरूपित-देव-गुरु-धर्ममर्माणि ॥**

गृहाणां चिरजीवित्वे, वस्तुत्रयमपेक्षितम् ।
मूलो-भित्तिश्चखम्भश्च, छदिर्भवेत् तदुपरि ॥ ६६ ॥

जीवनरक्षका एवं, देवो गुरुश्च सुकृतिः ।
ज्ञानदीपक दीप्त्या तु, जन्तोरज्ञाननिर्हतिः ॥ ६७ ॥

गुणीभवन् गुणीसेव्यः, नीतिरीदृक् शरीरिणाम् ।
निर्गुणो निर्गुणैः सेव्यः, एवं मनसि धार्यताम् ॥ ६८ ॥

इत्थमेव गुरुर्देवो, धर्मश्चापि परिक्ष्यताम् ।
निर्भयता मनुष्यत्वे, सत्यं चेतसि धार्यताम् ॥ ६९ ॥

मतमतान्तराणान्तु, विवादो जगतीतले ।
परिचेतुं प्रभुं नित्यं, भिन्नं भिन्नं तु गीयते ॥ ७० ॥

ईश्वरं मन्यते सर्वः, नास्ति कश्चन वञ्चितः ।
चित्ते चतुरतां धृत्वा, मुधा कलिर्विधीयते ॥ ७१ ॥

देवो विष्णुर्महादेवः शङ्करः प्रोच्यते जनैः ।
अजः क्षीणाष्टकर्मातु, प्रभुनाम्ना च गीयते ॥ ७२ ॥

पारंगताख्यया ज्ञेयः परमेष्ठी जिनः सदा ।
शम्भो भगवतीशेषु, भेदो जगत्प्रभोर्मतः ॥ ७३ ॥

तीर्थंकरस्तु स्याद्वादी जिनेश्वरोऽभयप्रदः ।
केवली सर्वदर्शी च, गुणातीतो महागुणः ॥ ७४ ॥

मन्यते वीतरागन्तु, विदेहं निगुणं परं ।
सर्वे ते गुणनिष्पन्ना, ईश्वर संज्ञया मताः ॥ ७५ ॥

क्लेशप्रदो न रागोऽस्ति. द्वेषदावानलो नहि ।
वृद्धिकरो न मोहोऽस्ति न हृदेऽशुभवतनम् ॥ ७६ ॥

महत्त्वं प्रसृत लोके, शुद्ध एतेन बुध्यते ।
सर्वश्रेष्ठोऽधिदेवोऽयं महादेवस्तु गण्यते ॥ ७७ ॥

क्षीणं यस्याखिलं कर्म, यश्च नित्यं सुखाधिपः ।
परमात्मपदं प्राप्तो लब्धमोक्षः . स ईश्वरः ॥ ७८ ॥

॥ संसारशब्दस्य व्याख्या ॥

स्वरूपमीश्वरस्येदं, यत्रोद्भूतिस्तु संसृतौ ।
कर्मणां संक्षयान्नूनं, न कश्चिद् देहमाप्नुयात् ॥ ८० ॥

संसारशब्दतो बोध्यं, वतस्रो गतयो ध्रुवम् ।
देवमनुष्यतिर्यञ्चैः, नारकेन च गण्यताम् ॥ ८१ ॥

गुरुः स एव बोद्धव्यः, पञ्चमहाव्रती तु यः ।
अचलो वीरसिद्धान्तः, स्वीकृतो येन जीवने ॥ ८२ ॥

अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ।
आहारो भिक्षया कार्यः तात्पर्यं यस्य जीवने ॥ ८३ ॥

सामायिके स्थिरो भूत्वा, धर्मञ्चोपदिशेत् सदा ।
सुकान्ताकाञ्चनत्यागी स साधुरभिधीयते ॥ ८४ ॥

रसास्वादं परित्यज्य जिह्वामतिक्रमेत् सदा ।
शक्त्या कष्टं सहित्वा तु सहिष्णुतामधिश्रयेत् ॥ ८५॥

नारोहेद् वाहनं कञ्चिद्, पादेन विहरेत् सदा ।
मनोवचनकायैस्तु, कष्टं देयं न च क्वचित् ॥ ८६॥

पञ्चेन्द्रियानधीनत्वं, मानापमानयोः समः ।
देहं न भूषयेत् किंचिद्, तपस्येत्तु सदा मुदा ॥ ८७॥

प्रीत्या धर्मं प्रकुर्वाणः, नियमश्चानिशं चरेत् ।
विविधव्यसन मन्त्रं, एकान्तवासनां त्यजेत् ॥ ८८॥

अनेक लक्षणं साधोरेवं वर्णितवान् मुदा ।
प्रवर्त्तमानो यथाकालं, वीरधर्मे सदा वसन् ॥ ८९॥

अज्ञानी धर्मनाम्ना तु, क्लिश्येत् तन्नोचितं भवेत्।
मुक्तेस्तु साधनं धर्मः, प्रोच्यते शास्त्रकोविदैः ॥ ९०॥

मनसः पवित्रता शुद्धी-त्येव धर्मो निगद्यते ।
विषयाद् दूरतः स्थेय-मिति ध्येयं सदाऽनघैः ॥ ९१॥

क्लेशः कदापि नो धर्मे, इत्येव सुखसाधनम् ।
प्राप्तिश्च कारयेन्मुक्तेः, मानवानां सुखं तु यत् ॥ ९२॥

निःस्पृहता समते तत्त्वात्, धर्मस्य साधनं महत् ।
ममत्वरहितत्वेन स्वात्मधर्मो विधीयताम् ॥ ९३॥

**॥ सूरेः सदुपदेशात् राज्ञो मनसि जात सद्धर्म-प्रकाशः ॥**

धर्ममाकर्णतो नूनं शाहस्यान्तस्तु जागृतम् ।
सत्यसंशोधने वस्तु ज्ञातमित्यवदद् गुरुम् ॥ ९४॥

अद्यावधि श्रुत स्वामिन् स्वस्वगानं स्वतः कृतम्।
किन्तुत्वद्दर्शनाद् भाग्यमद्यमे समुपस्थितम् ॥ ९५॥

दशाऽस्ति मे शनेरद्य भावि कष्टञ्च ज्ञायते ।
उपाय यदि जानासि कृपया कथय प्रभो ॥ ९६ ॥

प्रोक्तं तु सूरिणा कायमिदं ज्योतिर्विदो न मे ।
शुभं कर्तुः शुभं भावीत्यहं जाने सुनिश्चितं ॥ ९७ ॥

॥ जीवेभ्योऽभयदानाय सूरेः नृपं प्रत्युपदेशः ॥

अभयं सर्वजीवेभ्यो ददत्स्यान्निर्भयो भवान् ।
ईशस्य कृपयाऽपत्तिः दूरं यास्यति तेऽनघ ॥ ९८ ॥

एतत्कथनतः सूरेः शाहः प्राप्तः प्रसन्नताम् ।
अबुलफजलस्यान्ते साधु साधु ध्वनिं जगौ ॥ ९९ ॥

॥ श्री सूरिकृत-पुस्तकालयस्य सदुपयोगः ॥

शेखूजी पार्श्वतः सर्वं पुस्तकमानयन्नृपः ।
स्वीकाराय जगौ सूरिं चख्यौ सूरिरिद्रं भयम् ॥ १०० ॥

यतेर्नैव स्वकायेऽपि गेहे माया न च क्वचित् ।
सदा बन्धनतो दूरं तिष्ठति वीरधर्मभृत् ॥ १०१ ॥

शाहस्याग्रतः सूरिरकार्षीत् , पुस्तकालयम् ।
सर्वजनोपभोगाय शाहस्य स्वयशोऽभवत् ॥ १०२ ॥

शाहेन विविधान् प्रश्नान् कृत्वा सूरिः परीक्षितः ।
पश्यतो दृढतां सूरेरुत्थिता भावना शुभा ॥ १०३ ॥

॥ मनकशाहस्य गर्वशमनं जगमालर्षिणा प्रदर्शितैकत्रिंशत् चमत्काराः ॥

फकीरमनकाख्याय शाहस्यासीन्महादरः ।
जगौ आह्वयतां सूरिर्दर्शयामि चमत्कृतिम् ॥ १०४ ॥

चमत्कारविधिर्जज्ञे जगमालेन तत्र वै ।
एकत्रिंशत्तु निर्दिष्टा सूरिरासीत् सुखासनः ॥ १०५ ॥

॥ आगरायां हिंसात्यागस्तथा श्रीपार्श्वनाथप्रतिष्ठामहोत्सवः ॥

सहाश्चर्येण शाहेन, सूरिर्गुरुपदे कृतः ।
देशना श्रवणात्सूरेः, हृदये प्रीतिमासवान् ॥ १०६ ॥

बभूवाग्राचतुर्मास्या, संघस्याग्रहतो गुरोः ।
पर्युषणे कृतादेशात्राऽभूत्हिंसा हि मानवात् ॥ १०७ ॥

कृत्वा शौरिपुरे यात्रां, पुनराग्रां गतो गुरुः ।
प्रतिष्ठां पार्श्वनाथस्य, कृत्वा सूरिर्मुमोद हि ॥ १०८ ॥

कृत्वा शासनकार्याणि, प्राख्यापयत् स्वकं यशः ।
संघस्य कामना पूर्णा, स्वीचक्रे धर्मभावनाम् ॥ १०९ ॥

॥ अकबरसूर्योः धर्मचर्चा ॥

फतेहपुरसीक्रियां सूरिं शाहो मुदाह्वयत् ।
धर्मचर्चा विधानाय, सूरिणा हि मनस्विना ॥ ११० ॥

संगमस्य शुभे काले, विषयानेकचर्चनात् ।
उपदेशाच्च सुरेस्तु शाह आनन्दितोऽभवत् ॥ १११ ॥

विदुषा विदुषां मेले, ज्ञानगोष्ठी भवेन्मुदा ।
फजलेन गुरोर्मेलश्चेत्थं तु बहुशोऽभवत् ॥ ११२ ॥

गण्यमानो गुणग्राही, पण्डितः फजलो महान् ।
शाहस्य विदुषां वृन्दे, सोऽपूर्वो वर्ण्यते जनैः ॥ ११३ ॥

एकदा तु प्रसंगोऽभूत्, सम्यग् धर्मस्य चर्चतः ।
फैजलेन गुरोर्नूनं, अकबरो ऽप्युपागतः ॥ ११४ ॥

योग्यासनेऽविशत्साहो, विनोदं हृदये वहन् ।
गुरोरुदेशवार्ता च, शुश्राव शान्तचेतसा ॥ ११५ ॥

प्राशंसत् गुरुं शाहः, भवतोपकृतं बहु ।
प्रबोध्य सत्यं धर्मं तु मनसो मे तमोऽहरत् ॥ ११६ ॥

प्रतिदानं तु नायच्छं प्रार्थ्यतां चित्तवांछितम् ।
यत्प्रार्थ्यते त्वया स्वामिन् तदवश्यं प्रदास्यते ॥ ११७॥

॥ सुरेरुपदेशात् अकबरः पक्षिणोऽत्यजत् ॥

सूरिः शाहमयाचंत मुच्यन्तां पिंजरात् खगाः ।
अत्याक्षीत् पक्षिणः सर्वान्, प्रसन्नः सन्नराधिपः ॥ ११८॥

आदिशत् गृह्यतां नैव, कैश्चित् मत्स्यं सरोवरात् ।
तथैव कृतवान् सर्वं, गुरोराज्ञा गरीयसी ॥ ११९॥

॥ सूरिः पर्युषणे समस्तभारते जीवहिंसा प्रतिबन्धं शाहमयाचत ॥

आचार्य शाहयोर्मध्ये, चलितं धर्मचर्चनम् ।
सूरिर्जीवदया मर्मा-ज्ञापयत् तं शुभे क्षणे ॥ १२०॥

पर्युषणदिनान्यष्टौ, न भवेत्क्वापि हिंसनम् ।
इत्याज्ञाप्य नृपालेन स्वराज्यं भूष्यतां त्वया ॥ १२१॥

॥ राज्ञो निदेशात् अबुलफजलेन पर्युषणे द्वादशदिनानि जीवहिंसा निरोधपत्रं सूरेश्चरणे धृतम् ॥

मेलयित्वा चतुर्वारान्, द्वादशाह्नं समादिशत् ।
फजलेन सदार्थन्तु, लिखित्वा चरणे धृतम् ॥ १२२॥

सत्ये श्रद्धां विधायैव कुर्यात्सफलजीवनम् ।
न्यायेनाचकथत् सूरिः कुर्यात् शुद्धविचारणाम् ॥ १२३॥

वंशतस्त्वागता रीतिः, दुःखाचेतां परित्यजेत् ।
कल्याणकारक धर्मं सात्त्विक, कर्ममाचरेत् ॥ १२४॥

यथातूप्तं तथा लूयात्, कृतं कर्म समश्नुयात् ।
मोचयेद् बन्धयेत् कर्म मिथ्यानैव भवेदिदम् ॥ १२५॥

॥ सूरेरुपदेशात् शाहेन स्वकृतपापकर्मणां कृतपश्चात्तापः पूर्वकृतहिंसापरिसंख्यानश्च ॥

श्रुत्वा सूरेः सुधावाक्यं भूतः प्रत्यक्षतां गतः ।
उपतस्थौ हि शाहान्ते, कृतं पापं हि भक्षति ॥ १२६॥

विधाय कर्मणस्तापं सूरेः क्षमामयाचत ।
भाव्यं भयंकरं जाने, महादुष्टोऽस्मि दुर्भगः ॥ १२७॥

प्राणिनोऽनागसो नित्यं, मृगयायां हता मया ।
हतमृग त्वचा शृंगात् हजीरामत्यभूषयम् ॥ १२८॥

चित्तोडस्य तु संग्रामे, क्रूरत्वेनावहिंसनम् ।
वृद्ध मानव बालाश्च, नच नार्योऽपि जीविताः ॥ १२९॥

पञ्चशतं खगानान्तु, जिह्वां स्वादेमि नित्यशः ।
मांसस्य भक्षणे दक्षः गर्वादानंदमाप्नुवन् ॥ १३०॥

भवतो देशनां श्रुत्वा पापकर्माऽत्यजं गुरो ।
कर्मणां बन्धनं धित्वा मामुद्धर जगद्गुरो ॥ १३१॥

॥ सूरिकृत भारतस्य दुर्दशा वर्णनम् ॥

शाहस्यार्त्तवचः श्रुत्वा, सूरिरानन्दमाप्तवान् ।
विमुग्धान् धर्मवादे तान्, अबोधयत् सयुक्तिकम् ॥ १३२॥

एकोऽन्यं नास्तिकं ख्याति, स्वस्य सत्यन्तु मन्यते ।
विधाय स्पर्धते निन्दां, देवधर्माभिमानतः ॥ १३३॥

भारतावदशायास्तु, मुख्यमेतद्धि कारणम् ।
विरोधे विग्रहे जाते, मुधान्योऽन्यं विनश्यति ॥ १३४॥

सत्ये नहि भवेच्छंका, प्रभुरेको हि विद्यते ।
आत्मोजसा यदा स स्यात्, प्रणश्येत्तुतमस्तदा ॥ १३५॥

॥ देवीमिश्र पण्डितः वेदवाक्यवत् सूरिवाक्यममंस्त ॥

देवीमिश्रमपृच्छत्तु, शाहः सत्यं निगद्यताम् ।
अगादीत् सविपश्चित्तु, वेदवत् सूरिराड् वनः ॥ १३६॥

धर्मस्य चर्चना तत्र, प्रसंग आगतो बहु ।
उपदिदेश सम्राजं, सूरिः शुद्धेन चेतसा ॥ १३७॥

॥ राजसभायां राज्ञा प्रदत्तायाः सूरेर्जगद्गुरु पदव्याः प्रसंगे बन्धनतो जीवमुक्तिः ॥

सत्यनिस्पृहतावाक्यात्, सूरौ शाहो ननन्द हि ।
जगद्गुरोः पदं दत्तम्, राज्ञां सदसि तूत्सवात् ॥ १३८॥

शुभप्रसंग संस्मृत्वा, मुक्ताजीवास्तु बन्धनात् ।
मृग प्रभृतयः सर्वे, आदिश्य स्नेहभागमून् ॥ १३९॥

बीरबलादयः शाह, श्चेकदा यत्र संस्थिताः ।
शान्तिचन्द्रेण सार्धन्तु, सूरिस्तत्र समाययौ ॥ १४०॥

प्रमोदेनावदत्शाहः, सूरे किञ्चित्तु याच्यताम् ।
कारागारे स्थितान् लोकान्, मुञ्च भूपागदद् गुरुः ॥ १४१॥

॥ सूरेः स्पष्टकथनात् बीरबलकृतसूरिप्रशंसा ॥

शाहस्य चाप्यभूदिच्छा, सूरेर्दयामवेक्षतः ।
सर्वापराधिनो मुक्ताः मोचनीया न ये स्थिताः ॥ १४२॥

सूरिं बीरबलोऽपृच्छत्, गुणी वा निर्गुणी शिवः ।
ज्ञानेनास्ति गुणीसोऽपि, प्रचख्ये सूरिणा शिवः ॥ १४३॥

सूरेः सुस्पष्टवाक्यात्तु, बुद्धौ बीरबलो नृपः ।
औदार्यवचनं चख्यौ, सूरेर्धन्यं हि जीवनम् ॥ १४४॥

अलभ्यन्तु ददौ मह्यं, अमूल्यसमयव्ययात् ।
सूरिमकथयत् शाहः, कार्यमादिश्यतां गुरो ॥ १४५॥

॥ सूरिः जनकल्याणाय राज्ञः सकाशात् प्रतिबद्धजिजियाकरं तीर्थकरं च मोचनमयाचत ॥

नास्ति किञ्चिन्मदावश्यं जनाय याच्यते नृप ।
दुःखदो जिजियावेरः त्यज्यतामवनीपते ॥ १४६॥

तीर्थकरोऽपि तु त्याज्यः, परमार्थाय यद् भवेत् ।
स्थास्यति भवतो नाम, पूजिष्यते जनः सदा ॥ १४७॥

आज्ञायाः पालनं कृत्वा, शाहः सूरेः स्तुतिं व्यधात्।
प्रलेख्यादेशपत्रं च, देशाधिकारिणे ददौ ॥ १४८॥

सूरये प्रतिपत्रं च, ददौ मुद्राङ्कितं नृपः ।
जीवसंरक्षणानेकं, कार्यन्तु बहुधा कृतम् ॥ १४९॥

**॥ अनेक तीर्थयात्रा कुर्वतः सूरेर्मथुराऽऽगमनम् ॥**

नैकत्रोवाऽवसत्सूरिः तीर्थयात्रां सदाऽकरोत् ।
विधाप्य धर्मकार्याणि, श्रावकेन सदा भ्रमन् ॥ १५०॥

संपश्यन् पार्श्वनाथ च, मथुरायां गतो गुरुः ।
नत्वा ऋषभदेवञ्च, जीवनानन्दमालभत् ॥ १५१॥

**॥ आगरायां चतुर्मासीं विधाय फतेहपुरसिक्रीं प्रति पुनः सूरेः समागमः गुर्जरं प्रति गमनविचारश्च ॥**

आग्रायाञ्च चतुर्मास्यां, कृत्वा षोडशके शते ।
एकचत्वारिंशके चाधिकेऽब्दे सिक्रयां गतो गुरुः ॥ १५२॥

आसीत् शाहस्तदा तत्र, मिलित्वाचकथद् गुरुः ।
गन्तव्यं गुर्जरं राजन्, शाहेनाङ्गीकृतं मुदा ॥ १५३॥

**॥ राज्ञः कनात् सूरिः शाहस्यान्तिके शान्तिचन्द्रमस्थापयत् ॥**

जिज्ञासुः प्रार्थयच्छाहः योग्यैकमुनिरत्र मे ।
ज्ञानार्थं सत्यधर्मस्य, न्यसनीयो दयानिधे ॥ १५४॥

दृष्ट्वा श्रद्धान्तु शाहस्य, शान्तिचन्द्रस्तु रक्षितः ।
प्रेषितुं सेनसूरिं वाचकथत् फुल्लचेतसा ॥ १५५॥

**॥ गुर्जरं प्रति प्रतिष्ठता सूरिणा सम्राजे दत्ताशीः सम्राजा च कृतोत्कृष्टसन्मानम् ॥**

समाचारं गते संघे, औदासिन्यं समागतम् ।
प्रबोध्य साधुधर्मं तु, सर्वशान्तिमदाद् गुरुः ॥ १५६॥

प्रीत्या संप्राप्तसन्मानः, राजसंघाशिषं ददौ ।
विस्मर्तव्यो न सद्धर्मः रक्षतात् करुणेश्वरः ॥ १५७॥

॥ अभिरामाबादे सूरेः चतुर्मास्या ॥

जनताचित्तहृत्सूरिः, प्रतस्थौ प्रेमतस्ततः ।
औदार्येणाकरोच्छाहः, बहुमानं गुरोस्तदा ॥ १५८ ॥

षोडशे शतके चत्वा-रिंशे तु द्वयधिके कृता ।
रामाबादे चतुर्मास्या, हरताऽज्ञानसंतमः ॥ १५९ ॥

॥ अजमेरे सूरेरागमनं संघकृतमहोत्सवश्च ॥

अजमेरागते सूरौ, संघेन विहितोत्सवः ।
निमन्त्रितः सुबाखानः, खानेन बहुधादरात् ॥ १६० ॥

ईश्वरो रूप्यरूपो वा, मूर्त्तेस्तु पूजनं मृषा ।
सुबाख्यानस्य तं प्रश्नं, श्रुत्वा सूरिः समादधे ॥ १६१ ॥

॥ सूरेः समाधानात् सुबाखानः प्रसन्नो भूत्वा सूरये उपहारं ददौ सूरिस्तु तन्नाददे ॥

ध्याता ध्यानञ्च ध्येयञ्च, ज्ञायते बुद्धितो जनैः ।
जगदीशं तु निश्चेतुमरूपं रूपी च कथ्यते ॥ १६२ ॥

नम्याद् रूपं विना ध्यानं, ततो मूर्तिरपेक्षिता ।
भावेनेश्वरमर्चन्तो लभन्ते तत्स्वरूपताम् ॥ १६३ ॥

प्रसन्नोऽचकथत् सुबो-पहारो' गृह्यतां गुरो ।
जगौ सूरिरयं साधो-रुपाधिः सर्वनाशकृत् ॥ १६४ ॥

त्यक्तवानस्मि संसारं, ततः किं माययाऽमुया ।
न किञ्चिन्मम कार्याय, सत्यं मन्यस्व मे वचः ॥ १६५ ॥

॥ सुबाकृतसूरिसम्राट्प्रशंसा ॥

आसीत् परिचितः सूबा, प्रभावन्त्वद्य ज्ञातवान् ।
सूरिं सूबा जगौ मत्वा, राज्ञस्ताजमदीपयः ॥ १६६ ॥

महाराजन्तु राजानं, सूबाश्चोपदिदेश सः ।
समये हीरसूरिस्तु, वीरधर्ममतिष्ठिपत् ॥ १६७ ॥

॥ पत्तने प्रजाशोषककलाखान सूबाऽधिकारिणः सूरिकृतसद्बोधः ॥

पत्तने हि कलाखानः, प्रजावर्गस्य शोषकः ।
त्राहि त्राह्यवदल्लोको, ऽसहमान उपद्रवान् ॥ १६८ ॥

पत्तने हीरसूरिस्तु, आगतः षोडशे शते ॥
त्रिंशे उपाश्रये धर्म-व्याख्यानं कर्तुमारभत् ॥ १६९ ॥

स्वगेहमानयत् सूरिं, प्रशंसामश्रृणोत् यदा ।
सूर्यचन्द्रगतेः प्रश्नं सूबा तु व्यदध तदा ॥ १७० ॥

स्पष्टोत्तरमदात् सूरिः, ज्ञातवान् सहि दुर्लभम् ।
सूबाचेतस्यभूद्भावः श्रृण्वन् सूरिसुधागिरः ॥ १७१ ॥

॥ सूरिः सदुपदेशात् सूबातः अपराधिनोऽनपराधिनश्च लोकान् कारागारात् अमोचयत् मासैकं हिंसानिरोधमकारयत् अजमेराद् गुर्जरं प्रातिष्ठच्च ॥

याचस्व त्वं यथाकामं, प्रीतः सूबाऽगदद् गुरुम् ।
दुःखमुक्तविधानाय, निगृहितस्य मोचनम् ॥ १७२ ॥

जगाद हीरसूरिर्वै, ततो मुक्तास्तु तेऽभवन् ।
जीवहिंसा निरोधाऽभूत्, सूरिराजस्य वाक्यनः ॥ १७३ ॥

सूरेः प्रबोधतो लोके हितस्य सुव्यवस्थितिम् ।
कारयामास सूबा स, लोके कीर्त्तिमवाप्तवान् ॥ १७४ ॥

अजमेराद् विहारं तु, कृत्वा सूरिस्तु गुर्जरम् ।
समागतः प्रबोधं च, मार्गे मानमवाप्नुवन् ॥ १७५ ॥

षोडशे तु त्रिचत्वारिं-शे सिरोहीमगाद् गुरु ।
धर्मोपदेशनाद् राज्ञः, जनकार्यमसाधयत् ॥ १७६ ॥

॥ सिरोहीमहाराजं प्रबोध्य कारागारात् श्रावकानमोचयत् आचाम्लतपसः समाराधनाञ्चाकारयत् ॥

निगृहीताः शतं जैना, राज्ञोपद्रवकारिणा ।
उपदेशनतः सूरे, मुक्ता, राज्ञाऽतिमानतः ॥ १७७ ॥

आचाम्लस्य तपः श्रेष्ठं, सम्यक् वै साधयेच्छुभम् ।
सिद्धि तु प्राप्नुवन् सूरिः, निष्कामं तत्तपो व्यधात् ॥ १७८॥

॥ खंभाते साधुद्वेषी हबीबुल्लाहः सम्राजः समादेशात् सूरेः चरणकमले क्षमामयाचत ॥

हबीबुल्लाह सूबा तु खंभाते स मुनौ द्विषन् ।
आगते हि गुरौ सूबा, चकाराऽत्यवहेलनाम् ॥ १७९॥

बहिश्चकार साधूंश्च, सूरिः शाहं न्यवेदयत् ।
शाहस्यादेशतः खानः, सूरेर्गुणमगायत ॥ १८०॥

खंभातमानयन्मानान्, नत्वा क्षमामयाचत ।
क्षमस्व मेऽपराधं भो, सूरे त्वं करुणाकरः ॥ १८१॥

॥ हबीबुल्लाहः सूरेरुपदेशात् जीवहिंसां निरुद्धवान् निगृहीतांश्च मुक्तवान्, आजमखानोपरि सूरिः स्वप्रभावं पातितवान् ॥

अपदेशेन संतुष्यन्, असतौत् सूरिं तदाऽऽनतः ।
निगृहीतांश्च हिंसाञ्च, सूरावादरतोऽत्यजत् ॥ १८२॥

॥ शुद्धचारित्रस्य महिमा ॥

अमदावाद आजामेऽष्टाचत्वारिंश वर्षके ।
तत्र धर्मोपदेशाद् वै सूरिः प्रभावमपातयत् ॥ १८३॥

यदि स्याच्छुद्धचारित्रं, लोक ईशसमो भवेत् ।
माया-मोहं परित्यज्य, प्रीत्येशं तु सदा भजेत् ॥ १८४॥

॥ सूरेरुपदेशतः क्षमां विधाय सूबा जगडुशाहं मुक्तवान्, उना नगरे प्रीत्या सूबा सूरिमवन्दत ॥

सूरेः शुभाज्ञयाधीनः, जगडुशाहमत्यजत् ।
लक्षाणान्तु क्षमां कृत्वा, सूबा सुखमकारयत् ॥ १८५॥

उनाऽऽसीत्तु यदा सूरिः, सूबा प्रेमभरे गुरौ ।
आगत्याजमखानस्तु, गुरुं सूरिमवन्दत ॥ १८६॥

॥ पत्तनस्थ सूबोपरि सूरेर्दृष्टिप्रभावः ॥

नवोत्तरे तु चत्वारिं-शे वर्षेऽभूत्तु पत्तने ।
कासीमखानसूबा हि, सूरीश्वरं समाह्वयत् ॥ १८७॥

शिथिला तस्य सत्ताऽभूत्, सूरीशमभिपश्यतः ।
यदर्थं सत्तयाऽऽहूतः, विस्मृतं तद्धि तत्क्षणात् ॥ १८८॥

॥ सूरिवर्णित स्थावरादि जीवभेदाः पुण्यपापमार्गश्च ॥

जीवो हि जीवमत्त्यत्रा-पराधः शतशो भवेत् ।
जीवानां भेदमाख्याय, महादोषमदर्शयत् ॥ १८९॥

पुण्यपापपथं चख्यौ, दत्वा दृष्टान्तमुत्तमम् ।
सूरेः कथनमाकर्ण्य, सूबाहृदि दयाऽभवत् ॥ १९०॥

॥ सूरेरुपदेशतः सूबातः त्यक्तप्राणिनः, सूबाप्रार्थनया गच्छे तेजसागरसामलसागरयोरानयनश्च ॥

स सूबाऽचकथत् सूरिं, कार्यमादिश्यतां गुरो ।
निगृहीतमूकजीवांस्तु, सूरिरत्याजयत् तदा ॥ १९१॥

सूबाप्रार्थनया सूरिः, गच्छे निन्येऽपराधिनौ ।
तेजसामलनामानौ, सागरौ सागरोपमौ ॥ १९२॥

॥ सिद्धाचलसंघः पत्तनात् राजनगरे समागतः ॥

प्रीत्या महार्धरत्नेन पट्टवस्त्रादिभिः सह ।
गुरुं महोपदेष्टारं सूबा सूरिमपूजयत् ॥ १९३॥

सिद्धाचलस्य यात्रायै, पञ्चाशति तु षोडशे (१६५०) ।
निरगच्छन्महासंघः राजनगरं समागतः ॥ १९४॥

पत्तनस्थो मुरादा हि, व्यवस्थामकरोन्मुदा ।
आसीत्संघेन सूरिस्तु, सूबा मानमपूरयत् ॥ १९५॥

॥ सूरेः सूबां प्रति सदुपदेशः ॥

इच्छां विज्ञाय सूरिस्तु, मुरादामुपदिष्टवान् ।
धर्मं न्यायञ्च नीतिञ्च, सद्वर्तनमुपादिशत् ॥ १९६॥

भ्रमन् सूरिः प्रतिग्रामं,-मजयत् मानसं गुरुः ।
प्रभावं पातयित्वा तु, जनकार्यमसाधयत् ॥ १९७॥

॥ सूरीश्वरः संघेन सह सिद्धगिरौ गतस्तत्र संघेशोऽपि यात्रायै सहागतः ॥

महामहोत्सवात् सूरिः, पादलिप्तमगात्सुखम् ।
द्व्यधिकासप्ततिः संघा-धिपतिः सूरिणाऽमिलत् ॥ १९८॥

असंख्या, यात्रिका देशात्, विदेशादागताः सुखम् ।
सहस्त्रं साधवः सूरे - रासन्नाज्ञानुसारिणः ॥ १९९॥

॥ एकसहस्त्रसाधुसहितसूरेः सोरठसूबा धनाढ्यैश्च सन्मानं सामयिकश्चाकरोत् ॥

जानन्वै सोरठे सूबा सूरेर्मानं व्यधाद् बहुः ।
सामयिक व्यधात्प्रेम्णा मत्वा देवसमं गुरुम् ॥ २००॥

सूरिं सन्मान्य श्रीमन्तोऽपूजयन् स्वर्णमुद्रया ।
व्यधुर्महोत्सवं लक्षैर्द्रव्यैस्तत्र पुनः पुनः ॥ २०१॥

॥ सूरिनवटूंके देववन्दनं विधाय स्थाने स्थाने उपदिश्य वीरधर्मप्रभावमपीप्रथत् ॥

सिद्धे सिद्धानले नून-मादिनाथनतिं व्यधात् ।
नवटूंके हि देवांश्च, नत्वा सूरिरमोदत ॥ २०२॥

स्थले स्थले दिशन् सूरिः, यात्रिकानां सदः प्रति ।
गानं च वीरधर्माणां, कुर्वन् वीरसमोऽभवत् ॥ २०३॥

॥ दीवबन्दरे प्रयाणं विधाय सूरिः लाडीबाईसंघयोरभिलाषां पूरयित्वा उनायां सन्मानं लब्धवान् ॥

संघस्य भावनापूर्णा, लाडीबाय्यास्तु प्रेमतः ।
दीवबन्दरमायातः, सूरिस्तु निश्चयं व्यधात् ॥ २०४॥

लाडीबाय्याः गत कुष्ठ-मिति सुरेरनुग्रहः ।
उनायामाव्रजन् संघः, बहुमानमदात् गुरोः ॥ २०५॥

॥ सूरेः रोगग्रस्तशरीरम् ॥

यादृशं यस्य निर्माणं, न तन्मिथ्या भवेत् क्वचित् ।
उदयास्ते गती सर्वेषामिदं शास्त्रमुज्जगौ ॥ २०६॥

शैथिल्ये जीर्णकायस्य, रोगः सूरेः समाविशत् ।
साधुसंघगताचिन्ता, सूरेर्ध्यानं जिनेश्वरे ॥ २०७ ॥

॥ लाहोरतः सेनसूरिं आह्वयत् रोगावस्थायामपि पर्युषणे सूरिरुपादिशच्च ॥

लाहोरादागते सेन-सूरौ हि मेलनं विना ।
रुग्णत्वेऽपि च व्याचष्टे, पर्यूषणसुपर्वणि ॥ २०८ ॥

शाश्वतात्माविनाशीति, चरमा देशना गुरोः ।
जीवनं साध्यतां साधो, वीरधर्मस्य संग्रहात् ॥ २०९ ॥

॥ सूरीश्वरस्य निर्वाणम् ॥

द्विपञ्चषट्चन्द्रवर्षे जनानां दुःखदायके ।
भाद्रे विष्णुतिथौ सायं, शुद्धिं, कृत्वा गुरुर्जगौ ॥ २१० ॥

क्षम्यतामपराधो नः, व्यहसत्तु गुरुः सुधीः ।
आत्मध्याने तु लीनोऽभूत्, तदा योगमसाधयत् ॥ २११ ॥

ततः स्वर्गं ययौ सूरिः, शोकव्याप्तमहीतलम् ।
तदा हाहाऽरुदन्, सर्वे, शोकनिश्चेष्टचेतसा ॥ २१२ ॥

वीरशासन सूर्योऽस्तं गतः प्रभां प्रकाशयन् ॥
आर्चयत् चरणौ प्रीत्या, उनाग्रामे प्रभावतः ॥ २१३ ॥

सूरिः सर्वत्रार्यसंस्कृतिमपीप्रथत् धर्मध्वजाश्चाकम्पयच्च ॥

जीवनं सफलं नीतः, कायं धृत्वा तु भूतले ।
पृथिव्यामार्यसंस्कारं, प्रथयामास काव्यतः ॥ २१४ ॥

हीरस्य जीवनं हीरं, चरित्रञ्चाद्भुतं ध्रुवम् ।
हिताय जगतां हीरः, भूतोऽस्मिन् जगतीतले ॥ २१५ ॥

पताकां कम्पयामास, धर्मस्य रक्षतो महान् ।
अभेदेन च साम्येन, सत्यधर्ममदीपयत् ॥ २१६ ॥

॥ सूरेस्तपश्चर्या ॥

*सूरीन्दुरेकाशनकं न यावज्जीवं जहौ न्यायमिवक्षितीन्द्रः ।*
पश्चापि चासौविकृतीरहासीद्, गुणान् स्मरस्येव पराबुभूषुः ॥ २१७ ॥

द्रव्याणि वल्भावसरे व्रतीन्द्रः, सदाददे द्वादशनाधिकानि ।
किं भावनाः पोषयितुं विशिष्य, भवाब्धिपारं प्रतिलम्भयित्रीः ॥ २१८ ॥

स्वपापमुक्तये सूरिः, उपवासशतत्रयम् ।
सपादां द्विशतीं षष्ठान्, ध्यातुं तीर्थकृतां व्यधात् ॥ २१९ ॥

द्वासप्रतिं व्यधाद् विज्ञो, ऽष्टमानाञ्चारुमानसः ।
आचाम्लानां सहस्रे द्वे, चक्रे स सूरिराट् पुनः ॥ २२० ॥

विंशतिस्थानकातपः विंशत्याचाम्लकैर्व्यधात् ।
निर्विकृतीः पुनश्चक्रे, द्वे सहस्रे मुदान्वितः ॥ २२१ ॥

एकस्मिन् वारके पात्रे, निरवच्छिन्नं जलं पतेत् ।
यत्रान्नं च तथा पात्यं, सैकदत्तिस्तु प्रोच्यते ॥ २२२ ॥

यस्मिंश्चैकसिक्थं तु, नान्यतु भुज्यते पुनः ।
एकसिक्थं तु तत्प्रोक्तं, सेव्यते मुनिभिस्सदा ॥ २२३ ॥

तत्प्रमुखानि तीव्राणि, तपांसि सूरिराड् व्यधात् ।
सहस्राण्युपवासानां, त्रिणि वै षट्शतानि च ॥ २२४ ॥

पुनस्तुविधिवच्चक्रे, स हीरः सर्वसाधनः ।
प्रथममुपवासस्त्वेकभक्तं तदनन्तरम् ॥ २२५ ॥

आचाम्लं तु ततो भूयस्ततश्चोपोषणं पुनः ।
गुरोदानस्तपश्चक्रे, मासानेवं त्रयोदश ॥ २२६ ॥

पुनर्द्वाविंशतिं मासान्, यावत्तु योगवाहनैः ।
कृत्वा तीव्रं तपश्चक्रे, स्वपरोद्धारकस्तु सः ॥ २२७ ॥

पुनर्मासत्रय यावत्, सूरिमन्त्रं जजपा सः ।
चतुःकोटिमितान् भूयः स स्वाध्यायानजीगणत् ॥ २२८ ॥

प्रतिष्ठां प्रतिमानान्तु पञ्चाशज्जिनेशितुः ।
विदधे विधिना सूरिः, सर्वविध्नं निवारयन् ॥ २२९ ॥

॥ सूरीश्वरस्य साधुसंख्या ॥

नापारमस्य पुण्यान्तं, वीरधर्मानुयायिनः ।
दयादानतपे भक्त्या, शिष्यास्तु बहुशोऽभवन् ॥ २३० ॥

ससोत्तरशतं साधून्, पण्डितंपदमर्पयत् ।
रचयामास सप्तोपाध्यायांश्च गुणधारिणः ॥ २३१ ॥

द्विसहस्रे तु साधूनां गण्यमानोऽभवद् गुरुः ।
धर्मे व्ययीकृता लक्षाः, ऋद्धिमद्भविकैर्मुदा ॥ २३२ ॥

शान्तिचन्द्रश्च भानुश्च, सूरेराख्यामदीपयत् ।
विजयसेनसूरिस्त्व-भूषयत् पट्टधारिताम् ॥ २३३ ॥

॥ लाहोरस्योपवने शाहस्यान्तिके आगत हुमायूँ शान्तिचन्द्रयोश्चमत्कारः ॥

लाहोरोपवने शाहः, शान्तिचन्द्रेण संलपन् ।
हुमायूँ वाहनारूढरागत्योपायनं फलैः ॥ २३४ ॥

अमिलतां पितृपुत्रौ, हुमायूँ वसतिं गतः ।
शान्तिचन्द्रचमत्कारं, दृष्ट्वा शाहोऽतिनन्दितः ॥ २३५ ॥

अटकराज्यमानेतुं, सम्राडतिक्रमं व्यधात् ।
गते बहुतिथे राजा, न किञ्चित्फलमाप्तवान् ॥ २३६ ॥

पूर्णो गर्तोहि फूत्कारात्, द्वितीयाद् वप्रसंहतिः ।
तृतीयाच्छान्तिचन्द्रस्य, भेरी शाहस्य वादिता ॥ २३७ ॥

॥ शतावधानिशान्तिचन्द्रप्रभावतः शाहेन जिजियावेरो हिंसा च निरुद्धा ॥

अहिंसैतत्प्रभावन्तु, विलोक्य जिजिया महन् ।
शतावधानिशान्तिस्तु, शाहे दयामपूरयत् ॥ २३८ ॥

'ईदे' पर्वणि सर्वत्र, शाहो हिंसामरोधयत् ।
प्रतिवर्षं तु षण्मासान्, दयां जीवेष्वपालयत् ॥ २३९ ॥

॥ भानुचन्द्रप्रभावः ॥

भानुचन्द्रोऽपि शिष्यः स, सूरेराख्यामतिष्ठिपत् ।
राज्ञः शिरसि हस्तं, च धृत्वारोगमनाशयत् ॥ २४० ॥

॥ शुद्धचारित्रप्रभावात् पञ्चशतानि गावो मोचिताः ॥

चारित्रस्य प्रभावोऽयं, ज्ञातो राज्ञाऽनुभूतितः ।
हिंस्याः पञ्चशतं गावः, त्याजिताः क्रूरदानवात् ॥ २४१ ॥

॥ भानुचन्द्रस्य सततोपदेशात् शाहः सिद्धगिरेः करं गवां हिंसाञ्च मुक्तवान् ॥

शाहेन संचरन् **भानुः**, प्रयाणे देशनां ददत् ।
**सिद्धाचल**करं राज्ञः, प्राप्यादेशममोचयत् ॥ २४२ ॥

गोमहिष्यादिजन्तूनां, शाहो हिंसामरोधयत् ।
सम्राडागत्य लाहोरं, बबन्धोपाश्रयं महत् ॥ २४३ ॥

॥ भानुचन्द्रस्य स्नात्रपाठफलं तथा तस्य शाहप्रदत्तवाचकपदम् ॥

उद्धृत्य बालपुत्रीं तु, दयाधर्ममबोधयत् ।
स्नात्रस्यपठनाच्छान्तिं भानुचन्द्रो व्यधात् मुनिः ॥ २४४ ॥

सहस्राख्यां नृपः शृण्वन्, चकार सूर्यसाधनम् ।
भानुञ्च वाचकं चक्रे, शाहो हीरानुशासनात् ॥ २४५ ॥

॥ शाहस्याध्यक्षतायां पण्डितानां समक्षे सेनसूरेर्विजयः ॥

सेनसूरेर्महत्वस्य, वर्णनं न भवेदिह ।
शाहस्यहि सभां प्राप्य, विजयं लब्धवान् सुधीः ॥ २४६ ॥

जैन नास्तिकमाचख्यौ, सूर्यं नहि सुसेवते ।
मन्यतेऽपूतगंगोदं, प्रश्नास्तु चलितास्तदा ॥ २४७ ॥

मुग्धास्तु पण्डिताः सर्वे, सेनसूरेस्तु सम्मुखे ।
सेनसूरेस्तु मान्यत्वे, राजा तु संमतिं ददौ ॥ २४८ ॥

॥ सूरीश्वरस्य त्रयः शिष्या भारते दया-धर्मबीजमरोपयत् ॥

त्रयः प्रधानशिष्यास्ते, गुरोराख्यामतिष्ठिपन् ।
बीजं प्रपुष्पितं चक्रुधर्मस्य भारते तदा ॥ २४९ ॥

वर्षाणाञ्च गतत्वेऽपीतिहासोऽतिदिशेत्सदा ।
गुणिनां गुणगानञ्च, देशे तु गौरवाद् भवेत् ॥ २५० ॥

॥ उपसंहारः ॥

शाहपार्श्वे वसन्तस्ते, चमत्कारमदर्शयन् ।
यथाकालं समादेशं, नीत्वा धर्ममवर्धयन् ॥ २५१ ॥

यद्यप्येते न वर्तन्ते, स्मर्यन्ते त्वनघाः पुनः ।
प्रेमी प्रेम्ना स्मरन्नाख्यां, सर्वपापैः प्रमुच्यते ॥ २५२ ॥

चरित्रं हीरसूरेस्तु, लिखितं हि यथामति ।
उच्यतां साधुसूर्यस्य, प्रेम्ना जय रवो महान् ॥ २५३ ॥

॥ इति शम् ॥

९

श्रीवल्लभपाठक रचित विजयदेवमाहात्म्यगत

# श्रीहीरविजयसूरिसंदर्भः

**तत्पट्टमुद्रिकाहीरो हीरविजयसूरिराट् ।**
**सोऽष्टपञ्चाशत्पट्टलक्ष्म्या लसति विष्णुवत् ॥ ११॥**

११ — स **हीरविजयसूरिराट्** अष्टपञ्चाशत्पट्टलक्ष्म्या लसति क्रीडते । किं वत् ? विष्णुवत् नारायण इव । स कः ? यत्तदोर्नित्याभिसम्बन्धात्-यः तत्पट्टमुद्रिकाहीरः **श्रीविजयदानसूरिपट्टरूपमुद्रिकायां** हीरोपमः अधिकशोभाविधायित्वात्। **श्रीहीरविजयसूरीणां** विक्रमनृपात् त्र्यशीत्यधिके पञ्चदशशत वर्षे १५८३ मार्गशीर्षशुदि नवमीदिने प्राल्हादनपुरवास्तव्यः श्रीऊकेशज्ञातीय साह **कुंरा** भार्या **नाथी** गृहे जन्म, षण्णवत्यधिके पञ्चदशशतवर्षे १५९६ कार्तिकवदि द्वितीयादिने पत्तननगरे दीक्षा, सप्ताधिके षोडशतवर्षे १६०७ नारदपुर्यां श्रीऋषभदेव प्रासादे पण्डितपदम्, अष्टाधिके षोडशशतवर्षे १६०८ माघसुदिपंञ्चमीदिने नारदपुर्यां श्री वरकाणक-पार्श्वनाथसनाथे श्रीनेमिनाथप्रासादे वाचकपदम्, पञ्चदशाधिके षोडशशतवर्षे १६१५ सीरोहीनगरे सूरिपदं बभूवेति ।

**यस्य सौभाग्यवैराग्यनिःस्पृहत्वादिसद्गुणैः ।**
**रञ्जितः स्तम्भतीर्थस्य व्ययं सङ्घो व्यधादिति ॥ १२॥**

**इतीति किं तदाह—**

**व्याख्यानादिषु कार्येषु कार्येषु वरसूरिभिः ।**
**कोटिमेकां सटङ्कानां तस्मिन्नव्यययत् स्थिते ॥ १३॥**

१२-१३—स श्रीस्तम्भतीर्थवासी सङ्घः तस्मिन् श्रीहीरविजयसूरौ स्थिते एकां टङ्कानां कोटिं अव्ययत् प्रभावनादिभिर्द्रव्यव्ययं चकार । व्ययण् वित्तसमुत्सर्गे चुरादौ अदन्तः परस्मैपदी । केषु व्याख्यानादिषु कार्येषु कर्मसु, कथंभूतेषु वरसूरिभिः कार्येषु।

**यस्य प्रतिपदं पादपद्मन्यासे सदाऽभवत् ।**
**सुवर्णटङ्करूप्यादि नाणकानां प्रमोचनम् ॥ १४॥**

**मुक्ताफलादिभिर्दीव्यैर्बहुमूल्यैः शुभप्रदम् ।**
**रचनं स्वस्तिकानां च पुरतस्सोभिनन्द्रिति । युग्मम् । ॥ १५॥**

बिम्बानि कुन्थुनाथस्य प्रत्यतिष्ठद्य उत्सवात्।
सीरोहीनगरे भाति स हीरविजयो गुरुः ॥ १६॥

तथा नारदपुर्यां यः प्रत्यतिष्ठन्महोत्सवात् ।
जिनबिम्बान्यनेकानि स सूरिर्वर्तते भुवि ॥ १७॥

श्रीस्तम्भतीर्थ-पत्तन-श्रीराजनगरादिषु ।
सहस्त्रशोऽर्हतां बिम्बप्रतिष्ठां सोऽस्ति यो व्यधात् ॥ १८॥

लुङ्कामतपतिर्बुद्धः स ललौ मेघजी ऋषिः ।
दीक्षां नवीनां यस्याग्रे स सूरिर्भुवि भासते ॥ १९॥
श्रीमत्यहम्मदावादनगरे नगरोत्तमे ।
ज्ञात्वा लुङ्कामतैश्वर्यमिति दुर्गतिकारणम् ॥ २०॥

आधिपत्यं च दीक्षां च त्यक्त्वा लुङ्कामतस्य हि।
साधुभिः पञ्चविंशत्या संयुतोऽर्हन्मतौ रतः ॥ २१॥

सूरिसेवैकचितोऽदात् पातिसाहिरकब्बरः ।
स्ववादित्राण्यनेकानि यस्य दीक्षामहोत्सवे ॥ २२॥

—चतुर्भिर्विशेषकम् ॥

१९-२२ — स सूरिः श्रीहीरविजयसूरिर्भुवि भासते शोभते । स कः यस्य श्री हीरविजयसूरेरग्रे स मेघजी ऋषिर्नवीनां दीक्षां ललौ । कथंभूतो मेघजीऋषिः लुङ्कामतपतिः । पुन कथंभूतो मेघजीऋषिर्बुद्धः प्रतिबुद्धः अर्हत्प्रतिमापूजावन्द-नादीनामाम्नानात् । किं कृत्वा ? लुङ्कामतैश्वर्यं दुर्गतिकारणमिति ज्ञात्वा । क्व द्रीक्षां ललौ ? श्रीमति अहम्मदावादनगरे । कथंभूते नगरोत्तमे । पुनः किं कृत्वा हि निश्चितं लुङ्कामत्तस्य आधिपत्यं पुनर्दीक्षां त्यक्त्वा । पुनः कथं० मेघजीऋषिः । पञ्चविंशत्या साधुभिः संयुतः । पुनः कथं० अर्हन्मतौ रतः अर्थात् अर्हत्प्रतिमाया अस्तित्वपूजनप्रणमनादीनङ्गीकरणे रतः । स कः ? यस्य मेघजीऋषेर्दीक्षा महोत्सवे **अकब्बर** पातिसाहिः अनेकानि स्ववादित्राण्यदात्। कथं० अकब्बरपातिसाहिः सूरिसेवैकचितः-सूरेः श्रीहीरविजयसाम्नो भट्टारकस्य सेवायां एकं चित्तं यस्य स तथा । मेघजी ऋषिरित्यत्र ऋत्इत्यक इति प्रकृतिभावः।

ख्यातोऽवदात एतादृक् श्रुतपूर्वो न कस्यचित्।
तमवाप यदा सूरिरासील्लोके तदाद्भुतम् ॥ २३॥

यदीयोपशमादीनां गुणानां सत्यवर्णनाम् ।
प्रधानपुरुषैः प्रोत्कमशृणोदेकदा तदा ॥ २४॥

कालेऽस्मिन्नीदृशः कः स्यादिति चित्ते चमत्कृतः।
तदेत्यचिन्तयच्चित्ते पातिसाहिरकब्बरः ॥ २५॥ [ -युग्मम् ।

इत्यचिन्तयत्-इतीति किं तदाह—

तमाकार्य निरीक्षेय परीक्षेय च तद्गुणान् ।
पृच्छेयं च वृषः कीदृक् ततो वन्देय भक्तितः ॥ २६॥

सोऽभ्यपृच्छत्तदा चैवं प्रधानपुरुषान्प्रति ।
विचरत्यधुना कुत्र क्व च तिष्ठति तद्वद ॥ २७॥

ते प्राहुस्तद्वचःप्रीता इति प्राञ्जलयस्तदा ।
गन्धारबन्दिरे स्वामिन्, सूरिर्वसति सम्प्रति ॥ २८॥

आकर्ण्येत्युभयाकर्णि जातरोमाञ्चिताङ्गरुक् ।
कदागच्छेत्कदा तं च देयौत्सुक्यतस्त्विति ॥ २९॥

फुरमानं तदाहूत्यै लेखयामि तदाद्भुतम् ।
स्वीयनामाङ्कितं सत्यमिति चित्ते व्यचिन्तयत् ॥ ३०॥

लेखयित्वा तदा दिव्यं सकाशात्स्वनियोगिनः।
फुरमानं घनामानबहुमानमनोहितम् ॥ ३१॥

आज्ञाविधायिनो विज्ञान्स प्रेष्यान् प्रेषयत्तराम्।
तेषां पाणौ च दत्त्वाशु प्रति गन्धारबन्दिरम् ॥ ३२॥

ततश्च तत्र ते गत्वा नत्वा तं भ्रमरायितम् ।
विदधुस्तत्कराम्भोजे फुरमानं मनोहरम् ॥ ३३॥

ततः प्रतीमनाः सूरिः फुरमानमवाचयत् ।

गन्धारबन्दिरश्रीमत्सर्वसङ्घसमक्षकम् ॥ ३४॥

तदा सङ्घो हृदानन्दत् श्रुत्वा तल्लिखितं वचः।
प्रेष्येभ्यश्च ददौ द्रव्यं वाञ्छितं जीवितोचितम् ॥ ३५॥

बुबोधयिषया तस्य सङ्घमापृच्छ्य सोऽचलत्।
साधुभिः सह सच्छूरैर्भूपवद्दिग्जिगीषया ॥ ३६॥

साधयन् द्विषतो लोकान् श्राद्धांश्च प्रतिबोधयन्।
स्थापयन् सुकृते स्वीयानन्यांश्चोत्थापयन्नघात् ॥ ३७॥

३७ — तत्र **गन्धार**बन्दिरे; तं **श्रीहीरविजय**सूरिं । तस्य **श्रीहीरविजय**सूरेः कराम्भोजं करकमलं तत्कराम्भोजं तस्मिन् । तस्मिन् पातिसाहाव**कब्बरे** । तस्य पातिसाहेरकब्बरस्य बुबोधयिषा धर्मादौ बोधयितुमिच्छा तया बुबोधयिषया ॥ किं कुर्वन् द्विषतो लोकान् प्रतिवादिनो जनान् साधयन्; चः पुनः श्राद्धान् अर्थात् अपरपरशासनधर्मान् सिद्धान्तानुसारेण स्वमुखप्ररूपितधर्मं श्रद्धावतो लोकान् प्रतिबोधयन् ज्ञापयन् । पुनः किं कुर्वन् । स्वीयान् प्रस्तावान् स्वमुखप्ररूपितधर्मकारिणो निजान् लोकान् सुकृते धर्मे स्थापयन् । पुनः किं० ? चः पुनः अन्यान् प्रमारादिकान् राजादीन् माहेश्वरादिधर्मकारिणो वा लोकान् अघात् पापात् द्वीन्द्रियादिपञ्चेन्द्रियजीवव्यापादनलक्षणात् उत्थापयन् प्रायश्चित्तालोचनादिना निवारयन् इत्यर्थः । भूपपक्षे द्विषतो लोकान् वैरिणो जनान् श्राद्धान् अर्थात्स्वसेवाज्ञाकरणे श्रद्धावतः सेवकान्, न्याये प्रवर्तध्वं अन्यायान्नि-वर्तध्वमिति प्रतिबोधयन् ज्ञापयन्, स्वीयान् आत्मीयान् प्रस्तावात् पुत्रादीन् सगोत्रान् सुकृते राज्यसम्बन्धिनि प्रधानकर्मणि पुण्ये वा स्थापयन्, अन्यान् पुत्रादिसगोत्रेभ्योऽपरान् ग्रामनगरवासिनो जनान् अघात् चौर्याब्रह्मचर्यादिलक्षणात् पापात् उत्थापयन् दण्डादिदानेननिराकुर्वन् इत्यर्थः ।

विहरन् स क्रमेणैवं जिनवत्समवासरत् ।
आगरानगराभ्यर्णे फत्तेपुरपुरे बहिः ॥ ३८॥

एकीभूय ततः सङ्घस्तत्रत्योऽतिमहोत्सवात् ।
गत्वा चाभिमुखं नत्वा पुरान्तस्तं समानयत् ॥ ३९॥

धर्मोपदेशदानेन ततोऽमृतसदृग्गिरा ।
सूरिस्तांस्तोषयामास दातेव जगतो जनान् ॥ ४० ॥

पातिसाहिं तदैवैवमबलफजलोऽवदत् ।
पातिसाहिप्रधानानां शिरस्सु सुशिरोमणिः ॥ ४१ ॥

य आहूतस्त्वया सूरिः, स साम्प्रतमिहागतः ।
पातिसाहिरिति श्रुत्वा, ब्रवीति स्मेति तं मुदा ॥ ४२ ॥

अन्तरानय तं त्वं प्राक् यथा वन्देय भक्तितः ।
सिद्ध्येच्च सर्वथा सद्यो मदीयोऽयं मनोरथः ॥ ४३ ॥

तदोपाध्यायशार्दूल-विमलहर्षमुख्यकैः ।
साधुभिः सहित सूरिः पातिसाहिं मुदामिलत् ॥ ४४ ॥

आस्थानमण्डपे स्वीयेऽभ्युपवेश्य च तं गुरुम् ।
प्रणम्य प्राञ्जलीभूय सोऽभ्यपृच्छदिति स्फुटम् ॥ ४५ ॥

इतीति किं ? तदाह—

स्वागतं स्वागतं स्वीये काये शिष्यादिकस्य च ।
सूरिराह तदेत्यस्ति तद्धर्मात्तव चेक्षणात् ॥ ४७ ॥

कीदृशं गौरवं १ धार्मं २ स्वरूपं पारमेश्वरम् ३ ।
कथं चास्मादृशैः पुंभिः प्राप्यतेः परमेश्वरः ॥ ४८ ॥

४८ — गुरोरिदं गौरवं स्वरूपं १ धर्मस्येदं धार्मं स्वरूपं २ परमेश्वरस्येदं पारमेश्वरं स्वरूपं ३ एतेषु त्रिष्वपि तस्येदमित्यण् प्रत्ययः ।

इत्यादि धर्मसम्बन्धी विचारश्चतुरोचितः ।
श्रीमता साहिना प्रष्टुमारेभे च परस्परम् ॥ ४९ ॥

तदाऽवादीदिदं वादी स्याद्वादी प्रतिवादिनम् ।
एतत्स्वरूपं प्राप्तिं च, शृणु त्वं पारमेश्वरीम् ॥ ५० ॥

५० — वादी श्रीहीरविजयसूरिः तदा प्रतिवादिनं पातिसाहिं अकब्बरमिदमवादीत् । इदमिति किं ? एतत्स्वरूपं एतेषां गुरु-धर्म-परमेश्वराणां

स्वरूपं एतत्स्वरूपं तत्कर्मतापन्नम् । चः पुनः पारमेश्वरीं परमेश्वरस्य प्राप्तिं च लाभं त्वं पातिसाहे! अकबर! शृणु ।

तद्यथा–दर्शनानि हि षट् सन्ति सन्ति तद्गुरवोऽ षट् ।
शासनान्तरभेदेन गुरवो बहवोऽपि च ॥ ५१॥

बुद्धेशानादयस्तेषां देवास्तद्गुरवोऽपि च ।
विषयादौ सदा सक्ताः सम्यग् जानाति तान् भवान् ॥५२॥

धर्मोऽपि तादृशस्तेषां विषयादौ प्रवर्तनात् ।
तपस्सु च फलादीनामाहारान्निशि भोजनात् ॥ ५३॥

–इत्यपरशासने गुरोर्धर्मस्य च स्वरूपम् ।

तेषां मध्यादिमं जैनं धर्मं शुश्रूषसि प्रभो ! ।
श्रोतुं तं च त्वमर्होऽसि मां ब्रुवन्तं च तं शृणु ॥५४॥

साधुश्रावकभेदाभ्यां धर्मोऽयमुदितो द्विधा ।
पञ्चव्रतो यतीनां स्यात्, श्राद्धानां द्वादशव्रतः ॥ ५५॥

इति सत्यपि भेदेऽस्मिन् सर्वसाधारणः खलु ।
धर्मोऽभिप्रेत एवायमहिंसा १ संयमः २ तपः ३ ॥५६॥

धर्मोऽयं तीर्थकृतप्रोक्तो दायी स्वर्गापवर्गयोः ।
क्रियमाणः सदा लोकैरेतद्दोषविवर्जितः ॥ ५७॥

—इति धर्मस्वरूपम् ।

जीवलोकस्य यो बन्धुर्दुर्गत्यम्बुधिपारगः ।
ज्ञानादिना महाभागो गुरुः स शिवसाधकः ॥ ५८॥

क्षीरास्रववचा नित्यं मध्वास्रववचा ध्रुवम् ।
शिक्षां धर्मोपदेशं च यो दत्ते स गुरुर्मतः ॥ ५९॥

५९ — चक्रवर्तिसम्बन्धिनो गोलक्षस्य भक्षितेक्षुक्षेत्रस्य आदिविशेषस्य अर्धार्धक्रमेण पीतगोक्षीरस्य पर्यन्ते यावदेकस्या गोः सम्बन्धि यत्क्षीरं तदिव

माधुर्यरसं आस्रवति मुञ्चतीति क्षीरास्रवं, एवंविधं वचो वचनं यस्य सः क्षीरास्रववचाः । मधुशर्करादि मधुर द्रव्यं तत् आस्रवति मध्वास्रवं एवंविधं वचो यस्य च मध्वास्रववचाः ।

दुर्जेयान् विषयान् सर्वान् कषायांश्च गृहंगृहाः ।
य उज्झति मनोहर्षविषादौ स गुरुर्भवेत् ॥ ६० ॥

त्यक्त्वा वैरं विरोधं दौषानष्टादशापि च ।
प्रसन्नवदनो यः स्यात् स गुरुः सद्गुणः स्मृतः ॥ ६१ ॥

—इति गुरुस्वरूपम् ।

रागद्वेषौ सदा हन्ति दुष्टकर्माष्टकद्विषः ।
विषयान् यः कषायांश्च स भवेत् परमेश्वरः ॥ ६२ ॥

त्यक्त्वा राज्यं विदध्याद्यस्तपश्चरणमुत्तरम् ।
लब्ध्वा च केवलज्ञानं श्रयेत्स शिवमीश्वरः ॥ ६३ ॥

दीपज्योतिरिवान्योऽन्यं सम्मिलितपृथक् स्थितः ।
ज्योतिरूपं चिदानन्दं धरन् भायात्स ईश्वरः ॥ ५४ ॥

— इति परमेश्वरस्वरूपम् ।

दयासंयमसंयुक्ते तपश्चरणतोऽचिरात् ।
साक्षात्पुण्यात्मभिः पुंभिः प्राप्यते परमेश्वरः ॥ ६५ ॥

— इति परमेश्वरप्राप्तिः ।

वाक्यैरित्यादिभिस्तत्त्वं प्रत्यबोध्यत तेन सः ।
मृष्टैर्मध्वास्रवैः स्पष्टैः क्षीरास्रवघृतास्रवैः ॥ ६६ ॥

अभरत्सूरिः पाथोदस्तद्हृदयसरस्तदा ।
गुरुधर्मश्वरास्तित्वज्ञानाङ्गीकारवारिणा ॥ ६७ ॥

६७ — तद्हृदयं तस्य पातिसाहेरकब्बरस्य हृदयमेव सरस्तसद्धृदयसरः तद्धृदयं अकब्बरपातिसाहिहृदयं रसैः पानीयैरित्यर्थ ।

तद्धृदयं सरोरम्यं सूरिर्मेघ इवाभरत् ।
गुरुधर्मश्वरास्तित्व-ज्ञानाङ्गीकृतिभी रसैः ॥ ६८ ॥

अनेकच्छेकसूरीन्द्रसाधुश्रावकपक्षिभिः ।
सेव्यमानं तदा दीव्यत् तद्धर्मजललब्धये ॥ ६९ ॥

आगरानगराद् यावदजमेरपुरं पथि ।
मनारान् कूपिकोपेतान् प्रतिक्रोशमकारयत् ॥ ७० ॥

स्वकीयमृगयारङ्गत्कलाकुशलतां जनान् ।
ज्ञापयितुं मृगानेकशृङ्गध्वजविराजितान् ॥ ७१ ॥

पापीयानीदृशोऽनेकजीवहिंसापरायणः ।
अभवत्स पुर नित्यं रूपभृत्पापमेव यत् ॥ ७२ ॥

—**त्रिभिर्विशेषकम्** ॥

७०-७२ — स अकब्बरपातिसाहिः **आगरानगरात् अजमेरनगरं** यावत् मार्गे प्रतिक्रोशं कूपिकोपेतान् मंनारान् कारयित्वा स्वकीयाखेटककलाकौशल्यप्रकटनकृते प्रतिमनारं शतशोहरिणविषाणरोपणकारणादिना प्रथमतो जन्तु जातव्याघातसंजातचेतोरतिः स भूपतितत्रिपतिः श्री अकब्बरपातिसाहिः हीरविजयसूरिसद्गुरोर्योगतः सम्बन्धात् अधुना दयादानानगरादिसंगरंगो बभूव ।

हीरविजयसूरीन्द्रसद्गुरोर्योगतोऽधुना ।
दयादानानागरादिसङ्गरङ्गो बभूव सः ॥ ७३ ॥

सद्गुरौ जिनधर्मे च प्रीतचेतास्ततोऽथ सः ।
इत्याह जगदाश्चर्यकारणं श्रीगुरुं प्रति ॥ ७४ ॥

ग्रामान् द्रङ्गान् गजानश्वान् द्रव्याणि प्रचुराणि च ।
तदाभ्यहं गृहाण त्वमिति चानुगृहाण भोः ॥ ७५ ॥

गुरुराह ततो-भूप, त्यक्त्वैतान् सत आलये ।
भिक्षे वस्तूचितं युक्तो नैतेषां संग्रहो मम ॥ ७६ ॥

धन्योऽयं निःस्पृहः सर्वसांसारिकसुवस्तुषु ।
स्वोचितं वस्तु यल्लाति, स तदेति व्यचिन्तयत् ॥ ७७ ॥

ततः पुनरिति स्वीये हृद्यालोचयति स्म सः ।
एतद्योग्यं गृहे मेऽस्ति पुस्तकं तद्ददाम्यहम् ॥ ७८ ॥

विचार्यैवं तदा चित्ते कृत्त्वा च प्रचुराग्रहम् ।
ददौ श्रीगुरवे दिव्यं सिद्धान्तादिकपुस्तकम् ॥ ७९ ॥

पुत्रे मित्रे कलत्रे च धनस्वजनभूघने ।
ग्रामे द्रङ्गे गजादौ च निरीहाय महात्मने ॥ ८० ॥

—युग्मम् ।

स जग्राहाग्रहात्पुस्तं तस्यानुग्रहहेतवे ।
नीरागोऽपि निरीहोऽपि धर्मलाभाय भूयसे ॥ ८१ ॥

ततः सूरिः समादाय तदा तच्छस्तपुस्तकम् ।
आगरानगरेऽमुञ्चच्छास्त्रकोशतयालयात् ॥ ८२ ॥

साधिकप्रहरं यावत्तत्रैकत्रोपविश्य च ।
गोष्ठीं धर्मस्य तौ कृत्वा मिथस्तुतुषतुस्तराम् ॥ ८३ ॥

श्रीसाहिसमनुज्ञातस्ततः सूरिः समाययौ ।
उपाश्रये सहानेकलोकैराडम्बरोत्सवैः ॥ ८४ ॥

ततश्च सकले लोके जज्ञे प्रवचनोन्नतिः ।
यत्स्यात्स्फातिमदानन्दि सतां चानुपदं महः ॥ ८५ ॥

८५ — अत्र स्फातिरयं शब्दः दन्त्यपवर्गद्वितीयस्वरादिः स्फायैङ् वृद्धौ भ्वादिरात्मनेपदी । अस्मात् स्फायः स्फी वा इति सूत्रेण क्तयोः परतः स्फी इत्ययं दन्त्यपवर्गद्वितीयचतुर्थस्वरोपेत आदेशो विकल्पेन भवेत् । स्त्रियां क्तिरिति क्तिप्रत्यये तु निषेधस्तेन द्वितीयस्वरादिरेव । अथ स्फातिर्वृद्धौ इति हेमकोशे ।

तस्मिन्वर्षे चतुर्मासीकरणानन्तरं मुदा ।
आगरानगरात्सोरीपुरेऽगात् सूरिरुत्तमः ॥ ८६ ॥

नेमिनाथजिनेन्द्रस्य यात्रया तत्र पूतया ।
साधुश्राद्धैः सहानेकैः पवित्रात्माऽथ सोऽभवत् ॥ ८७॥

तत्र श्रीनेमिनाथस्य प्रतिमाद्वितयं तदा ।
तत्कालनिर्मितश्रीमन्नेम्यर्हत्पादुकायुतम् ॥ ८८॥

प्रत्यतिष्ठत स सूरिश्च श्रेष्ठो ज्येष्ठप्रतिष्ठया ।
श्रीसङ्घविहितानन्तगीतमानादिकोत्सवैः ॥ ८९॥

आगरानगरे स्वर्णटङ्कादिव्ययतस्ततः ।
न कदापि पुरैतादृग्जाताज्जाग्रन्महोत्सवात् ॥ ९०॥

श्रीमानसिंह-कल्याणमल्लकारितमद्भुतम् ।
स चिन्तामणिपार्श्वादेः प्रत्यस्थात्प्रतिमोच्चयम् ॥ ९१॥

९०-९१ — ततः श्री सोरीपुरे श्री नेमिनाथतीर्थङ्करस्य यात्रा नवीनप्रतिमा-पादुकानां प्रतिष्ठाकरणात् । स श्री हीरविजयसूरिः श्रीचिन्तामणि-पार्श्वादेः प्रतिमोच्चयं प्रतिमासमूहं प्रत्यस्थात् प्रत्यतिष्ठत इत्यर्थः । कस्मात् ? जाग्रन्महोत्सवात् । कथं भूतात् पुरा पूर्वं कदापि एतादृग् जातात् तादृग् जात इतीदं सुपेति समासत्वात् समासान्तमेकपदम् । कस्माज्जाग्रन्महोत्सवात् स्वर्णटङ्कादिव्ययतः स्वर्णटङ्कादिव्ययः तस्मात् ।

प्रादुरासीत्ततस्तत्र तत्तीर्थं भुवि विश्रुतम् ।
जाग्रत्प्रभावं सर्वेषां मनोवाञ्छितदानतः ॥ ९२॥

ततः पुनरपि श्रीमत्फत्तेपुरपुरे वरे ।
समागत्यामीलत्प्रीत्या साहिना सह सद्गुरुः ॥ ९३॥

तस्मिन्नवसरे यावदेकप्रहरमादरात् ।
धर्मवार्तां विधायैवं श्रीसाहिस्तमभाषत ॥ ९४॥

द्रष्टुं त्वद्वदनाम्भोजमत्युत्कण्ठितमानसः ।
दूरदेशात् समाहूय जातोऽहं धर्मतत्परः ॥ ९५॥

यन्मदीयं प्रदत्तं न गृह्णासि किमपि प्रभो ।
मच्छ्काशाच्च तेन त्वमुचितं प्रार्थयाधुना ॥ ९६ ॥

सुकृतार्थः कृतार्थश्च भवानिव भवानि व ।
सर्वथा न वृथा सूरे यतस्वात्र यथा तथा ॥ ९७ ॥

९७ — हे सूरे यथा येन प्रकारेण भवानिव भवद्वत् सुकृतार्थः सुकृतं पुण्यमेवार्थः प्रयोजनं यस्य स तथा । चः समुच्चये कृतार्थः कृतः सर्वप्रयोजनो भवानि व तथा तेन प्रकारेण यतस्व यतनं कुरु । अत्र अस्मिन् वाक्ये अस्यां विज्ञप्तौ सर्वथा सर्वैः प्रकारैर्न वृथा न कूट मित्यर्थः । अत्र वकारोऽव्ययं पादपूरणे, अव्ययानामनेकार्थत्वात् । यथा भवान् सुकृतार्थः पुण्यार्थी मां प्रतिबोध्य कृतार्थः तथा अहमपि भवदुचितं भवन्मार्गितं कृत्वा सुकृतार्थः कृतार्थश्च भवानीत्यभिप्रायः।

ततः सूरीश्वरश्चित्ते विचिन्त्यैवं तमब्रवीत् ।
सर्वविश्वम्भराधीशशिरश्चूडामणीयितम् ॥ ९८ ॥

विश्वम्भरायां सर्वेषु तव देशेषु सर्वदा ।
श्रीमत्पर्युषणापर्वाष्टाह्निकायां महीपते ॥ ९९ ॥

प्रवर्तनममारेश्च बन्दिलोकस्य मोचनम् ।
विधेहीति ततः साहिरिति चित्ते चमत्कृतः ॥ १०० ॥

अहो निर्लोभतैतस्य शान्तता च दयालुता।
अकिञ्चनोऽपि किञ्चिन्न मामयाचीद् धनादि यत् ॥ १०१ ॥

श्रीसाहिराह चत्वारो दिवसा अधिका मम ।
उपरिष्टात्त्वदुक्तस्य भवन्तु सुकृतश्रियै ॥ १०२ ॥

हृद्यं सद्य इति प्रोद्य साहिरुत्साहपूरितः ।
द्वादशदिवसामारि-फुरमानानि षट् तदा ॥ १०३ ॥

काञ्चनरचनायुञ्जि स्वीयनामाङ्कितानि च ।
त्वरितं लेखयित्वैव प्रददौ सद्गुरोः करे ॥ १०४ ॥

स्वीयसाधितदेशेषु सर्वेषु वसुधातले ।
श्रावणवदिपक्षस्य प्रारभ्य दशमीदिनात् ॥ १०५ ॥

मासि भाद्रपदे शुक्लषष्ठीं यावन्न कश्चन ।
जीवव्यापादनं कुर्यादिति तेषु व्यलेखयत् ॥ १०६ ॥

एषां व्यक्तिं पुनश्चैवं शृण्वन्तु श्रावका इमाम् ।
पूर्वं गूर्जरदेशस्य, द्वितीयं मालवस्य हि ॥ १०७ ॥

तृतीयमजमेरस्य, फुरमानं मनोहरम् ।
दिल्लीफत्तेपुराख्यस्य, देशस्य तु चतुर्थकम् ॥ १०८ ॥

लाहोरमुलतानाख्यदेशस्य खलु पञ्चमम् ।
एतानि पञ्चदेशेषु, पञ्चसु प्रेषणाय हि ॥ १०९ ॥

देशपञ्चकसम्बन्धि षष्ठं श्रेष्ठावलोकनम् ।
सकाशे सूरिराजस्य रक्षणाय चिराय हि ॥ ११० ॥

–चतुर्भिः कलापकम्

तत्तद्देशेषु पञ्चानां तेषां द्राक् प्रेषणेन च ।
अमारिपटहोद्घोषमेघोऽवर्षत्तरां वरः ॥ १११ ॥

अज्ञाप्रमाननामातः कृपावल्ली महीतले ।
आर्यानार्यकुलोल्लासिमण्डपेष्वैधताऽचिरात् ॥ ११२ ॥

मोचनं बन्दिजन्तूनामङ्गीकृत्य गुरूदितम् ।
श्रीसाहिः सूरिराजस्य पार्श्वादुत्थाय हर्षतः ॥ ११३ ॥

तदैवानेकागव्यूतमिते डम्बरनामके ।
महासरसि गत्वात्मशस्तहस्तेन धर्मधीः ॥ ११४ ॥

देशान्तरीयसल्लोकढौकितान् पक्षिणो धनान् ।
कारागारस्थलोकांश्च मुमोच वचने दृढः ॥ ११५ ॥

—त्रिभिर्विशेषकम् ।

एवं चानेकशः श्रीमत्साहेर्मिलनतो गुरुः ।
चैत्योपाश्रयरक्षायै फुरमानान्यकारयत् ॥ ११६ ॥

तेषां विधापनादासीत्प्रवचनप्रभावना ।
तदुत्पन्नश्च यो लाभः स्तोतुं शक्नोति तं च कः ॥ ११७ ॥

तस्मिन् क्षणे सदारङ्गश्राद्धस्तद्गुणरञ्जितः ।
मेडतीयो ददौ दानमीदृशं यस्य दर्शनात् ॥ ११८ ॥

द्विपञ्चाशत्तुरङ्गान् सन्मूर्तिमद्धस्तिनं नवम् ।
वस्त्रप्रभृतिवस्तूनि बहूनि बहुशां ददौ ॥ ११९ ॥

दिल्लीदेशे समस्तानां श्राद्धानां श्रद्धयान्वितः ।
द्विसेरप्रमितां खण्डलम्भनीं च गृहं प्रति ॥ १२० ॥

दिव्यावदाताः श्रीसूरेरीदृशाः सन्त्यकेधा ।
ग्रन्थविस्तरभीत्या तान् नेहावोचं यतोऽलसः ॥ १२२ ॥

卐




ખંભાત



પાટણ



વેરાવળ



સક્કરપુર - ખંભાત



સક્કરપુર - ખંભાત

१०

श्री धर्मसागरउपाध्यायरचित तपागच्छपट्टावलीगत

# श्रीहीरविजयसूरिसंदर्भः

**सिरिहीरविजयसूरि ५८, संपइ तवगणदिणिंदसमा ॥ १९ ॥**

५८ अडवण्णेत्ति, **श्रीविजयदानसूरि**पट्टेऽष्टपञ्चाशत्तमाः **श्रीहीरविजयसूरयः**। किं विशिष्टाः ? संप्रति तपागच्छे आदित्यसदृशास्तदुद्योतकत्वात् । तेषां विक्रमतः त्र्यशीत्यधिके पञ्चदशशतवर्षे १५८३ मार्गशीर्षशुक्लनवमीदिने **प्रह्लादनपुर**वास्तव्यऊकेशज्ञातीय सा० **कुंराभार्यानाथी**गृहे जन्म, षण्णवत्यधिके १५९६ कार्तिकबहुलद्वितीयायां २ **पत्तन**नगरे दीक्षा, सप्ताऽधिके षोडशशतवर्षे १६०७ **नारदपुर्यां** श्रीऋषभदेवप्रासादे पण्डितपदम् । अष्टाधिके १६०८ माघशुक्लपञ्चमीदिने नारदपुर्यां **श्रीवरकाणकपार्श्वनाथ**सनाथे श्रीनेमिनाथप्रासादे वाचकपदम्। दशाधिके १६१० **सीरोहीनगरे** सूरिपदम् ॥

तथा येषां सौभाग्यवैराग्यनिःस्पृहतादिगुणश्रेणेरेकमपि गुणं वचोगोचरीकर्तुं वाचस्पतिरप्यचतुरः । तथा **स्तम्भतीर्थे** येषु स्थितेषु तत्रत्य श्रद्धालुभिः टङ्कानामेका कोटिः प्रभावनादिभिर्व्ययीकृता । येषां चरणविन्यासे प्रतिपदं सुवर्णटङ्करूप्यनाणकमोचनं पुरतश्च मुक्ताफलादिभिः स्वस्तिकरचनं प्रायस्तदुपरि च रौप्यकनाणकमोचनं चेत्यादि संप्रत्यपि प्रत्यक्षसिद्धम् ॥

यैश्च **सीरोह्यां** श्रीकुन्थुनाथबिम्बानां प्रतिष्ठा कृता । तथा **नारदपुर्यां**मनेकानि जिनबिम्बानि प्रतिष्ठितानि । तथा **स्तम्भतीर्थाऽहम्मदावादपत्तन**नगरदौ अनेकटङ्कलक्षव्ययप्रकृष्टाभिरनेकाभिः प्रतिष्ठाभिः सहस्रशो बिंबानि प्रतिष्ठितानि । येषां च विहारादौ युगप्रधानसमानाऽतिशयाः प्रत्यक्षसिद्धा एव ॥

तथाऽ**हम्मदावाद**नगरे लुङ्कामताऽधिपतिः **ऋषिमेघजी**नामा स्वकीयमताऽऽधिपत्यं "दुर्गतिहेतु" रिति मत्वा रज इव परित्यज्य पञ्चविंशतिमुनिभिः सह सकलराजाधिराजपातिसाहि-**श्रीअकब्बर**राजाज्ञापूर्वकं तदीयाऽऽतोद्यवादनादिना महामहपुरस्सरं प्रव्रज्य यदीयपादाम्भोजसेवापरायणो जातः । एतादृशं च न कस्याऽप्याऽऽचार्यस्य श्रुतपूर्वम् ।

किञ्च । येषामशेषसंविग्नसूरिशेखराणामुपदेशात् सहस्रशो गजानां लक्षशो वाजिनां **गूर्जर-मालव-विहार-अयोध्या-प्रयाग-फतेहपुर-दिल्ली-लाहुर-मुलतान-क्याबिल-अजमेर-बङ्गाला**द्यभिधानानामनेकदेशसमुदायात्मकानां द्वादशसूबानां चाऽधीश्वरो महाराजाधिराजशिरःशेखरः पातिसाहि**श्रीअकब्बर**नरपतिः स्वकीयाऽखिलदेशेषु षाण्मासिकाऽमारिप्रवर्तनं जीजयाऽभिधानकरमोचनं च विधाय सकललोकेषु जाग्रत्प्रभावभवनं श्रीमज्जिनशासनं जनितवान् । तद् व्यतिकरो विस्तरतः **श्रीहीरसौभाग्यकाव्या**दिभ्योऽवसेयः । समासतस्त्वेवम् ।

एकदा कदाचित् प्रधानपुरुषाणां मुखवार्त्तया श्रीमद्गुरूणां निरुपमशमदमसंवेगवैराग्यादिगुणगणश्रवणतश्चमत्कृतचेतसा पातिसाहि-**श्रीअकब्बरेण** स्वनामाङ्कितं फुरमानं प्रेष्याऽतिबहुमानपुरस्सरं **गन्धार**बंदिरात् **दिल्ली**देशे **आगराख्यनगरासन्नश्रीफतेपुर**नगरे दर्शनकृते समाकारिताः सन्तोऽनेकभव्यजनक्षेत्रेषु बोधिबीजं वपन्तः श्रीगुरवः क्रमेण विहारं कुर्वाणाः विक्रमत एकोनचत्वारिंशदधिकषोडशशतवर्षे १६३९ ज्येष्ठबहुलंत्रयोदशीदिने तत्र संप्राप्ताः । तदानीमेव च तदीयप्रधानशिरोमणि-शेष(ख)**श्रीअबलफजला**ख्यद्वारा उपाध्याय**श्रीविमलहर्षगणि**प्रभृत्यनेकमुनिनिकरपरिकरिताः श्रीसाहिना समं मिलिताः । तदवसरे च श्रीमत्साहिना सादरं स्वागतादि पृष्ट्वा स्वकीयास्थानमण्डपे समुपवेश्य च परमेश्वरस्वरूपं, धर्मस्वरूपं च कीदृशं कथं च परमेश्वरः प्राप्यत इत्यादि धर्मगोचरो विचारः प्रष्टुमारेभे । तदनु श्रीगुरुभिरमृतमधुरया गिराऽष्टादशदोषविधुरपरमेश्वर-पञ्चमहाव्रतस्वरूपनिरूपणादिना तथा धर्मोपदेशो ददे यथा **आगरा**द्रङ्गतो**ऽजमेर**नगरं यावदध्वनि प्रतिकोशं कूपिकोपेतमनारान्विधाय स्वकीयाखेटककलाकुशलताप्रकटनकृते प्रतिमनारं शतशो हरिणविषाणारोपणविधानादिना प्रागहिंसादिकरणरतिरपि स भूपतिर्दयादानयतिसङ्गतिकरणादिप्रवणमतिः सञ्जातः ।

ततोऽतीवसन्तुष्टमनसा श्रीसाहिना प्रोक्तम्-यत् पुत्रकलत्रधनस्वजनदेहादिषु निरीहेभ्यः श्रीमद्भ्यो हिरण्यादिदानं न युक्तिमत् । अतो अस्मदीयमन्दिरे पुरातनं जैनसिद्धान्तादिपुस्तकं समस्ति, तल्लात्वाऽस्माकमनुग्रहो विधेयः । पश्चात् पुनः पुनराग्रहवशात् तत्समादाय श्रीगुरुभिः **आगराख्य**नगरे चित्कोशतयाऽमोचि । तत्र साधिकप्रहरं यावद्धर्मगोष्ठीं विधाय श्रीमत्साहिना समनुज्ञाताः श्रीगुरवो महताडम्बरेण उपाश्रये समाजग्मुः । ततः सकलेऽपि लोके प्रवचनोन्नतिः स्फीतिमती सञ्जाता।

तस्मिन् वर्षे **आगराख्यनगरे** चतुर्मासककरणान्तरं **सुरीपुरे** श्रीनेमिजन्मयात्राकृते समागतैः श्रीगुरुभिः **पुरातनयोः श्रीऋषभदेव-नेमिनाथ**सम्बन्धिन्योर्महत्योः प्रतिमयोस्तदानीमेव निर्मितश्रीनेमिजिनपादुकायाश्च प्रतिष्ठा कृता । तदनु **आगराख्यनगरे** सा० **मानसिंहकल्याणमल्ल**कारित**श्रीचिन्तामणिपार्श्वनाथादि**-बिम्बानां प्रतिष्ठा शतशः सुवर्णटङ्कव्ययादिना महामहेन निर्मिता । तत्तीर्थं च प्रथितप्रभावं सञ्जातमस्ति ।

ततः **श्रीगुरवः** पुनरपि **फतेपुरनगरे** समागत्य श्रीसाहिना साकं मिलिताः। तदवसरे च प्रहरं यावद्धर्मप्रवृतिकरणानन्तरं श्रीसाहिरवदत् यत् श्रीमन्तो मया दर्शनोत्कण्ठितेन दूरदेशादाकारिताः । अस्मदीयं च न किमपि गृह्यते । तेनाऽस्मत्-सकाशात् श्रीमद्भिः सवित्तं याचनीयं येन वयं कृतार्था भवामः । तत् सम्यग् विचार्य श्रीगुरुभिस्तदीयाऽखिलदेशेषु पर्युषणापर्वसत्काऽष्टाह्निकायाममारिप्रवर्तनं बन्दिजनमोचनं चाऽयाचि, ततो निर्लोभताशान्तताद्यतिशयितिगुणगणातिचमत्कृचेतसा श्रीसाहिना अस्मदीयान्यपि चत्वारि दिनानि समधिकानि भवन्त्विति कथयित्वा स्ववशीतकृतदेशेषु श्रावणबहुलदशमीतः प्रारभ्य भाद्रपदशुक्लषष्ठीं यावदमारि-प्रवर्तनाय द्वादशदिनामारिसत्कानि काञ्चनरचनाञ्चितानि स्वनामाङ्कितानि षट् **फुरमानानि** त्वरितमेव श्रीगुरूणां समर्पितानि । तेषां व्यक्तिः-प्रथमं **गूर्जर**देशीयं, द्वितीयं **मालव**देशसत्कं, तृतीयं **अजमेर**देशीयं, चतुर्थं **दिल्लीफतेपुर**देशसम्बन्धि, पञ्चमं **लाहुरमुलतान**मण्डलसत्कम्, श्रीगुरूणां पार्श्वे रक्षणाय षष्ठं देशपञ्चकसम्बन्धि साधारणं चेति । तेषां तु तत्तद्देशेषु प्रेषणेनाऽमारिपटहोद्घोषणवारिणा सिक्ता सती पुराऽज्ञायमाननामाऽपि कृपावल्ली सर्वत्राऽऽर्याऽनार्यकुलमण्डपेषु विस्तारवती बभूव।

तथा बन्दिजनमोचनस्याऽप्यङ्गीकारपुरस्सरं श्रीगुरूणां पार्श्वादुत्थाय तदैवा-ऽनेकगव्यूतमिते **डाबर**नाम्नि महासरसि गत्वा साधुसमक्षं स्वहस्तेन नानाजातीयानां देशान्तरीयजनप्राभृतीकृतानां पक्षिणां मोचनं चक्रे। तथा प्रभाते कारागारस्थबहुजनानां बन्धनभञ्जनमप्यकारि। एवमनेकशः श्रीमत्साहेर्मिलनेन श्रीगुरूणां धरित्रीमरु-मण्डलादिषु श्रीजिनप्रासादोपाश्रयाणामुपद्रवनिवारणायानेकफुरमानविधापनादिना प्रवचनप्रभावनादिप्रभावो यो लाभोऽभवत् स केन वर्णयितुम् शक्यते ?।

तदवसरे च संजातगुरुतरगुरुभक्तिरागेण **मेडतीय स०** सदारंगेण मार्गणगणेभ्यो मूर्तिमदगजदानद्विपञ्चाशदऽश्वदानलक्षप्रासादविधानादिना, **दिल्लीदेशे** श्राद्धानां प्रतिगृहं सेरद्वयप्रमाणेखण्डलम्भनिकानिर्माणादिना च श्रीजिनशासनोन्नतिश्चक्रे। तथैका प्रतिष्ठा सा० **थानसिंघ**कारिता। अपरा च सा० **दूजणमल्ल**कारिता **श्रीफतेपुर**नगरेऽनेकटङ्कलक्षव्ययादिना महामहोत्सवोपेता विहिता। किञ्च—

प्रथमचातुर्मासक**मागरा**ख्यद्रङ्गे, द्वितीयं **फतेपुरे**, तृतीयम**भिरामाबादे**, चतुर्थं पुनर**प्यागराख्ये** चेति चतुर्मासीचतुष्टयं तत्र देशे कृत्वा गूर्जरदेशस्थ **श्रीविजयसेन**प्रभृतिसंघस्याऽऽग्रहवशात् श्रीगुरुचरणा धरित्रीपवित्रीकरणप्रवणान्तःकरणाः **श्रीशेखूजी-श्रीपादूजी-श्रीदानीआरा**ऽभिधपुत्रादिप्रवरपरिकराणां श्रीमत्साहिपुरन्दराणां पार्श्वे फुरमानादिकार्यकरणतत्परानुपाध्याय**श्रीशान्तिचंद्र**गणिवरान् मुक्त्वा, **मेडता**दिमार्गे विहारं कुर्वाणा **नागपुरे** चतुर्मासीं विधाय क्रमेण **सीरोहीनगरे** समागताः। तत्रापि नवीनचतुर्मुखप्रासादे श्रीआदिनाथादिबिम्बानाम्, श्रीअजितजिनप्रासादे श्रीअजितजिनादिबिम्बानां च क्रमेण प्रतिष्ठाद्वयं विधाय **अर्बुदाचले** यात्रार्थं प्रस्थिताः, तत्र विधिना यात्रां विधाय यावद्धरित्रीदिशि पादावधारणं विदधति तावत् महाराय**श्रीसुलतान**जीक्त **सीरोही**देशे पुरा कराऽतिपीडितस्य लोकस्य अथ पीडां न विधास्यामि, मारिनिवारणं च करिष्यामीत्यादिविज्ञप्तिस्वप्रधानपुरुषमुखेन विधाय श्रीगुरवः **सीरोह्यां** चतुर्मासीकरणायाऽत्याग्रहात् समाकारिताः। पश्चात् तद्राजोपरोधेन, तद्देशीयलोकानुकम्पया च तत्र चतुर्मासीं विधाय क्रमेण **रोहसरोतर**मार्गे विहारं कुर्वन्तः **श्रीपत्तन**नगरं पावितवन्तः। अथ पुरा श्रीसूरिराजैः श्रीसाहिहृदया-ऽऽलवालरोपिता कृपालतोपाध्याय**श्रीशान्तिचंद्र**गणिभिः स्वोपज्ञ**कृपारसकोशाख्य**-श्रावणजलेन सिक्ता सती वृद्धिमती बभूव। तदभिज्ञानं च श्रीमत्साहिजन्म-सम्बन्धी मासः, श्रीपर्युषणापर्वसत्कानि द्वादशदिनानि, सर्वेऽपि रविवाराः, सर्वसंक्रान्तितिथयः, नवरोजसत्को मासः, सर्वे ईदवासराः, सर्वे मिहरवासराः, सोफीआनकवासराश्चेति षाण्मासिकामारिसत्कफुरमानं, जीजीआभिधानकरमोचनसत्कानि फुरमानानि च श्रीमत्साहिपार्श्वात् समानीय **धरित्रीदेशे** श्रीगुरूणां प्राभृतीकृतानीति। एतच्च सर्वजनप्रतीतमेव। तत्र नवरोजादिवासराणां व्यक्तिस्तत्फुरमानतोऽवसेया। किञ्च,

अस्मिन् दिल्लीदेशविहारे श्रीमद्गुरूणां श्रीमत्साहिप्रदत्तबहुमानतः निष्प्रतिमरूपादिगुणगणानां श्रवणवीक्षणतश्चानेकम्लेच्छादिजातीया अपि सद्यो मद्यमांसाशनजीवहिंसनादिरतिं परित्यज्य सद्धर्मकर्मासक्तमतयः, तथा केचन प्रवचनप्रत्यनीका अपि निर्भरभक्तिरतयः अन्यपक्षीया अपि कक्षीकृतसद्भूतोद्भूतगुणततयश्चाऽऽसन्। इत्याद्यनेकेऽवदाताः षड्दर्शनप्रतीता एव।

तथा **श्रीपत्तन**नगरे चतुर्मासककरणादनु विक्रमतः षट्चत्वारिंशदधिकषोडशशत १६४६ वर्षे **स्तम्भतीर्थे** स० **तेजपाल**कारिता सहस्रशो रुप्यकव्ययादिनाऽतीवश्रेष्ठां प्रतिष्ठां विधाय श्रीजिनसासनोन्नतिं तन्वाना श्रीसूरिराजो विजयन्ते ॥ १९ ॥

## ११

### अज्ञातकर्तृक पट्टावल्यन्तर्गत

# हीरविजयसूरिसंदर्भः

**श्रीविजयदानसूरि**पट्टे अष्टपंचाशत्तमः **श्रीहीरविजयसूरिः** । तस्य सं. १५८३ वर्षे **श्रीप्रह्लादपुरवास्तव्यउकेश**ज्ञातीयसाः **कुंरा**भार्या **नाथी**गृहे जन्म। सं. १५९६ वर्षे कार्तिकवदि २ दिने श्री **पाटणनगरे** दीक्षा । सं.१६०२ वर्षे **नारदपुर्यां** पंडितपदं । सं. १६०८ वर्षे माघसुदिपंचमीदिने **नारदपुर्यां** वाचकपदं । सं. १६१० वर्षे **सीरोहीनगरे** सूरिपदं । तथा यैरनेंकनगरेषु सहस्रशो बिम्बानि प्रतिष्ठितानि तथा **अहम्मदावादनगरे ऋषिमेघजीनामा** स्वमतं परित्यज्य पंचविंशतिमुनिभिः सह श्रीगुरुचरणकमलसेवापरो जातः ।

तथा श्रीगुरवः पातिसाहि**श्रीअकब्बरेण** स्वनामाङ्कितं फुरमानं प्रेष्य **गंधारबंदिरात् श्रीआगरा**नगरासन्न**फतेपुरनगरे** समाहूताः संतो विहारं कुर्वन्तः क्रमेण सं. १६३९ वर्षे ज्येष्ठवदि१३ दिने तत्र संप्राप्ताः, श्रीसाहिना समं मिलिताः, साधिकप्रहरं यावत्तत्र धर्मगोष्ठी कृत्वां श्रीसाहिना अनुज्ञाताः संतो महताडम्बरेणोपाश्रये समागताः । तदानीं सकलोपि लोकः **श्रीहीरविजयसूरि**-सेवापरो जातः ।

तस्मिन् वर्षे **आगरानगरे** चतुर्मासकं कृतं तदनु श्रीगुरुभिः **श्रीसोरीपुरयात्रां** च कृत्वा **आगरानगरे** सा.**मानसिंह-कल्याणमल्ल**कारित श्रीचिन्तामणि-पार्श्वनाथबिम्बं प्रतिष्ठितं । पुनरपि **फत्तेपुरनगरे** समागत्य श्रीसूरयः पातिसाहिना साकं मिलिताः । तदवसरे धर्मवार्त्तया रञ्जिताः । पातिसाहिः द्वादशदिवसा-मारिसत्कं फुरमानं स्वनामाङ्कितं श्रीगुरूणां दत्तवान् । तदा च श्रीजिनधर्मोन्नति-र्महती जाता । तदवसरे च सा. मेडतीय **सदारङ्गेण** याचकेभ्यो मूर्त्तिमद्गजदान द्विपञ्चाशदश्वदानादि **दिल्ली**मण्डले श्राद्धानां प्रतिगृहसेरद्वयप्रमाणखंडलं भविका-करणादिना च श्रीगुरूणां प्रतिष्ठा महती संजाता ।

तथा प्रथमं चतुर्मासकं **श्रीआगरानगरे**, द्वितीयं **फत्तेपुरे**, तृतीयं **अभिरामावादे**, चतुर्थं पुनरपि **श्रीआगरानगरे** एवं चतुर्मासकचतुष्टयं तत्र देशे

कृत्वा गूर्जरदेशसंघाग्रहात् **मेडतादिनगरे** विहारं कुर्वन्तः **नागोरनगरे** चतुर्मासकं कृत्वा क्रमेण श्रीसूरयः **सीरोहीनगरे** समागताः । तत्रापि प्रतिष्ठाद्वयं **श्रीअर्बुदाचलं** तीर्थयात्रां च कृत्वा राउ**श्रीसुलताणजी**कस्याग्रहवशात् **श्रीसीरोहीनगरे** चतुर्मासकं स्थिताः।

तदनु विहारं कुर्वन्तः **श्रीपाटणनगरे** चतुर्मासकं चक्रुः। **श्रीहीरविजयसूरयः** क्रमेण भव्यजीवान् प्रतिबोध्य च **श्रीदीवबंदिरासन्नउनानगरे** सं. १६५२ वर्षे भाद्रवासुदि११दिने स्वर्गं प्रापुः ॥ ५८॥

१२

श्रीविजयलक्ष्मीसूरिरचित उपदेशप्रासादान्तर्गत

# हीरविजयसूरि संदर्भ

॥ व्याख्यानम् - ३५८ ॥

**अथ हीरगुरोर्वर्णनमाह—**

अभूत्पट्टे तस्यास्खलितविजयो **हीरविजयो,**
गुरुर्वृन्दारौधप्रथितमहिमाऽत्रापि समये ।
सुरत्राणो बुद्धो **ह्यकबर**नृपो यस्य वचसा,
घृणाध्यानं ध्यायन् व्यतनुत महीमार्हतमयीम् ॥ २५ ॥

॥ व्याख्यानम्-३५९ ॥

अथ श्री**हीरसूरेः** किञ्चित्संबन्धोऽयं लिख्यते—

वैराग्यपूर्णहृदयाः, त्यक्तमूर्छा जगृहुश्चारित्रम् ।
सुहितसाधुप्रभवः, श्री**हीरविजयसूरीन्द्राः** ॥ १ ॥

स्पष्टः । ज्ञातं चेदम्—

**श्रीगुर्जरदेशे तारंगगिरि**प्रमुखतीर्थानि वर्तन्ते ।
यत्तुङ्गतारङ्गगिरौ गिरीशशैलोपमे कोटिशिला समस्ति ।
स्वयंवरोर्वीव शिवाम्बुजाक्षीपाणिग्रहे कोटीमुनीश्वराणाम् ॥ १ ॥

अपि च—

देशे पुनस्तत्र समस्ति शंखेश्वरोऽन्तिकस्थायुकनागनाथः ।
धात्रा धरित्र्यां जगदिष्टसिद्ध्यै, मेरोरिवादाय सुरद्रुरुसः ॥ १ ॥
विद्याधरेन्द्रौ विनमिर्नमिश्च, यत्बिम्बमभ्यर्चयतः स्म पूर्वम् ।
स्वर्गे ततोऽपूजि बिडौजसा यत्स्वधाम्न एव स्पृहयेव सिद्धेः ॥ २ ॥

इति **हीरसौभाग्यकाव्ये** । इन्द्रेणोज्जयन्तशृङ्गे मुक्तम् । ततः स्वौकसि चन्द्रार्कावार्चयेताम् । ताभ्यां पुन**र्गिरिनार**शृङ्गे स्थापितम् । ततो धरणेन्द्रेण स्वधाम्न्यानीतम् । ततः श्रीनेमिवचसा कृष्णेनानीतम् ।

तत्रापि च स्फूर्तिमियर्त्यपूर्वा, **श्रीस्थम्भने** स्थम्भनपार्श्वदेवः ।

व्यध्वंसि धन्वन्तरिणेव येन, कुष्ठोपतापोऽ**भयदेवसूरेः** ॥ १ ॥

इत्याद्यनेकपुण्यस्थानोपेते देशे **श्रीप्रह्लादनपुरं** समस्ति । तत्र ऊकेशवंशी **कुरासाह**नामा महेभ्यः, तस्य **नाथी**तिनाम्नी पत्नी, तया गजस्वप्नसूचितः पुत्रो **हीरकुमारः** सं० १५८३ मार्गशीर्षसितनवम्यां प्रतो वृद्धिं प्राप्तः । क्रमेणान्यदा **श्रीदानसूरि**मुखतो देशनामित्यशृणोत्—

सान्ध्यराग इव जीवितमास्त, यौवनं च सरितामिव वेगः ।

यत्क्षणेव कमला क्षणिकेयं, तत्त्वरध्वमनिशं जिनधर्मे ॥ १ ॥

अथ स मातृपितृस्वर्गमनानन्तरं **विमलाह्व**भगिनीपार्श्वे दीक्षादेशममार्गयत् । भगिनी प्राह-"त्वं वार्धके संयमं कुर्वीथाः—

त्वद्वधूमुखसुधांशुसुधायाः, पानमुत्सुकतया प्रविधित्सू ।

मद्विलोचनचकोरशकुन्तौ, चापलं रचयतश्चिरमेतौ ॥ १ ॥"

कुमारः प्राह—

जीवितं कुशशिखास्थमिवाम्भः, पांसुलेव तरला कमलाऽपि ।

ऐक्षवाग्रमिव यौवत(न)मेतत्, प्रेक्षणक्षण इव स्वजनोऽपि ॥ १ ॥

यद्गमिष्यति ममार्भकभावोऽलङ्करिष्यति तनुं च युवश्रीः ।

वार्धकं पुनरमात्यमिव स्वं, भूषयिष्यति क इत्यवगच्छेत् ॥ २ ॥

इत्याद्यनेकपरस्परोक्तिभिः श्रान्ता भगिन्याद्या दीक्षादेशं ददुः । ततः सं० १५९६ वर्षे कार्तिककृष्णद्वितीयायां **हीरकुमारो** दीक्षां ललौ । **हीरहर्ष** इति नाम दत्तम् । गुरुपार्श्वे पठन् स्वसमयज्ञो जातः । परदेशभाषापरशास्त्रज्ञातुकामो दक्षिणदेशं प्रति ययौ । तद्देशे श्रीमाणिक्यनाथो नाभेयोऽस्ति । श्रीअन्तरिक्षपार्श्वदेवो वर्तते । यतः—

अपि पार्श्वजिनोऽन्तरिक्षकाभिध उच्चैःस्थितिकैतवादिह ।

किमु लम्भयितुं महोदयं, भविनां भूवलयात् प्रचेलिवान् ॥ १ ॥

तथा च—

करहेटकपार्श्वनायको, दिशि यत्रास्ति पुनः प्रभाववान् ।

न जहाति कदापि यत्पदं, किमु तस्यैव समीहया फणी ॥ १ ॥

विभवैः सह माधवादयः प्रतिवर्षं यमुपेत्य भेजिरे ।
किमिदं गदितुं तनूमतां, मरुतामप्ययमेव देवता ॥ २ ॥
इह जीवत आदिमप्रभोरपि **सोपारक**नामपत्तने ।
प्रतिमा प्रतिभासते सतां, वृषकोषः प्रकटः किमार्षभेः ॥ ३ ॥

तद्देशे **देवगिरि**द्रङ्गे विप्रपार्श्वे तर्कशास्त्रादिकं पठित्वा गुरुसमीपमाययौ । गुरुणा वाचकपदं दत्तम् । ततः श्रीसूरिमन्त्रदेवताज्ञया सूरिपदं दत्तंसं० १६१० वर्षे पौषशुक्लपञ्चमीदिने । ततः श्रीगुरुः पृथ्व्यां विहरति स्म. ।

इतश्च**अकबर**सभायामनेकजातिसंकुलायां निजनिजधर्मवर्णनं प्रसृतम् । तन्मध्ये एकेन विदुषा पुरुषेण **श्रीहीरगुरो**र्वर्णनं कृतम्—

अस्माभिरीशितरदृश्यत दर्शनेषु, सर्वेषु शेखर इवाखिल धार्मिकाणाम् ।
एकः स हीरविजयाभिधसूरिराजः क्ष्मापालपङ्क्तिषु भवानिव भूमिपीठे ॥ १ ॥

इत्यादिसभ्यजनवर्णितसूरिगुणश्रवणान्तरं दत्तविज्ञप्तिस्फुरमानकरौ द्वौ दूतौ लाटदेशस्थ**गन्धार**बन्दिरेऽ**कबरः** प्राहिणोत् । तौ दूतो सङ्घसेवितपादाम्बुजानां श्रीगुरूणां पाणिपद्मं तत्स्फुरमानं ददतुः । तदा श्राद्धैर्विज्ञप्तिः कृता—

प्रदेशीव केशिव्रतिक्षोणिशक्रैरसौ बोधनीयो नृपः पूज्यपादैः ।
महान्तो हि विश्वोपकृत्यै यतन्ते, धनाः किं न सर्वं जगज्जीवयन्ति ॥ १ ॥
प्रणिघ्नन् वने व्याधवन्नैकसत्त्वानसत्त्वीकृताशेषविद्वेषिवर्गः ।
ततो **हेमचन्द्रेण** चौलुक्यभूमानिवासौ त्वयाऽ**कब्बरो** बोधनीयः ॥ २ ॥

ततः श्रीगुरुर्विहारं कुर्वन् राजद्रङ्गसमीपं समागात् । **श्रीसाहिबखाने**न द्रङ्गाधिपेन बह्वादरभक्त्या स्वराजधाम्नि समानीय गुरोः पुरो हयगजरथमणि-शिबिकादयो ढौकिताः, तदनु स व्यजिज्ञपत्—"हे स्वामिन् ! **अकबर**साहि-वाक्यतोऽहं ढौकयामि, त्वं गृहाण । यतः—

साहिश्री**मदकब्बरा**वनिभुजेत्यादिष्टमास्ते मम,
द्युम्नस्यन्दनवाजिवारणमुखं संपूर्य तत्कामितम् ।
**श्रीसूरीश्वरहीर**हीरविजयं संप्रापयेस्त्वं मया,
न्यासं स्वीयमिवाद्रियस्व तदिदं विश्राण्यमानं मया ॥ १ ॥

सूरिः स्माह—"वयमकिञ्चना नित्यमनुपानत्पादचारिण एवार्हाः" ततः सूरिर्विहरन् अर्बुदाचलमाययौ । यतः—

वैमलीयवसतिं व्रतीशिता, दुग्धसिन्धुवयसीमिवैक्षत ।

श्वेतदन्तितुरगान्वितां सुधाशालिनीं जिनपवित्रिताम्बराम् ॥ १ ॥

ततो **वस्तुपालवसते**श्चैत्यं ननाम । यत:—

तं रैवतोर्वीधरवत्पवित्रीचिकीर्षयेवार्बुदमभ्युपेतम् ।

निरीक्ष्य तस्मिन्नयनाभिरामं, ननाम शैवेयजिनं यतीन्द्रः ॥ १ ॥

चौलुक्यचैत्यं विधृतामृतश्री, धर्मप्रपास्थानमिवैष मार्गे ।

नत्वा मुनीन्द्रोऽ**चलदुर्ग**मध्ये, चतुर्मुखे(खं) नाभिसुतं व्यनंसीत् ॥

ततो **राणपुरे** नलिनीगुल्माकारं **धरणासाहेन** कारितं चैत्यं ननाम । यत:—

चातुर्गतीयार्त्तिमहान्धकूपोद्दिधीर्षया शेषशरीरभाजाम् ।

मूर्त्तीश्चतस्रः कलयन्निवास्मिन्, मुनीन्दुनाऽदर्शि युगादिदेवः ॥ १ ॥

ततो **मेडतानगरे** श्रीफलवर्धिपार्श्वदेवं प्रणेमिवान्, श्रूयते हि तद्बिम्ब-पार्श्वेऽपरा कापि जिनप्रतिमा स्थातुं न शक्यते, अतश्चैकाक्येव तिष्ठति । यत:—

एकोऽहमेव त्रिजगज्जनानां, पिपर्मि कामानपरानपेक्षः ।

इति स्मयावेशवशादिवान्तः, परानपास्य स्थित एक एव ॥ १ ॥

तथा च फलवर्धिपार्श्वनाथद्वारि कपाटौ न तिष्ठतः, कदाचित्कश्चिदानी-य योजयति तदा प्रभाते प्रासादात्क्रोशद्वयोपरि पतितौ दृश्येते न द्वारि स्थिताविति। तत्र श्रीजिनं नत्वा श्रीसूरिः क्रमेण **फतेपुरसमी**पे आययौ । तत्र **थानसिंहः** साहिसेवकस्तथाऽमीपालोऽपि साहेः प्रतिदिनं नालिकेरढौकनकृत्, (ताभ्यां) तथा **मानुमुखसङ्घमुख्यैः** साहेः सूरेरागमनामभाष्यत । ततो नृपाज्ञां प्राप्य श्रीसङ्घाः प्रौढैर्महोत्सवैः **फतेपुर**स्य (रात्) साहिराजधान्याः शाखापुरं प्रापयन् (सूरिं) ॥ ततः श्रीसाहेर्गुरुणा **शेषे(खे)ण** सह प्रथमं सूरिर्धर्मगोष्ठीं व्यतनोत् । तद्गतमानससंशयं दूरीकृत्य श्रीभूपसमीपमेत्य बहुमानादरपूर्वमनेकप्रश्नोत्तरान् विधाय यमनियमजिनतीर्थादिस्वरूपं प्रकाश्य श्रीदयाधर्मवासितं भूपमानसं विहितवान् । ततो भूपः श्रीचित्रशालिकामध्ये श्रीगुरुं निनाय । अथ भूपः सोपानत्रिकेणैवोर्ध्वभूमि-माश्रित्य गुरुमाह—"हे व्रतीश्वर! मत्सभा भूमेराच्छादनं क्रमाम्बुजैः पवित्रीकुरु ।"

गुरुर्जगादेति कदापि कीटिका, भवदधोऽस्मिन्न पदं दधे ततः ।

नृपोऽभ्यधादत्र न कश्चनासुमान्, भवेत्सुराणामिव मन्दिरे नरः ॥ १ ॥

गुरुर्जगावाचरणं तथाऽप्यदः, पदं निभाल्यैव ददे परत्र नो ।
यतः स्वकीयाचरणं मुमुक्षुणा, प्रयत्नतो रक्ष्यममर्त्यरत्नवत् ॥ २॥

ततो दूलीचकं करे गृहीत्वोर्ध्वमुत्पाटयति तावन्नृपेण स्वदृष्ट्या पिपीलिका दृष्टाः । जातविस्मयः स गुरुं श्लाघते स्म । तत्र विधिनोपविश्य निःस्पृहो धर्मरहस्यं प्राह । तत **आगरानगरे** चतुर्मासकं कृत्वा श्री चिन्तामणिपार्श्वेशप्रतिमाप्रतिष्ठापनं चकार । यतः—

मणिं सुराणां तनुमन्समीहितप्रदित्सयेव त्रिदिवादुपागतम् ।
स तत्र चिन्तामणिपार्श्वतीर्थपं, महामहेन प्रतितस्थिवान् प्रभुः ॥ १॥

पुनः फतेपुरागमने(नं) साहेर्मिलनं च । साहिदत्ताश्वादिवस्त्वनुपादाने सूरेः प्रत्युत्तरं वचो नृपस्य, यतः—

शशंस सूरिं कमिता ततः क्षितेः, किमप्युपादाय कृतार्थ्यतामहम् ।
न यत्करः पात्रकरो परि स्म भूत्, स मोघजन्मा विपिनप्रसूनवत् ॥ १॥

इति दानाय पुनः पुनराग्रहपरं भूपं प्रति गुरुः पक्षिमोचनं ययाचे, ततो नृपेण पञ्जरेभ्यः पक्षिणो मोचिताः, पर्युषणाद्वादशदिनामारिप्रदानस्फुरमानार्पणं कृतं, साहिना कारिते द्वादशक्रोशप्रमाणेऽदृग्गोचरपारे **डामराख्यमहातटाके** मीनादिवधो निषिद्धः, पुनः श्रीगुरुं प्राह—

प्राग्वत्कदाचिन्मृगयां न जीवहिंसां विधास्ये न पुनर्भवद्वत् ।
सर्वेऽपि सत्त्वाः सुखिनो वसन्तु, स्वैरं रमन्तां च चरन्तु मद्वत् ॥ १॥

मृगयामोचनजीजीयाकरशत्रुञ्जयाद्रिकरमोचनादिपुण्यक्रियामनेकधा कारयित्वा श्रीगुरुरन्यत्र विजहारेति ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ चतुर्विंशे स्तम्भे ३५९ व्याख्यानम् ॥

## ॥ व्याख्यानम्-३६० ॥

अथाग्रे किञ्चित् श्रीसूरिसंबन्धमाह—

जगद्गुरुरिदं राज्ञा, बिरुदं प्रददे तदा ।
तद्वहन्नन्यदेशेषु, विजहार गुरुः क्रमात् ॥ १॥

स्पष्टः । अत्रार्थसमर्थनार्थमियं भावना- श्रीगुरुर्विहरन् **मथुरापुर्या**मगात्, यतः—

समहं **मथुरापुर्यां**, यात्रां पार्श्वसुपार्श्वयोः ।
प्रभुः परीतः पौरौघैश्चारणर्षिरिवाकरोत् ॥ १॥

जम्बूप्रभवमुख्यानां, मुनिनामिह स प्रभुः ।
ससप्तविंशतिं पञ्चशतीं स्तूपान् प्रणेमिवान् ॥ २ ॥

ततो गोपालशैले नाभेयं नतवान्, यतः—

द्वापञ्चाशद्गजमितवृषभप्रतिमां स सिद्धशैल इव ।
प्रभुरपरा अपि तस्मिन्, मूर्त्तीर्जैनीरनंसीत्सः ॥ १ ॥

ततः—

**वरकाण**कमागत्य, पुरं सूरिपुरन्दरः ।
**वरकाण**कपार्श्वेशं, साक्षात्पार्श्वमिवानमत् ॥ १ ॥

ततः क्रमेण सिद्धाचलदर्शनं स्तवनं विधाय **जयपुर** एत्य च सङ्घलोकानां पुरस्तात् श्रीअजयपार्श्वनाथचरित्रं किञ्चिदाह, तद्यथा—

कश्चित्सागरेभ्यो व्यापारं कर्तुमब्धिमध्याध्वना प्रास्थित । दैवाज्जलधिजलदोत्पातौ तत्रोत्पन्नौ । तदा कल्पान्तकाल इव स्वपोतलोकानां संहारं प्रेक्षितुमक्षमः प्राग्मर्तुकामो यावज्जलधौ झम्पां प्रदत्ते तावत्पद्मावती देवीमां वाणीं वदति स्म, यतः—

''मध्येऽम्बुधेरस्ति समस्तदुःखपाथोधिमन्थावनिभृत्प्रभावम् ।
निधानमम्भोनिधिमेखलाया, इवान्तरे पार्श्वजिनेन्द्रबिम्बम् ॥ १ ॥

हे धनपते ! नाविकलोकैर्जलधिसलिलात्कर्षयित्वा संपूज्य च यानपात्रे स्थापितं सत् त्वदीयं विघ्नं हरिष्यति । पुनर्हे इभ्य ! स्वर्द्रुमपर्णैनिर्मितां मञ्जूषां नोद्घाटयेः । तादृशीं तां द्वीपबन्दिरे त्वं नयेः । तत्र दिग्यात्रार्थं समेतस्याजयनाम्न ऊर्वीशितुरर्पयेः । अस्या मूर्त्तेः स्नात्रजलसिञ्चनान्नृपस्य सप्तोत्तरशतरोगा यास्यन्ति।'' इति पद्मावतीवाक्यश्रवणाज्जनैर्नीरमध्यात्तं पेटामानाटय स्वपोते स्थापितवान्, ततः सर्वोपिद्रवशान्तिर्बभूव । यतः—

ध्यातोऽधुनाऽप्येष पयोधिमध्ये, प्रयाति वाते प्रतिकूलभावम् ।
निर्विघ्नयन् पोत इवाङ्गभाजः, प्रभुः सुखं लम्भयति प्रतीरम् ॥ १ ॥

ततः इभ्यस्तां पेटां वृत्तं निवेद्य नृपाभ्यर्णे मुमोच । नृपो विनयेन बिम्बं प्रकटीकृत्याजयाख्यं पुरं निवास्य महच्चैत्यं विधाप्य तत्र बिम्बं संस्थाप्य तदभिषेकजलस्पर्शान्निर्गदो बभूव । पूर्वमजयपार्श्वनाथ इति नाम प्रसृतं, अधुना तु अजारग्रामः, तद्ग्रामनाम्नाऽजारपार्श्वनाथ इति प्रसिद्धिः । विस्तरस्त्वेतदव्यतिकरः शत्रुञ्जयमाहात्म्यादवसेयः ।

अथ सूरेर्दीक्षादिनादारभ्य यत्किञ्चित्तपो विहितं तदुच्यते—

सूरीन्दुरेकाशनकं न यावज्जीवं जहौ न्यायमिव क्षितीन्द्रः ।
पञ्चापि चासौ विकृतीरहासीद्गुणान् स्मरस्येव पराबुभूषुः ॥ १ ॥
द्रव्याणि वल्भावसरे व्रतीन्द्र, सदाददे द्वादश नाधिकानि ।
किं भावनाः पोषयितुं विशिष्य, भवाब्धिपारप्रतिलम्भयित्रीः ॥ २ ॥

स्वपापालोचपदे सूरिः त्रिशतीमुपोषणानां व्यतानीत्, सपादां द्विशतीं षष्ठानकरोत्, चतुर्विंशतित्रिकध्यातुमना अष्टमानां द्वासप्ततिं निर्मिमीते स्म, पुनराचाम्लसहस्रयुग्मं चक्रे, पुनर्विंशत्याचाम्लकैर्विंशतिस्थानकान्यातनुते स्म, पुनर्द्विसहस्रनिर्विकृतीश्चक्रे । पुनः स एकदत्तिरेकस्मिन् वारके पात्रे यत्रानवच्छिन्नं पानीयाशादिकं पतेत्सैकदत्तिरुच्यते, यस्मिंश्चैकमेव सिक्थं भुंज्यते नान्यत् तदेकसिक्थं, तत्प्रमुखानि तीव्राणि तपांसि चक्रे । पुनः सहस्रत्रयोत्तरषट्शतान्युपवासान् चकार । पुनः प्रथममुपवासस्तत एकभक्तं, तत आचाम्लं, पुनरुपोषणं, एवं त्रयोदश मासान् याव**द्विजयदान**गुरोस्तपो विदधे । पुनर्द्वाविंशतिमासान् यावद्योगवाहनैः कृत्वा तीव्रतपांसि कृतवान् । पुनर्मासत्रयं यावत्सूरिमन्त्रं विधिनाऽऽरराध । पुनश्चतुःकोटिमितान् स्वाध्यायान् गणयति स्म। पञ्चाशदर्हत्प्रतिमाप्रतिष्ठा अनुतिष्ठति स्म । इत्यादिबहुविधधर्मकृत्यानि विध**योन्नता**ख्ये पुरे सं० १६५२ भाद्रपदसितैकादशीतिथौ महामन्त्रं स्मरन् देवभूमिं प्रापेति ।

सूरिस्ततः संश्रयति स्म शुक्लध्यानं दधानः स सुधारसौघम् ।
काङ्क्षन्महानन्दपुरे प्रयातुं, प्राक्तस्य मार्गस्य दिदृक्षयेव ॥ १ ॥

॥ इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ पञ्चदशभिरस्त्राभिश्चतुर्विंशतितमः स्तम्भः संपूर्णः ॥

॥ मूलतस्त्रिशत्युत्तरषष्टितमः-३६०-सम्बन्धः ॥

## व्याख्यानम् - १४७

तथाऽष्टाहिकपर्वसु अमारिप्रवर्त्तनं कार्यं । श्रीकुमारनृपसंप्रतिनृपादिभि संप्रतिकालेऽपि **श्रीहीर**गुरूपदेशाद**कब्बर**साहिना स्वकीयाखिलदेशेषु षाण्मासिकामारिप्रवर्त्तनं कृतं । तथाहि समासतः—

एकदा स्वप्रधानादिभ्यो **हीरसूरे**र्वर्णनं श्रुत्वा **श्रीअकब्बरेण** स्वनामांकितफुरमानं प्रेष्यातिबहुमानेन **गंधारतः** आहूताः सं-१६३८-ज्येष्ठवहुलत्रयोदशीदिने

गुरवस्तत्र संप्राप्ताः । श्रीसाहिना समं मिलिताः, साहिना सादरं पृष्टः सूरिस्तथा धर्मोपदेशं ददौ यथा **आगरा**द्रंगतोऽ**जमेर**पुरं यावदध्वनि प्रतिक्रोशं कूपिकोपेतमनारादीन् विधाय स्वकीयाखेटकलाकुशलताप्रकटनकृते प्रतिमनारं शतशो हरिणविषाणारोपणविधानादिना प्राग् हिंसाकरणरतिरपि स भूपो दयामतिः संजातः । ततः श्रीसाहिरवदत्—"यच्छ्रीमंतो मया दर्शनोत्कंठितेन दूरदेशादाकारिताः । अस्मदीयं च न किमपि गृह्यते, तेनास्मत्सकाशाच्छीमरुचितं याच्यं।" ततो विचार्य सूरिभिस्तदीयाखिलदेशेषु पर्यूषणापर्वसत्काष्टाहिकायाममारिप्रवर्त्तनं बंदिजनमोचनं चायाचि । तद्गुणचमत्कृतमनसा श्रीसाहिनास्मदीयान्यपि चत्वारि दिनानि समधिकानि भवंतु' इति कथयित्वा स्ववशीकृतदेशेषु श्रावणबहुलदशमीतः प्रारभ्य भाद्रपदशुक्लषष्ठीं यावदमारिप्रवर्त्तनाय द्वादशदिनामारिसत्कानि कांचनरत्नांचितानि स्वनामांकितानि पट्फुरमानानि त्वरितमेव गुरूणां समर्पितानि । प्रथमं श्रीगुर्जरदेशीयं, द्वितीयं मालवदेशसत्कं, तृतीयमजमेरदेशीयं, चतुर्थं दिल्लीफत्तेपुरसत्कं, पंचमं लाहुरमुलतानसत्कं, श्रीगुरुपार्श्वे रक्षणाय, षष्ठं पंचदेशसंबंधिसाधारणं चेति । तेन तत्तद्देशेष्वमारिपटहो विस्तृतः, तथा श्रीगुरूणां पार्श्वादुत्थाय तदैवानेकगव्यूतिमिते डाबरनाम्नि महासरसि गत्वा साधुसमक्षं स्वहस्तेन नानाजातीयानां देशांतरीयजनप्राभृतीकृतानां पक्षिणां मोचनं चक्रे, तथा कारागारस्थबहुजनानां बंधनभंजनमपि कारितं। ततः श्रीसूरिणा साहिप्रार्थनया **श्रीजंबूदीवपन्नत्तिवृत्ति**विधायकवाचक-**श्रीशांतिचंद्राः** स्वपरशास्त्रज्ञाः पश्चिमाधीशवरुणंसुरदत्तवरास्तत्र धर्मश्रावणार्थं निहिताः। तैः स्वोपज्ञकृपारसकोशाख्यशास्त्रजलेन सिक्ता सती श्री साहेर्हृदये कृपालता वृद्धिमती बभूव।

अथैकदा साहेः पुरः आमलकप्रमाणे द्वे मुक्ताफले केनचिदिभ्येन प्राभृतीकृते। तं सन्मान्य स्वकोशाधिपं वालव्यजनकारकं १२ हजारिमनसवं बिभ्रतं च तं प्रति ते मुक्ताफले रक्षणाय प्रदत्ते । सोऽपि स्वगृहे गत्वा भार्यायै ददौ । सापि स्नानोत्सुका स्ववस्त्रे बध्ध्वा स्नानं चकार । तदनु सुरत्राणसत्के ते ज्ञात्वा स्वेष्टस्थले मुमोच । क्रमादामयार्दिता सा पंचत्वं प्राप । अन्यदा नृपेण ते मार्गिते, स स्माह—'त्वया गृहे गत्वा पूर्वं यत्र यस्यै दत्ते, तत्रैव तस्याः समीपे मार्गणीये फले।' सोऽपि गृहे गतः । तथैव स्नानोद्यतां तां वीक्ष्य ते मार्गिते, तयापि स्वशाटिकांचलग्रंथीमुन्मुद्रय दत्ते । सोपि प्राप्ताश्चर्यः साहिपार्श्वे समेतस्तत्पुरस्ते संस्थाप्य भूयश्चामरबिंजनोद्यतोऽभूत्, परं तदाश्चर्यमग्नो भूयोभूयः स्तिमितजडत्वं प्राप्नोति । तदा साहिना पृष्टः—'किमद्य

चित्रलिखित इव त्वं भवसि ?' इति निर्बंधेन पृष्टः सर्वं ज्ञातं स्माह । तदा साहिनोदितं—'किमत्र चित्रं, स तु द्वितीयो विश्वेशोऽस्ति।'

प्रगे धर्मश्रावणार्थं सभामध्ये वाचकेंद्रः कांचनपादपीठोपरि समे स्थितः । ततो भूपः प्रणम्येति व्यजिज्ञपत्—'हे पूज्य ! किमप्याश्चर्यमस्माकं दर्शय।' सोऽप्याह—'कल्ये गुलाबपुष्पारामे त्वया गंतव्यं।' प्रगे साहिस्तत्र गतः, वाचकेंद्रोऽपि तत्रागात् । द्वौ परस्परं धर्मगोष्ठीं तनुतः, तावत्साहिनोबतगर्ज्जरवो जातः, सहसा तदाकर्ण्य चकितः स्वसेवकान् पप्रच्छ—'अस्मदाज्ञां विना कस्यापि ठक्कारवो द्वादशगव्यूतिमध्ये न जायते, पश्यत यूयं।' ततस्ते विलोक्य साधिपं प्राहु—'हे साधिप! युष्मत्पिता **हुमायुः** स सचमूस्तव मिलनाय समेति' इति कथनानंतरमेव समेत्य पुत्रं परिरभ्य च स्थितः सर्वेषा**मकबर**सैनिकानां मेवामिष्टान्नभृतरजतपात्राणि ददौ । साहिं प्रति महत्सन्मानं दत्वा यथागतस्तथा ययौ, क्षणेनादृश्योऽभूच्च । साहिः साश्चर्यं दध्यौ—'नेदं तांत्रिकं, यतोऽस्मदादिसमर्पितवस्तूनीमानि प्रत्यक्षं दृश्यंते, अतो नूनमिदं वेष्टितं गुरुणा निर्मितं।' ततो गुरवे नत्वा स्तुतिं चकार ।

अथैकदा साहिरटकदेशेशजयनार्थं ३२ क्रोशमितप्रयाणमकरोत् । तदा साहिना स्वभृत्येन सभागतजनान्वेषणां नामग्राहपूर्वं कारितं, तन्मध्ये वाचकचंद्रस्यापि नाम श्रुत्वा दध्यौ 'अहो वाहनोपानदादि विनाऽमी महंदुःखं प्राप्ता अभविष्यन् ।' ततस्तदाकारणाय स्वोपजीविनः प्राहिणोत् । ते तं प्राहुः—'त्वां साहिराकारयति।' तदा वाचकेंद्रावस्येदृशी जातास्ति—सोफयुक्तचरणत्वात्पदमात्रमप्यग्रे चलनाक्षमाः, टौप्परकस्थितप्रासुकजलेन वस्त्रांचलमार्द्रीकृत्य स्वोरसि स्थापितमस्ति, द्वौ शिष्यौ वैयावृत्यं कुरुतः । ततः सेवकैरेतत्स्वरूपं सर्वं नृपाय निवेदितं । तदा साहिः सुखासनं प्रैषयत्, तदा स एकां काउवल्लिकामानाय्य तदुपर्यारुरोह, स्वशिष्यौ काष्ठप्रांतौ स्कंधे न्यस्य चलितौ । साहिस्तथावस्थं तमागच्छन्त वीक्ष्य दध्यौ—'अहो गुरुवाक्यभक्ता धन्या इमे ये मदनुयायिनः संति, अन्यथा मदभ्यर्णे न काप्येषां प्राप्तिः, अहो क्षमा श्रमणानांक्षमा।' ततः साहिरभिमुखीभूय तत्पादयुग्मं चक्षुर्भ्यां प्रस्पर्श प्रोवाच च—'स्वामिन् ! अतःपरं मत्कृते महत्प्रयाणं युष्माभिर्न विधेयं, शनैः शनैः पश्चात्समेतव्यं।' ततः क्रमेण साहिरटकदेशाधिपपुरं परिवेष्ट्य स्थितः द्वादश वर्षाणि जातानि, परं तद्वप्रो न स्वायत्तोऽभूत् ।

एकदा साहिपुरो म्लेच्छा अन्ये च प्राहुः—'त्वं प्रत्यहं कापुरुषश्वेतपटसंगं करोषि, तेनायं दुर्गो दुर्ग्रहोऽनुमीयते।' तद्वृत्तं भूपेन तस्मै वाचकेंद्राय ज्ञापितं ।

गुरुः प्राह—'यद्दिवसे दुर्गग्रहणेच्छा तव स्यात्, तत्समये गृह्यते, परं त्वत्सैन्यं सर्वं स्कंधावारेऽवस्थाप्यं, आवां द्वावेव व्रजावः, परं पुरांतर्बहिश्च कस्यापि केनापि हिंसा न विधेया।' ततः पटहोद्घोषेण हिंसां सर्वत्र निवार्य प्रभाते द्वावेव दुर्गसमीपमीयतुः। सर्वे निंदका ऊचुः—'असौ कापुरुषोऽ**कब्बरं** शत्रुहस्ते समर्पयिष्यति।' ततो वाचकेनैकया फूत्कृत्या सर्ववप्रखातिका रजःपूर्णीकृता, द्वितीयया शत्रुसैन्यं स्तंभितं, तृतीयया च गोपुराणि फूल्लिका इव स्फुटितानि । ततः साहिः सोत्साहं साश्चर्यं च पुरे स्वाज्ञामखंडां चकारेति। 'हे पूज्य ! मम किंचिदनुग्रहं विधाय समादिश' तदा वाचकेंद्रेण १४ कोटीद्रव्यस्थानकं राज्ञः प्रतिवर्षं जीजीयाकरमोचनं याचितं, सपादसेरचटकजिह्वाभक्षणं त्वया न कार्यं, सुवर्णटंकैकशत्रुंजयकरमोचनं याचितं, षाण्मासिकामारिप्रवर्तनं च, तथा हि-श्रीमत्साहिजन्मसंबंधिमासः, श्रीपर्यूषणापर्व-सत्कानि १२ दिनानि, सर्वे रविवाराः, सर्वसंक्रांतितिथयः, नवरोजसत्को मासः, सर्वे इदवासराः, सर्वे मिहरवासराः, सोफिआनवासराश्चेति षाण्मासिकामारिसत्कं फुरमानं' इत्यादिफुरमानानि च श्रीसाहिपार्श्वात्समानीय श्रीगुरूणां प्राभृतीकृतानि वाचकेंद्रेणेति ।

## १३

श्रीधर्मसागरउपाध्यायरचित

प्रवचनपरीक्षागत

# श्रीहीरविजयसूरिसंदर्भः

**तस्सवि पयंमि विहिणा एगीकाऊण सोमसूरे अ ।**
**घडिओ उभयसहावो तेणं सिरिहीरविजयगुरु ॥ ५॥**

**संपइ तं जुगपवरं पणमित्ता पणयभावभावण्णं ।**
**सघंमि अ जिअलोए लोअंतं नेहनयणेहिं ॥ ६॥**

तस्यापि-**श्रीविजयदानसूरे**रपि 'पयंमि'पदे **श्रीहीरविजयसूरिः** विधिना-विधात्रा घटितो-निष्पादितः, किं कृत्वा ? -सोमसूरौ-चन्द्रभास्करावेकीकृत्योभय-स्वभावो घटितः, अयं भावः चन्द्रसूर्योपमितयोः प्रागुक्तसूर्योर्गुणान् समुदायीकृत्योभयस्वभावो घटित इत्यर्थः, तेनैव कारणेन **श्रीहीरविजयगुरु**रिति नामा, हीति दुःखहेतुर्विरहिजनस्य शोककारणं, इः-कामो यस्मात् स हीः-चंद्रो रविःसूर्यस्तयोर्जयो यस्य सः, तयोर्जेतेत्यर्थः, स चासौ गुरुश्चेति, श्रिया युक्तस्तथा **श्रीहीरविजयगुरुः** एवंविधं गुरुं प्रणम्य, किंलक्षणं ?-प्रणयस्य भावः-उत्पत्तिर्यस्मात् स प्रणयभावो भावनिर्देशात् स्नेहहेतुत्वमापन्नं-प्राप्तं, समस्तलोकवल्लभमित्यर्थः, किं कुर्वन्तं ?-स्नेहलोचनाभ्यां-सस्नेहनयनाभ्यां लोकान् पश्यन्तं, करुणैकरसार्द्र-लोचनावलोकनशीलमिति गाथायुग्मार्थः ॥ ५-६ ॥

## १४

श्रीमङ्गलविजयरचित श्रीवीरधर्मपट्टावलिगत

# हीरविजयसूरिसंदर्भः

तत्पट्टं दीपयामासुः, **हीरविजयसूरयः** ।
लघुवयसि दीक्षां च, गृहीत्वा वीरशासने ॥ ४७१ ॥

गुर्वाज्ञां च गृहीत्वैव, **देवगिरौ** समागताः ।
तत्रत्य विज्ञपार्श्वे च, पठनं पुष्कलं कृतम् ॥ ४७२ ॥

प्रमाणशास्त्रग्रन्थेषु, ग्रन्थाः षड्दर्शनात्मकाः ।
अधीताः स्वल्पकालेन, नव्यन्यायः कृतस्तथा ॥ ४७३ ॥

सामुद्रिकं च ज्योतिष्कं, साहित्ये संहिता मतिः ।
नाटकशास्त्रग्रन्थाश्च, अधीताः सूरिभिस्तथा ॥ ४७४ ॥

सिद्धान्ते पूर्णयोग्यत्वं, सम्प्राप्तं गुरुयोगतः ।
कर्मग्रन्थादिशास्त्राणां, ज्ञानं शुद्धं समादृतम् ॥ ४७५ ॥

यशोगानं च सूरीणां, जैनजैनेतरे तथा ।
आइनेऽकबरी ग्रन्थे, अबुलफजलेन च ॥ ४७६ ॥

विन्सेण्टस्मिथविज्ञैश्च, स्वग्रन्थेषु स्तुतिः कृता ।
सर्वविज्ञजनैरेव, प्रशंसाऽतिकृता तदा ॥ ४७७ ॥

अपूर्वब्रह्मतेजोभिः, शुद्धपाण्डित्ययोगतः ।
शुद्धचारित्रयोगेन, प्रभावः प्रसृतो महान् ॥ ४७८ ॥

सम्राड**कबर**स्तेषां, संजातो भक्तराट् सदा ।
धर्मोपदेशतां श्रुत्वा, कृतं कार्यमनेकधा ॥ ४७९ ॥

सूरीणामुपदेशेन, वर्षे षण्मासिकावधि ।
मांसाहारनिषेधश्च, **अक्बरैः** सर्वथा कृतः ॥ ४८० ॥

निर्दोषपशुपक्षीणाममारित्वं च घोषितम् ।
शत्रुंजयादितीर्थानां, करस्तेन निषेधितः ॥ ४८१ ॥

पर्युषणादिने चैव, समस्तभारते खलु ।
मांसाहारनिषेधश्च, कारितः सूरिबोधतः ॥ ४८२ ॥

साधूनां विहृतौ विघ्नं दूरीकृतं च भारते ।
सूरिषु भक्तियोगेन, उपदेशप्रभावतः ॥ ४८३ ॥

जगद्गुरुपदं तेषामर्पितं भक्तिभावतः ।
तत्सभासु च नान्येन, सम्प्राप्तं तादृशं पदम् ॥ ४८४ ॥

सर्वजनहितायैव, कार्यं कृतमनेकशः ।
तत्सर्वं परिदृष्टव्यं, सूरीश्वराख्यग्रन्थके[१] ॥ ४८५ ॥

शासनदीपकेनैव, विद्याविजयबन्धुना ।
लिखितं स प्रमाणेन, सर्वदेशीय युक्तितः ॥ ४८६ ॥

हीरविजयसूरीणां सन्नाम भारते खलु ।
सुवर्णाक्षररूपेण, विद्यते जगती तले ॥ ४८७ ॥

महावीरप्रभूणां च, अहिंसा परिघोषणा ।
सम्पूर्णभारते चैव, प्रवर्त्तिता च सूरिणा ॥ ४८८ ॥

भारतीयाश्च राजानः, सूरीणां चरणाम्बुजे ।
अहोभाग्यं च मन्वाना, आगच्छन्ति च प्रेमतः ॥ ४८९ ॥

**अपूर्वसूरी**सौभाग्यमपूर्वविज्ञता तथा ।
अपूर्वशिष्यसन्दोहोऽपूर्वं सूरिवरे खलु ॥ ४९० ॥

रोगाक्रान्ते शरीरेऽपि, भैषज्यं नैव सेवितम् ।
धर्मध्यानं च कुर्वाणाः, सूरयश्च दिवं गताः ॥ ४९१ ॥

ऊनाख्यग्राममध्ये च, अन्त्या सर्वा क्रिया तदा ।
कृता श्राद्धेन भावेन, सशोकेनैव तत्क्षणे ॥ ४९२ ॥

१. सूरीश्वर अने सम्राट् ग्रन्थतः ।

१५

श्रीहेमविजय कवि रचिते

विजयप्रशस्तिमहाकाव्ये

# श्री हीरविजयसूरि संदर्भः ॥

## चतुर्थः सर्गः ॥

अथ धात्रीलताधात्रीरुहः स्फारफलप्रदः ।
**गूर्जर**त्राभिधो देशः क्रीडाक्रीड इव श्रियः ॥ १ ॥

यं विमानगृहं कल्पद्रुमं निर्जरमानवम् ।
दृष्ट्वा त्रिविष्टपं द्रष्टुं न स्यादुत्कण्ठितं मनः ॥ २ ॥

यत्र धर्मार्थकामानां संगमः पुंसु दृश्यते ।
श्रेयोलक्ष्मीकलाकेलियुतास्ते यदहर्निशम् ॥ ३ ॥

श्रीकण्ठश्रीपतिश्रीदान् यज्जनान् विदधे विधिः ।
यदीश्वरतमोध्वंसिधनदत्वयुता अमी ॥ ४ ॥

द्रुमाः कल्पद्रुमा यत्र धेनवः कामधेनवः ।
मानवाश्च सुपर्वाणो देवदेशस्तदस्ति यः ॥ ५ ॥

प्रतिद्रङ्गं प्रतिग्रामं प्रत्योकः प्रतिपाटकम् ।
आर्हत्यो मूर्त्तयो यत्र तेन पुण्यमयोऽस्ति यः ॥ ६ ॥

नित्यं जगज्जनानन्दिसुवर्पभरभासुरम् ।
**प्रह्लादनपुरं** तत्र पुरन्दरपुरोपमम् ॥ ७ ॥

नित्यं वैश्रमणोल्लासं नित्यं पुण्यजनप्रियम् ।
सदारम्भं सदासारं यदभादलकासदृग् ॥ ८ ॥

दृष्ट्वेत्यूचुर्जनान् यत्र यथाकामं प्रयच्छतः ।
किं पञ्चत्वमिता देवद्रुमा अस्मिन्नवातरन् ॥ ९ ॥

छायाभृन्नन्दनानन्दाः सुरसार्थमनोहराः ।
यत्रोच्चैरप्सरायन्ते सत्कामाः कमलेक्षणाः ॥ १० ॥
मत्तमातङ्गगामिन्यः सुरार्थाश्चलदर्शनाः ।
निन्द्या अपि मुदे सन्ति यत्र त्रस्तमृगीदृशः ॥ ११ ॥

शस्तहस्ताः स्फुरत्पद्मा दानिनः शोभनासनाः ।
इभ्या इभा इवाऽऽभान्ति यत्राऽवग्रहशालिनः ॥ १२ ॥

यत्र प्रदत्तदृक्शैत्येऽर्हच्चैत्ये मुरजध्वनिः ।
धरत्यम्भोधरध्वानकलां वनकलापिनाम् ॥ १३ ॥

यत्र चैत्योदरे दग्धधूपधूमो विजृम्भितः ।
अभूदभ्युन्नताम्भोदविभ्रमाद् बर्हिणां मुदे ॥ १४ ॥

इति यत्राभवद्वार्त्ता महाकौतुककारिणी ।
व्यानेश सा जगत्तैलबिन्दुरम्भ इवाभितः ॥ १५ ॥

तथाहि समभूत् पूर्वं प्रह्लादनमहीपतिः ।
नेताऽ**र्बुद**गिरीन्द्रस्य स्वर्गस्येवाऽच्युताग्रजः ॥ १६ ॥

तेन श्रीशान्तिनाथस्य प्रतिमा गालिता पुरा ।
तत्पातकादभूद् दुष्टं कुष्ठं तस्याऽवनीपतेः ॥ १७ ॥

तया तस्याथ लावण्यरूपादि प्राणशद् रुजा ।
महसां महिमा सर्पदृशेवौकोमणेः क्षणात् ॥ १८ ॥

स्वनाम्नाऽथाऽमुना राज्ञा **प्रह्लादनपुरं** पुरम् ।
वासितं पृथुलं पृथ्वीपुरन्ध्रीपुण्ड्रसन्निभम् ॥ १९ ॥

तदेनः शान्तये तेन चैत्यं पार्श्वप्रभोः पृथु ।
कारितं षोडशस्वर्णकपिशीर्षकशीर्षभृत् ॥ २० ॥

तत्पुण्यतः प्रनष्टेऽस्मिन् दुष्टे कुष्ठे क्षणाद् नृपः ।
लब्धलावण्यलीलादिः पुनर्जात इवाऽभवत् ॥ २१ ॥

प्रत्यहं मौक्तिकानीव ढौक्यन्ते चाऽक्षताक्षताः ।
**प्रह्लादनविहारे**ऽस्मिन् मूढकप्रमिता जनैः ॥ २२ ॥

जनानां मुञ्चतां पुगीफलान्यस्मिन् जिनौकसि ।
बीजानीव स्वभावद्रोर्मणान्यासंश्च षोडश ॥ २३ ॥

यत्रेति वचनैरभ्यागतं प्रणयिनं प्रजाः ।
सुखयामासुरानन्दकन्दकन्दलनाम्बुदैः ॥ २४ ॥

तत्र **कुंराभिधः** श्रेष्ठी श्रेष्ठधीः शिष्टशेखरः ।
महेश इव संजातः सर्वदा सर्वमङ्गलः ॥ २५ ॥

निष्कलङ्कं समालोक्य साक्षाद् यं यस्य वेश्मनि ।
श्रीश्चलत्वकलङ्कं स्वं मार्ष्टुकामेव तस्थुषी ॥ २६ ॥

पुमर्थत्वेन धर्मार्थकामेषु सदृशेष्वपि ।
संजघ्नतुः सङ्गतौ द्वौ यद्धर्मं नार्थमन्मथौ ॥ २७ ॥

धर्मो धत्ते ध्रुवं पुंसामर्थकामौ निषेवितः ।
ध्यात्वेति धीमता येन धर्म एवाऽऽदृतः सदा ॥ २८ ॥

दानं दीनार्थिपात्रेषु नित्यं येनाऽपि यच्छता ।
बहुमन्यन्त पात्राणि पयोदेनेव बर्हिणः ॥ २९ ॥

ब्रह्मवत्सु गृहस्थेषु यस्य श्रेष्ठिशिरोमणेः ।
रेखा सुदर्शनस्येव प्रथमा प्रथमाकृतेः ॥ ३० ॥

उल्लसद्भाग्यसौभाग्या लावण्यजलदीर्घिका ।
**नाथी** तस्याऽभवद् भार्या लक्ष्मीर्लक्ष्मीपतेरिव ॥ ३१ ॥

सदोदाराऽब्धिपुत्रीव रम्भेव च वृषादरा ।
पद्मिनीव सदामोदा हरीणामपि या मुदे ॥ ३२॥

पङ्केरुहं जडोल्लासि दोषोल्लासी सुधाकरः ।
यन्मुखेन समे नेमे मतिमद्गुणपोषिणा ॥ ३३॥

मौक्तिकस्वर्णरत्नानां नूत्नालङ्कृतयोऽपि हि ।
प्रत्युतालङ्क्रियन्ते स्म यच्छरीररुचां भरैः ॥ ३४॥

सीता कुशीलतासारा शश्वज्जडा सुरापगा ।
यस्या नेत्यनयोः साम्यं शीलकौशलसम्पदः ॥ ३५॥

कुरङ्गत्वरजोयुक्त्वप्रोन्मादित्वकलङ्किषु ।
न यल्लोचनतुल्यत्वं सारङ्गाम्भोजसीधुषु ॥ ३६॥

सिंहः कटिर्गतिर्हस्ती मुखं चन्द्रो दृगम्बुजम् ।
नामूनि कलहायन्ते मिथो वैरेऽपि यत्तनौ ॥ ३७॥

सा भुङ्क्ते स्म भवानीव कौमुदीकान्तशालिना ।
सार्द्धं स्वप्राणनाथेन **नाथी** सांसारिकं सुखम् ॥ ३८॥

**कुंराख्य**श्रेष्ठिनः पत्नी सुखसुप्ताऽथा साऽन्यदा ।
बिभर्त्ति स्मोत्तमं गर्भमभ्रमालेव वारिदम् ॥ ३९॥

सुरशैलमिवोत्तुङ्गं भास्वन्तमिव भासुरम् ।
हीरराशिं तदैवाशु सा स्वप्नान्तरुदैक्षत ॥ ४०॥

पद्मिनीव प्रबुद्धा सा प्रातः प्रोत्फुल्ललोचना ।
तं स्वप्नं पुरतः पत्युः प्रोवाचाऽऽमोदमेदुरा ॥ ४१॥

मुक्तेव शुक्तौ तत्कुक्षौ गरभो ववृधेऽथ सः ।
बिभ्रती साऽशुभद् गर्भं तं निधानमिवाऽवनिः ॥ ४२॥

प्रभावात्तस्य गर्भस्य सोच्चैर्वाल्लभ्यभुरभुत् ।
शाखेव सहकारस्य फलानां परिपाकतः ॥ ४३ ॥

श्रीसंदर्भस्य गर्भस्याऽनुभावात्तस्य दोहदाः ।
बभूवुः सुभगास्तस्याः शस्याभ्युदयहेतवः ॥ ४४ ॥

जननी जननीतिज्ञा सद्यः सम्पूर्णदोहदा ।
प्रमोदं प्राप सा प्राप्तस्वर्णसिद्धिरिवाऽधिकम् ॥ ४५ ॥

अथो वर्षे शक्तिसिद्धिशिलीमुखसितत्विषि ।
मासे सहसि शीतोस्त्राऽनवमे नवमे तिथौ ॥ ४६ ॥

शुभेऽहनि कलाकेलिकुलं कुवलयप्रियम् ।
पूर्णिमेवैन्दवं बिम्बं साऽसूत सुतमुत्तमम् ॥ ४७ ॥

तदाऽभूद्दीपकोद्द्योतस्तिरस्तस्य तनुत्विषा ।
यत्तारातेजसां स्तोमः किं स्यादभ्युद्गते रवौ ? ॥ ४८ ॥

अनुकूलं मुदां मूलं श्रुत्वा जन्माऽङ्गजन्मनः ।
श्रेष्ठ्यमोदिष्ट सः स्पष्टविष्टपैश्वर्यभागिव ॥ ४९ ॥

अमन्दानन्दकन्दस्य स्थानस्योल्लासवीरुधः ।
अत्यर्थसुभगस्याङ्गजन्मनो जन्मशंसिनाम् ॥ ५० ॥

यच्छन् सोऽतुच्छधीर्वर्द्धापनिका नान्तरं व्यधात् ।
वर्षस्तोयधरस्तोयं किं भवेद्भेदभाग् भुवाम् ? ॥ ५१ ॥

महान् महो महेभ्येन तेनाऽऽरब्धो मुदब्धिना ।
यज्जनौ तादृशां पुंसामुत्सवानामतुच्छता ॥ ५२ ॥

मञ्जु मङ्गलगीतानि गीयन्ते स्म तदोकसि ।
न वसन्तोत्सवे किं स्युः कोकिलानां कलोक्तयः ?
॥ ५३ ॥

तेन दानान्यदीयन्ताऽर्थिनां सार्थे यथार्थनम् ।
प्राज्याः पाथोमुचेवोच्चैरापश्चातकपोतके ॥ ५४॥

सकर्णा अभणन् कर्णानन्दिनो बन्दिनस्तदा ।
किं क्रीडाक्रीडकाश्यप्यां मञ्जु गुञ्जन्ति नालयः ?
॥ ५५॥

तदाऽभुर्घुसृणैर्न्यस्ता हस्तकाः शस्तकारिणः ।
बालार्का उत्सवं द्रष्टुं बहुरूपैरिवागताः ॥ ५६॥

रेजेऽजिरे तदा न्यस्तो मौक्तिकस्वस्तिकोत्करः ।
गाम्भीर्याद् मामयं बालो जेतेत्यब्धेरिवोपदा ॥ ५७॥

ढौकितानि पुरीलोकैः प्राविशंस्तद्गृहे तदा ।
प्रोच्चैः पूर्णानि पात्राणि मुदां बीजैरिवाऽक्षतैः ॥ ५८॥

कम्राम्रपत्रैः क्लृप्ताऽभात् तत्रोच्चैस्तौरणी ततिः ।
सौरभ्याद् मामयं जेता सूनुरिष्योपदेति किम् ? ॥ ५९॥

इत्युत्सवैर्मुदां मूलैर्भूरि भाति स्म तत्पुरम् ।
राजधानी सुखोत्कर्षहर्षक्षोणिपतेरिव ॥ ६०॥

हीरराशिर्यदुत्तुङ्गः स्वप्रान्तर्ददृशेऽम्बया ।
हीरस्तद् भविताऽर्भोऽयं विश्वमानवमौलिषु ॥ ६१॥

इति मत्वा पिताऽतुच्छमहोत्सवपुरस्सरम् ।
हीरजीति व्यधात् सूनोर्नाम धाम गुणश्रियाम् ॥ ६२॥

कल्पद्रुरिव रम्भाभिर्लाल्यमानः पुरन्ध्रिभिः ।
कुमारः कलयामास कलभिर्वृद्धिमिन्दुवत् ॥ ६३॥

स जहौ क्रमतः क्षीरकण्ठतां शठतामिव ।
ललौ च गुरुतो विद्या वार्द्धेरप इवाम्बुदः ॥ ६४॥

प्राप्ताऽनवद्यविद्यः स दत्ते स्म जगतां मुदम् ।
पीयूषपादः संपूर्णकलोऽब्धेरम्भसामिव ॥ ६५ ॥

अथ सच्छाययोः पुष्पदन्तयोरिव सर्वदा ।
क्लेशामयभरध्वंसे दक्षयोर्दस्रयोरिव ॥ ६६ ॥

पुनर्वस्वोरिवाऽजस्रं जगदुल्लासितारयोः ।
सम्यगाराधनापूर्वं पित्रोर्दिवमुपेतयोः ॥ ६७ ॥

कुमारः सोऽन्यदा स्वस्याः स्वसुर्मिलनहेतवे ।
**श्रीपत्तन**मलञ्चक्रे मनोभूरिव मूर्त्तिमान् ॥ ६८ ॥

भगिनी सुभगाकारं वीक्ष्य सोदरमात्मनः ।
चक्रपाणिमिवाऽपर्णा प्रमोदं प्राप पुष्कलम् ॥ ६९ ॥

अथ **श्रीविजयदाना**भिधानान् सूरिसिन्धुरान् ।
नमति स्म कुमारः स **पत्तने** तत्र तस्थुषः ॥ ७० ॥

तत्राऽमीषां मुनीन्द्राणामुपदेशेन शालिन ।
नादेनाऽम्भोमुचां भेजे मुदं बर्हीव **हीरजीः** ॥ ७१ ॥

वैराग्यवासितो दीक्षां जिघृक्षुः स कुमारराट् ।
समेत्य सदनं सद्यः स्वां स्वसारमदोऽवदत् ॥ ७२ ॥

मया सोदरि! संसारकमलाकरचन्द्रिका ।
देशना पूज्यपादानां शुश्रुवे श्रुतिशर्मकृत् ॥ ७३ ॥

अवश्यमहमादास्ये तपस्यां गुरुसंनिधौ ।
तन्ममानुमतिं देहि हे सहोदरि! सुन्दरि! ॥ ७४ ॥

भ्रात्रेत्यभिहिता साऽश्रुमुखी सा सुमुखी जगौ ।
तर्णकस्येव धूर्वत्स ! तपस्या तव दुर्वहा ॥ ७५ ॥

परिणीयाऽधुना तेन वधूं देववधूपमाम् ।
भुङ्क्ष्व भोगांस्तया सौम्य समं रत्येव मन्मथ: ॥ ७६ ॥

ममाधारोऽसि वत्स! त्वं लताया इव भूरुह: ।
भ्राता हि सुखकृत् स्त्रीणां कृषीणामिव वारिमुक् ॥ ७७ ॥

इत्याग्रहरुजं तस्या वैराग्यवचनौषधै: ।
स कुमारोऽगदङ्कार इव सद्यो निराकरीत् ॥ ७८ ॥

अथोपाश्रयमागत्य नत्वा च मुनिसत्तमान् ।
**हीरजी**र्व्याजहारैवं हारिणं विनयं वहन् ॥ ७९ ॥

तपस्यामहमादित्सुरस्मि क्लेशविनाशिनीम् ।
भगवन्! भवदभ्यर्णे कूपे पाथ इवाऽध्वग: ॥ ८० ॥

तस्येति वचसाऽऽचार्यवर्या मुमुदिरेतराम् ।
शिष्यरत्नस्य लब्धौ हि हर्ष उत्कर्षभाग् भवेत् ॥ ८१ ॥

निरीक्ष्य शस्तै: सामुद्रैर्लक्षितं लक्षणैरिमम् ।
गणेन्द्रैर्निरणायीति भाव्ययं गच्छधूर्वह: ॥ ८२ ॥

सज्जितस्फारशृङ्गारैरस्वप्नैरिव नागरै: ।
गीतैश्च मङ्गलोल्लासै: स्त्रीणामप्सरसामिव ॥ ८३ ॥

विमानैरिव सदनै: सूत्रितोत्तुङ्गतोरणै: ।
वर्त्मना नन्दनेनेवाऽऽनन्दिना पुष्पपङ्क्तिभि: ॥ ८४ ॥

देवद्रुमैरिवात्यन्तोदारैर्दत्तधनैर्जनै: ।
गायद्भिर्मधुरं देवगायनैरिव गायनै: ॥ ८५ ॥

पौरैश्च पोषितैर्नानाभोजनैरमृतैरिव ।
वर्यतूर्यस्वरैर्देवदुन्दुभिस्तनितैरिव ॥ ८६ ॥

भूषितैर्दन्तिभिर्देवदन्ताबलैरिवोद्धुरैः ।
सोत्साहैरुत्सवैरेवं पुरन्दरपुरायितम् ॥ ८७ ॥

**पत्तनं** पावयन् प्रोच्चैः पीयूषसदृशा दृशा ।
सविस्मयं स्मिताक्षीभिर्गवाक्षस्थाभिरीक्षितः ॥ ८८ ॥

सामोदकुसुमस्तोमचामरच्छत्रराजितः ।
मौक्तिकैः काञ्चनै रात्नैरलङ्कैरलङ्कृतः ॥ ८९ ॥

सारसिन्दूरपूरेण बन्धुरे सिन्धुरे स्थितः ।
कुङ्कुमैश्चन्दनैश्चोक्षैश्चर्चितश्चारुचीरभृत् ॥ ९० ॥

स्फारशृङ्गारया सारं रथमास्थितया पथि ।
अनुगम्यमानः स्वस्रा **विमलाई**तिसंज्ञया ॥ ९१ ॥

शोभितः सुमनोवृन्दैः सुरेन्द्र इव मूर्त्तिमान् ।
सोऽन्तर्नगरमुल्लासी निर्जगाम शनैः शनैः ॥ ९२ ॥

विक्रमाद् रसनन्देषुद्विजेशे परिवत्सरे ।
बाहुलस्य बहुलायां द्वितीयायां शुभेऽहनि ॥ ९३ ॥

असौ **श्रीविजयदानसूरि**सिन्धुरसंनिधौ ।
पर्यणैषीत् परिव्रज्यापत्नीं पद्मामिवाच्युतः ॥ ९४ ॥

सहर्षं **हीरहर्षाह्वो** मुनिर्गुणमहोदधिः ।
कलभः कुञ्जरेणेव व्यहार्षीद् गुरुणा समम् ॥ ९५ ॥

महाव्रतानि पञ्चापि पञ्चापि समितीः पुनः ।
गुप्तीस्तिस्रश्च स मुनिः पालयामास यत्नतः ॥ ९६ ॥

सेवमानो गुरुं देवोद्यानं विबुधसेवितम् ।
विनयामरसालस्य फलं विद्यां स लेभिवान् ॥ ९७ ॥

सोऽप्रमत्तः पपौ सर्वं शास्त्रं स्वं स्वगुरोः सुधीः ।
ग्रीष्मतप्तो भुवां भाग इवाऽब्दान्निपतत् पयः ॥ ९८॥

**हीरहर्ष**मसंहर्षमात्तात्मसमवाङ्मयम् ।
गुरुर्गुरुमिवाऽऽलोक्य दध्यावित्यन्यदाहृदि ॥ ९९॥

स्वकीयं परकीयं च योऽधीते वाङ्मयं सुधीः ।
आविष्कर्त्तांशुमालीव स स्यात् सदसतोः पथोः ॥ १००॥

**हीरहर्षगणि**र्नूनं शैवदर्शनशास्त्रवित् ।
यदि जायेत तत् साधु यदसौ बहुबुद्धिभृत् ॥ १०१॥

ध्यात्वेति प्रेरितः सम्यक् शिष्योऽसौ सूरिपुङ्गवैः ।
अगस्त्याध्यासितदिशो देशे गन्तुमना अभूत् ॥ १०२॥

**श्रीधर्मसागरगणि**प्रमुखैश्च महर्षिभिः ।
युतश्चतुर्भिर्दानाद्यैर्भेदैर्धर्म इवाऽङ्गवान् ॥ १०३॥

विजह्रे **हीरहर्षः** सहर्षस्तत्र नीवृति ।
नभःकूलङ्कषाकूले कलहंस इवाऽमलः ॥ १०४॥

तत्र **देवगिरौ** देवगिराविव महोन्नते ।
पञ्चर्षयस्तेऽस्थुर्ज्येष्ठस्थिति देवद्रुमा इव ॥ १०५॥

प्रतिबिम्बमिवादर्शे चिन्तामण्यादि वाङ्मयम् ।
सर्वं तद्धृदि संक्रान्तं जाह्नवीजलनिर्मले ॥ १०६॥

अधीत्य शैवशास्त्रं तत् तत्राऽयं निखिलं खलु ।
**गूर्जरत्रा**मगाद् वार्धौ लात्वा नीरमिवाऽम्बुदः ॥ १०७॥

स्वकीयपरकीयाभ्यां शास्त्राभ्यां शास्त्रवित्तमः ।
अधीताभ्यामभाद् द्वाभ्यां स दोर्भ्यामिव शूरराट् ॥ १०८॥

गुरूनथ मरौ मत्वा **हीरहर्षगणि**र्गुणी ।
जगाम तत्र स्वर्वापीप्रवाह इव पावनः ॥ १०९॥

तत्र त्रिजगतां पूज्यैः पूज्यपादैरलंकृताम् ।
**श्रीनारदपुरीं** प्रौढप्रासादं प्राप स प्रभुः ॥ ११० ॥

भणित्वाऽष्टोत्तरं नव्यकाव्यानां शतमग्रतः ।
ललाट्टपट्टसङ्घट्टिकोटीरायितपाणिना ॥ १११ ॥

साक्षात् पुंरूपया वाचामधिदेवतयेव ते ।
**हीरहर्षेण** हर्षेण गुरवोऽथ ववन्दिरे ॥ ११२ ॥

परिपूर्णकलं पुत्रं प्रेक्ष्याऽमी सूरिशेखराः ।
उल्लसन्ति स्म शीतांशुमिव वारिधिवीचयः ॥ ११३ ॥

तत्रैव नगरे वर्षे ससव्योमर्तुभूमिते ।
शुभेऽहि ललिते लग्ने प्रासादे वृषभप्रभोः ॥ ११४ ॥

सत्यङ्कारमिवाचार्यपदप्रकटसंपदाम् ।
विद्वत्पदं पदं कीर्त्तेर्गुरवो ददिरेऽस्य ते ॥ ११५ ॥

तत् पण्डितपदं **हीरहर्षे** विदुषि धीजुषि ।
सुवर्णे हीरवद् रेजे सार्द्धषोडशवर्णिके ॥ ११६ ॥

अथानघेन संघेन **श्रीनारदपुरी**पुरः ।
पुनर्विज्ञपयांचक्रे तपागच्छाधिभूर्विभुः ॥ ११७ ॥

विदुषां **हीरहर्षा**णामुपाध्यायपदं प्रभो! ।
संघाशावल्लिविस्तारवारिदानां प्रदीयताम् ॥ ११८ ॥

पुण्याहूतनिजाकूताऽव्यभिचारिणि चारुणि ।
सङ्घस्य वचनेऽमुष्मिन् सूरेश्चित्तममोदत ॥ ११९ ॥

संवत्सरेऽथ पृथ्वीध्रसुराध्वरसशीतगौ ।
माघे मास्यमृतज्योतिःपञ्चमे पञ्चमे तिथौ ॥ १२० ॥

**श्रीनारदपुरी**नाम्नि पुरेऽत्युत्सवसुन्दरे ।
**वरकाणा**भिधानश्रीपार्श्वतीर्थेशसाक्षिकम् ॥ १२१ ॥

चैत्ये श्रीनेमिनाथस्य सनाथस्याऽद्भुतश्रिया ।
सम्यक् संमतिमादाय साधूनां गच्छवासिनाम् ॥ १२२ ॥

उपाध्यायपदेऽस्थापि **हीरहर्षः** स सूरिभिः ।
स्थानेऽङ्कुर इवाचार्यपदर्द्धिवरवीरुधः ॥ १२३ ॥

शुशुभे **श्रीतपागच्छ**स्तेन वाचकचक्रिणा ।
काननं कुञ्जरेणेव दानवारिविराजिना ॥ १२४ ॥

आधिपत्यं गणस्यास्य भविता दीप्तिमत्तमम् ।
**श्रीहीरहर्षो**पाध्याये वज्रिणीव दिवः सदा ॥ १२५ ॥

ध्यात्वेति सूरयः सूरिमन्त्राराधनमुत्तमम् ।
विधिना साधु **सीरोहीनगरे** चक्रिरेऽन्यदा ॥ १२६ ॥

अथाऽऽसूत् सूरिमन्त्रस्याधिष्ठायकसुरः पुरः ।
प्रत्यक्षः प्रेष्यवत् प्रोच्चैः प्रमनाः सूरिहस्तिनाम् ॥ १२७ ॥

वाचको **हीरहर्षा**ख्य आख्यातः शमिनां गुणैः ।
स्वस्मिन् पट्टे प्रभो स्थाप्यः प्रतिबिम्ब इवात्मनः ॥ १२८ ॥

इत्युक्त्वा पूजयित्वा च मौक्तिकैरक्षतैरिव ।
यथागतं सुपर्वाऽयमभ्यागत इवागमत् ॥ १२९ ॥

वचनेनाऽमुना धैर्यवर्या आचार्यपुङ्गवाः ।
कृषीवला इवाऽम्भोदगर्जितेन मुदं दधुः ॥ १३० ॥

अहो! वचनमेतस्य दैवतस्य महात्मनः ।
अर्थ उक्तेरिव मदाशयस्याऽव्यभिचार्यभूत् ॥ १३१ ॥

चिन्तयित्वेति चित्तान्तश्चिरं सूरिपुरन्दरैः ।
पृष्टाः प्रोचुर्यथाकाममिति सर्वेऽपि साधवः ॥ १३२ ॥

अब्देऽथ शुद्धे धिष्ण्याध्वधिष्ण्येशर्तुधरामिते ।
दशम्यां सहसो मासो विशदद्युतिसंपदि ॥ १३३ ॥

कर्के राहौ शनौ कुम्भे सौम्यमार्त्तण्डयोरलौ ।
गुरौ भृगौ च कन्यायां मीने कुमुदिनीपतौ ॥ १३४ ॥

अंशैश्च बलिभिः सर्वैर्धनुर्लग्ने समङ्गले ।
अष्टादशभिरदुष्टे दोषैर्वेधादिभिर्दिने ॥ १३५ ॥

पुरे **शिवपुरी**नाम्नि महोत्सवमनोहरे ।
सङ्गते सङ्घसङ्घातेऽनर्घे मञ्जुमनोरथे ॥ १३६ ॥

हर्षेण **हीरहर्षाणां** वाचकानां गणाधिपाः ।
गच्छैश्वर्य तरोर्बीजमिवाचार्यपदं ददुः ॥ १३७ ॥

वशक्रियाया जगतां मूलमन्त्रमिवानघम् ।
नामापि **हीरविजय** इत्येषां गुरवो व्यधुः ॥ १३८ ॥

इदं सूरिपदं प्राप्य तेजसामेकमास्पदम् ।
दिदीपेऽधिकमाचार्यो मध्याह्नमिव भास्करः ॥ १३९ ॥

सुरिश्च युवराजश्च द्वावेतौ सदृशक्रमौ ।
गच्छचिन्तां वहतः स्माऽनोधुरां वृषभाविव ॥ १४० ॥

अभूद् दिप्तिमतोः शश्वत् सूरीशयुवराजयोः ।
गच्छे तेजोऽद्भुतं व्योम्नि सूर्याचन्द्रमसोरिव ॥ १४१ ॥

क्रमात् **कुङ्कणदेशो**र्वीमुखमण्डनमुत्तमम् ।
भूषयन्ति स्म ते सूरिसूराः **सूरतिबन्दिरम्** ॥ १४२ ॥

असमकुसुमे ताम्राक्षाणामिवाम्रतरौ वने
सरसि सरसे रोलम्बानामिवाम्बुरुहे स्मिते ।
इह निवसतां पुण्याशानामशेषमहीस्पृशां
स्थितवति गुरौ तुङ्गेऽजनिष्ट सुखं महत् ॥ १४३ ॥

चतुर्थः सर्गः समाप्तः ॥

**आचार्यहीरविजया** अथ सत्प्रथेषु प्राप्तेषु सूरिषु सुपर्वपुरीममीषु ।
खेदं तदा विदधिरे हृदि चक्रवाका द्वीपान्तरं गतवतीव सरोजबन्धौ ॥ ३२॥

या धूः सुधर्मगणभृत्प्रमुखैरशेषै रूढेऽत्र सूरिभिरभिद्रुतवादिवृन्दैः ।
दध्रेऽथ सा स्वयममीभिरहार्यधैर्यैर्धुर्यैरिवात्मभुजमूर्धनि वर्यवीर्यैः ॥ ३३॥

श्रीगौतमप्रतिममूर्त्तय आर्यवर्या राज्यं तपागणनभोऽङ्गणभासमानाः ।
प्रापालयन्नथ समर्थमसीमभीमकान्तैर्गुणै रविहिमांशुसमा इवामी ॥ ३४॥

सर्वज्ञशासनविभासनभासि राज्यं प्राज्यं प्रपालयति सूरिपुरन्दरेऽस्मिन् ।
क्षोणीतलेऽत्र शुशुभे न परं परेषां तेजः सहस्रकिरणे सुरवर्त्मनीव ॥ ३५॥

अस्मिन्नशोभततमाममरत्वभाजामप्यद्भुतं मह इलातिलके गुरूणाम् ।
सप्तार्चिषीव चरमाचलचूलिकायां चूलामणीयिततनोस्तमसामरातेः ॥ ३६॥

भट्टारकोत्वमधिगम्य मुनीन्द्र एष सौभाग्यभूरपि जगत्यधिकं दिदीपे ।
भद्रः करीन्द्र इव पार्थिवसार्वभौमद्वारावनीनलिनदृक्तिलकायमानः ॥ ३७॥

भट्टारकऽयमिह साधुजनैरमानिभीमत्वभूरपि भृशं तपनो नवीनः ।
अस्योदये मुमुदिरे किल कौशिका यच्छायाजवादुदलसच्च घनप्रकाशा ॥ ३८॥

भट्टारकोप्रभुरसावपि कान्तकान्तिर्मेने जनैरिति नवः पतिरोषधीनाम् ।
दोषोदयो न यदभूददसीयदीप्तौ शोभां बभार सकलः कमलाकरश्च ॥ ३९॥

सप्तर्षिभूषितसमाजमथैकसौम्यं दोषज्ञयुग्मसुभगं धनदैक्यहारि ।
तत्तद्बहुत्वसहितेन तुलां न यस्य राज्येन सार्द्धमभजत् सुरराजराज्यम् ॥ ४०॥

कालिन्दिकासलिलकज्जलजालकालेऽङ्गारत्वमञ्चति कुवाद्ययशःप्रपञ्चे ।
कुन्देन्दुकम्बुकुमुदाकरभासि यस्य राज्ये स्थिरत्वमनिशं घनसार आसीत् ॥ ४१॥

भीमत्वभाजि बहुदुःसहतैकपात्रे ग्रीष्मेऽम्भसामिव रवेरिव भासि भानाम् ।
दुर्ध्यानदुर्गतिदुराग्रहदुर्मतीनां यद्वैभवे स्फुरति फल्गुदृशामसत्ता ॥ ४२॥

## नवमः सर्गः

तदा मुदा तत्पदपद्मषट्पदो-
ऽतिमेतखानः शुभगीरदोऽवदत् ।
इहाऽस्ति शस्ताकृतिराप्तवाग् व्रती
महामतिर्हीर इति व्रतिप्रभुः ॥ १५ ॥

स एव देवाऽम्बुजबन्धुवच्छुभा-
ऽशुभाध्वनोस्त्वत्प्रिययोः प्रकाशकः ।
स चाधुना क्वेत्युदितेऽथ शाहिना
स शाहिमाह स्म पुनः पटिष्ठवाक् ॥ १६ ॥

पयोजिनीं हंस इवाऽच्छपक्षभाक्
स गूर्जरत्रामधुनाऽधितिष्ठति ।
निशम्य तद्वाचमदम्भजृम्भितां
मुदं दधौ शाहिरहार्यधर्मधीः ॥ १७ ॥

वितीर्य पत्रं फुरमानसंज्ञकं
समानमाह्वानकृते कृती गुरोः ।
घनादरेणाऽऽत्मजनान् स मेवडा-
भिधानथ स्म प्रहिणोति भूपतिः ॥ १८ ॥

जातावतारा जगतां हिताय ते
मुनीश्वराः कल्पितकल्पपादपाः ।
हवं नरेशस्य निशम्य सादरं
तदाऽभवंस्तत्र विहर्तुमुत्सुकाः ॥ १९ ॥

पदे पदे प्रौढमहोत्सवोत्सुकै-
र्जनैः प्रदत्ताद्भुतमानसंपदः ।
पदे पदे स्वस्तिकमुक्तमौक्तिकै-
र्वधूजनैर्मण्डितमङ्गलालयः ॥ २० ॥

पदे पदे सत्वर संमुखागतै
र्धराधिपैः सूत्रितसुन्दरादराः ।
पदे पदे प्राप्तघनार्थसंचयैः
सदर्थिभिर्गीतमनोज्ञगीतयः ॥ २१ ॥

रजोभिरंह्र्युच्छलितैर्भुवस्तलं
विभूषयन्तो द्युसदामपि प्रियैः ।
महाव्रतिप्रीतिकलैर्जलैर्नभः-
सरित्प्रवाहा इव विश्वपावनाः ॥ २२ ॥

सदा समुल्लासभृतः सुपर्वभि-
स्तापं हरन्तो जगतां गुरूत्तमाः ।
क्रमादलङ्कुर भङ्ग वैभव
**फतेपुर**श्रीत्रिपुरारिमस्तकम् ॥ २३ ॥

अथाङ्कहव्याशनभूपवत्सरे
त्रयोदशीवासर इन्दुवर्जिते ।
शुक्रे च मासे त्रिजगन्मनःसुख-
प्रदे प्रभाते त्रिदशेशमन्त्रिणि ॥ २४ ॥

दधत्सु शृङ्गारिसुहासिनीजन-
प्रणीतगीतैरतिमेदुरां मुदम् ।
ददत्सु दानं धनकाञ्चनाऽम्बरो—
र्मिकातुरङ्गद्विपमुख्यवस्तुनः ॥ २५ ॥

दुकूलदिव्याम्बररत्नकाञ्चना—
द्यलङ्कृतिस्तोममनोज्ञमूर्त्तिषु ।
जनेषु कुर्वत्सु महोत्सवान् बहून्
पुरे प्रवेशं विदधुर्दमीश्वराः ॥ २६ ॥

विपक्षसंपत्तटिनीपयोधिना
नयाम्बुजोल्लाससहस्ररश्मिना ।

विधाय पूर्वं मिलनं महीभुजा
प्रतिश्रये नः प्रतिगन्तुमर्हति ॥ २७ ॥

समर्थनिर्ग्रन्थगृहस्थसार्थसत्—
परिच्छदोपासितपादपङ्कजाः ।
विचार्य चित्तान्तरिति व्रतीश्वरा
**अकब्बरो**र्वीश्वरसौधमभ्यगुः ॥ २८ ॥

इमं समायान्तमदभ्रविभ्रमं
त्रयोदशर्षिप्रमुखैर्वृतं गुरुम् ।
**अकब्बरः** प्रेक्ष्य मुदं दधौतमां
शिखीवपाथोमुचमुन्नतं दिवि ॥ २९ ॥

नृपोऽभिगच्छन् सुमनोमनोरमो
भाति स्म साक्षादिव वासवस्तदा ।
विधाय सुस्वागतमागतोचितं
मुदाऽनमस्यच्च गुरोः पदद्वयीम् ॥ ३० ॥

अजय्यचेतोजतमोभवान्तकृद्
वृषाङ्कवैकुण्ठविरञ्चिसन्निभः ।
नृपाय कल्याणलतापयोमुचा
तदाऽभ्यनन्दत् सुकृताशिषा गुरुः ॥ ३१ ॥

त्रयोऽप्यथ स्वात्मभुवो भुवोमिल—
ल्ललाटपट्टाः सुखिताखिलप्रजाः ।
तदेरिताः क्ष्मापतिना गुरूत्तमान्
हिमोष्णवर्षासमया इवाऽनमन् ॥ ३२ ॥

त्रयोऽपि **शेखू**प्रमुखानृपाङ्गजा—
स्त्रिलोकलोका इव पुण्यवृत्तयः ।

तदा गुरोर्दर्शनतोऽतिशायिनीं
मुदं समीयुर्वसुधासुधाञ्जनात् ॥ ३३ ॥

तदा च तेषां क्षितिपात्मजन्मनां
गुरुस्त्रयाणामपि पुण्यतेजसाम् ।
वृषाशिषं द्राग् व्यतरद् हुतिं हवि—
र्भुजां द्विजन्मेव महःप्रदायिनीम् ॥ ३४ ॥

चारित्रमाहारविहारसंलया—
श्रयोपवासासनपानगोचरम् ।
अथ स्वयं प्रेषितपूरुषाननाद्
निशम्य सुरेर्मुमुदे महीपतिः ॥ ३५ ॥

अथैकतः संयमिलोकनायकौ
स्थितौ व्यभातामभितः प्रकाशकौ ।
विधेर्वशात् संगमितौ क्षमाधरौ
सुरारिजिच्छैलहिमालयाविव ॥ ३६ ॥

विशारदव्रातव्रतस्य धर्मिणौ
गुरोः पुरःस्थः स्थिरदृक् स्थिरेश्वरः ।
अपृच्छदच्छं परमात्मनः प्रभोः
स्वरूपमास्तिक्यसमं सविस्तरम् ॥ ३७ ॥

पुरातनाचार्यवरैर्निरूपितं
न्यरूपि पूज्यैस्तदशेषमुत्तमम् ।
पिबन् श्रुतिभ्यां तदतुष्यदुर्वरा—
पतिश्च वीणाक्कणितं फणीव सः ॥ ३८ ॥

निशम्य सम्यक् प्रविचार्य चात्मना
यथास्थितं तन्मुदमाप भूपतिः ।
मनःसुखामुक्तिमवाप्य धीमतां
न कस्य हर्षः खलु जायतेतमाम् ? ॥ ३९ ॥

अभूद् निजे धामनि वाङ्मयं पुरा
द्विधाऽऽत्म जैनं च यदैश्वरं च यत् ।
गुरोस्तदुर्वीपतिराश्वदर्शयद्
वदन् वरीयो विनयाञ्चितं वचः ॥ ४० ॥

विदन्नदस्तद्गुरुराददे च ना—
धुनैतदादानमकीर्तिकारि नः ।
नृपो विशेषाद् मुमुदे निरीहतां
निरीक्ष्य सूरेरतिशायिनीमिमाम् ॥ ४१ ॥

आगृह्य भूयोऽपि ददौ नृपस्तदा
तद्भारतीगेहमिवापरं परम् ।
**अकब्बरीया**भिधया च कोशगं
तत्पुस्तकं सर्वमचीकरद् गुरुः ॥ ४२ ॥

नृपेण दत्त्वा बहुमानमानम—
न्महीमहेन्द्रव्रजसेवितांह्रिणा ।
गुरुर्विसृष्टो निरगात् तदोकसः
पयोधराभ्रादिव धर्मदीधितीः ॥ ४३ ॥

विलोक्य मेने नृपगोपुरे पुरः
समेतमेतं गुरुमास्तिकैरिति ।
किमन्तिमार्हज्जनिराशितोऽद्य दु—
र्ग्रहोऽवरूढः खलु भस्मनामकः ॥ ४४ ॥

धराधिपाज्ञागतभूरितूरसत्—
स्वनैर्भवद्भिर्बधिरीकृताम्बरे ।
ददद्भिरर्थिप्रकरेभ्य ईप्सितां
श्रियं महेभ्यैरतिचारुचत्वरे ॥ ४५ ॥

महोत्सवे गायनगीतगौरवे
प्रभूतपद्माढ्यमलञ्चकार तम् ।

विमानमानर्द्धिमुपाश्रयं गुरुः
स मानसौका इव मानसं सरः ॥ ४६ ॥

दिनान्युषित्वा कतिचित् **फतेपुरे**
प्रजाप्रभुप्रेमपयोनिधौ विधुः ।
स **आगराख्ये** नगरे गरीयसि
क्रमाच्चतुर्मासकमासितो गुरुः ॥ ४७ ॥

निरन्तरं श्रीगुरुवज्रिणो व्यधात्
प्रशंसनं शाहिरिति स्वपर्षदि ।
क्रियासु वाक्येषु च तुल्यमदिशं
न यान्यमद्राक्षमहं मुनिं क्वचित् ॥ ४८ ॥

अथो गुरूणां पुरि तत्र तस्थुषां
निशम्य शाहिर्महिमानमद्भुतम् ।
दधद् मुदं पर्युषणादिनाऽभय—
प्रदेशनाख्यान् पटहानवीवदत् ॥ ४९ ॥

क्विय **शौरीपुरपुर्यथो** यदू—
द्वहस्य यात्रामतिमात्रसंघभृत् ।
जिनप्रतिष्ठां प्रचकार पारणे
पुरेऽथ तत्रैव पवित्रदृग् गुरुः ॥ ५० ॥

उपोयिवांसोऽथ पुनः **फतेपुरं**
गुरुप्रबर्हाः स्वपरिच्छदान्विताः ।
तमो हरन्तः सुरराजदिक्शिलो—
च्चयोच्चमूर्धानमिवाब्जबन्धवः ॥ ५१ ॥

निशम्य पुरिं पुनरागतं पुरे
**फतेपुरे** द्राग् मिलनोत्सुकोऽच्छदृग् ।

बभूव भूपः सुकृताभिलाषुको
गुरुर्गरिष्ठोऽप्यजनिष्ट तन्मनाः ॥ ५२ ॥

अथ प्रभूतप्रतिभाढ्यपण्डित—
व्रतिव्रजालङ्कृतसंनिधिः सुधीः।
अगच्छदत्यच्छमनाः स गच्छराड्
धराधिभूधाम निकामवामदृक् ॥ ५३ ॥

जनाक्षिनीलोत्पलपङ्क्तिकान्तिकृद्
दयोदधेः वृद्धिकरः कलानिधिः ।
सुरेण राज्ञा ददृशे प्रमोदकृत्
स सप्ततिश्चन्द्र इवर्षिभिर्युतः ॥ ५४ ॥

सदस्सदुल्लासविलासकोविदै—
र्वचोभिराचार्यसभाशिरोमणेः ।
गुरोर्मुदं प्रापदपापदृग् नृपः
प्रसेनजित्सूनुरिवान्तिमाऽर्हतः ॥ ५५ ॥

गुरोर्गिराऽथावनिजानिरब्जिनी—
प्रियप्रमाहःफुरमानपत्रकम् ।
समस्तजीवाभयदायि तत्क्षणा—
दलीलिखत् स्वाखिलमण्डलेष्वपि ॥ ५६ ॥

अमूमुचद् गुप्तिगृहाच्च बन्दिनो
विहङ्गवृन्दं दृढपञ्जरात् पुनः ।
निशानिबद्धान् मधुपानिवाऽम्बुजो—
दरादुदारोऽम्बुजिनीजनिः स्फुरन् ॥ ५७ ॥

मदाधिपत्यं भुवि यावदस्त्यदो
न हन्ति कोऽप्यत्र झषादिदेहिनः ।

वदन्निति क्षोणिपतिः पुरो गुरो—
रुपप्रदानेऽकृत **डाबरं** सरः ॥ ५८ ॥

नभोंऽशुनेवातिविभासुरं जगत्
सदाऽमुना श्रीगुरुणेति जल्पता ।
अतिप्रभूताद्भुतमानदानत—
स्तदाऽयमुच्चैः सदकारि भूभुजा ॥ ५९ ॥

अथो चतुर्मासकमुल्लसत्सुखे
**फतेपुरे** दत्तजयोत्सवे गुरुः ।
निरस्तमन्युर्गणभृद् महाव्रती
हरः शिवाया मनसीव तस्थिवान् ॥ ६० ॥

अरिधरणिपतिस्त्रीदृग्जलासारधारा—
निकरकरणवर्षोत्कर्षखड्गाग्रधारे ।
लसति सति **हमाउनन्दने** राज्ञि तत्र
स्थितिमकृत कृतर्द्धि ज्यायसीं सूरिराजः ॥ ६१ ॥

कमलकुवलयानां कोकधूकाङ्गनाना—
महिमहसि पूर्वे पर्वते प्रापुषीव ।
स्थितवति पुरि तस्यामोजसां धाम्नि सूरि—
द्युसदि सदसतां द्राग् भूत्यभूती अभूताम् ॥ ६२ ॥

कारुण्याम्भोनिधिमधि पतच्चित्तवृत्त्यण्डजेन
स्फूर्जन्प्रीतिस्मितनयनयाऽऽश्लिष्टवक्षःस्थलेन ।
नित्यं नीतो हृदयपदवीं **श्रीहमाउसुतेन**
द्रङ्गे तत्र स्थितिमधिगतो **हीरसूरिः** श्रिये वः ॥ ६३ ॥

# त्रयोदशः सर्गः

इतश्च भट्टारककोटिकोटी-
कोटीरहीरप्रभुसूरिहीरः ।
कृत्वोत्सवोत्साहविलासवर्या
ज्येष्ठास्थितिं **पत्तननामपुर्याम्** ॥ १ ॥

अत्यर्तिकृद्दुर्गतिदुःखहिन्त्रीं
कैवल्यकान्तारतिरङ्गदूतीम् ।
श्रीतीर्थ**शत्रुञ्जय**शैलराज-
यात्रां विधातुं प्रगुणीबभूव ॥ २ ॥

देवेन्द्रवृन्दप्रणतांह्रिपद्मः
श्रीमारुदेवप्रभुरादिदेवः ।
यं नन्दनन्दाङ्कितपूर्ववारान्
सर्वाद्रिशृङ्गारमलञ्चकार ॥ ३ ॥

उत्तुङ्गता यस्य न धीनिधीना-
मध्वानमायाति सरस्वतीनाम् ।
संस्पृश्यते यल्लघुकैरपीह
लोकाग्रभूमिस्तरसाऽधिरूढैः ॥ ४ ॥

पूतः प्रकामं हरशेखराया-
अद्भ्यः सदा यत्पथपांसुपूरः ।
आत्मानमन्तः कुरुते पवित्रं
स्पृष्टः शरीरेऽध्वनि गच्छतां यः ॥ ५ ॥

यद्वर्त्मरेणुस्तरणेः प्रकाशा-
दप्यस्ति विस्तारमितः प्रशस्तः ।
श्यामं तमोमण्डलमर्तिकृद् यद्
येनाऽङ्गलग्नेन समूलमस्तम् ॥ ६ ॥

गङ्गाप्रवाहादपि यस्य वर्त्म-
पांसुप्रपञ्चोऽस्त्यधिकत्वशाली ।
योऽभूच्छिवोल्लासकविप्रमोद-
श्रीपत्यदभ्रोत्सवमूलमुच्चैः ॥ ७ ॥

आरोहमार्गोऽत्र विभाति शैले
आरोढुमुच्चैस्तरसिद्धिसंज्ञम् ।
सौधं धुताबाधमनाधिमाशु
निश्रेणिसोपानपरम्परेव ॥ ८ ॥

तारोत्करैरिन्दुरिवातिसौम्यो
भासां भरैरर्क इव प्रतापी ।
भूयोभिरागाद्दृषिभिर्वृतः श्री-
सूरिस्ततस्तत्तलहट्टिकायाम् ॥ ९ ॥

दानैरमानैर्धनकाञ्चनानां
गीतैः सुगीतैः कुलकामिनीनाम् ।
तूर्यैश्च वर्यैर्मुरजानकाद्यैः
कुर्वद्भिरुत्साहकृदुत्सवालीम् ॥ १० ॥

**मेवातसम्मालवमेदपाट-**
**श्रीगूर्जरत्रामरु**मुख्यसंघैः ।
सार्धं महस्वी मघवेव देवै-
रध्यारुरोहाऽद्रिमसौ मुनीशः ॥ ११ ॥

त्रिस्तत्रनाथं प्रथमं परीय
नत्वा च नुत्वा च यथाप्रमोदम् ।
स्थित्वा पुनः कत्यपि वासराणि
श्रीतीर्थसेवामसमां च कृत्वा ॥ १२ ॥
सौवर्णटङ्कादिभिरर्चितः श्री-
संघेन सद्भक्ति सहस्रसंख्यैः ।

भट्टारकेन्द्रो विजहार **हीरः**
**शत्रुञ्जयात्** तीर्थवरात् ततोऽथ ॥ १३ ॥

मत्वा प्रभूताग्रह**मुन्नताह्व**-
द्रङ्गस्थसंघस्य सदाऽनघस्य ।
हंसः शरत्कालमकालबर्हः
क्ष्मायामिव स्मैति गुरुः स तत्र ॥ १४ ॥

ज्ञात्वा लाभमदभ्रमभ्रतटिनीरङ्गत्तरङ्गोल्लस—
त्कीर्तिस्फूर्तिपयःप्रवाहपटलप्रक्षालनक्ष्मातलाः ।
ते भट्टारककोटिकोटिमुकुटाश्चक्रुश्चतुर्मासकं
तत् तत्रैव पुरे पुरन्दरपुरप्रख्ये सुपर्वप्रिये ॥ १५ ॥

अजस्रं दस्राभ्यामिव वरतरैर्वैद्यककरै—
र्भिषग्भिर्भूयोभिः सततयतनैर्भेषजभरैः ।
विबुध्याऽसाध्यां स्वां रुजमिति निदानेन महता
द्वितीयां ज्येष्ठास्यां पुनरकृत तस्यां पुरि गुरुः ॥ १६ ॥

सरसि जलजस्तोमः सूर्यादिवोदयदिग्जुषो
वनभूवि तरुव्रातः सर्वोऽनिलादिव मालयात् ।
निवसतिकृतः कामं कम्रात् प्रसित्तभराद् गुरोः
समजनि पुरे पौरस्तस्मिन् सुखी सकलोऽपि हि ॥ १७ ॥

卐

# चतुर्दशः सर्गः

अथो विशां भर्तुर**कब्बरस्य**
मनःपयोजन्मविलासहंसः ।
ततः पुरादर्जितवर्यकीर्ति-
र्विहर्तुकामोऽजनि सूरिसिंहः ॥ १ ॥

धराधिपं नीतिलतावितान-
पयोदमापृच्छ्य सदाऽऽदराढ्यम् ।
बुधं च **नन्देर्विजयो**त्तराह्वं
विमुच्य तत्राऽवनिपोपरोधात् ॥ २ ॥

जयेन्दिरासुन्दरदोर्लताभ्यां
निकामनिष्पीडितकण्ठपीठः ।
गुरुर्व्यहार्षीत् पुरतस्ततोऽथ
कुपाक्षिकाम्भोदभिदार्समीरः ॥ ३ ॥

निजैः पदाम्भोजरजोभिरुच्चैः
शुचिं सृजन् भूमिमिमामशेषाम् ।
गुरुः क्रमा**च्छ्रीमहिमा**भिधानं
पुरं पुरप्रष्ठमलञ्चकार ॥ ४ ॥

इतश्च भट्टारक**हीरसूरेः**
पुरोत्तमा**दुन्नत**नामधेयात् ।
इयाय लेखो वपुषोऽसमाधे-
रुदन्तवादी च हवात्मकश्च ॥ ५ ॥

ततः पुरादात्मगुरोः स पाद-
द्वयीं दिदृक्षुर्नलिनीमिवाऽली ।
प्रदत्तखेदं तदुदन्तमेतं
विचिन्त्य चित्तेऽचलदार्यवर्यः ॥ ६ ॥

पदे पदेऽतुच्छमहोत्सवौघां
विभूषयन्नंह्रिरजोभिरुर्वीम् ।
जनं समग्रं सुखयन् मनोज्ञा-
गमस्तडित्वानिव गोविलासैः ॥ ७ ॥

भयं सृजन् वादिनिशाचराणां
स्वतेजसा पङ्कजिनीशितेव ।
पुरे पुरे श्रावकसंघमुच्चैः-
श्रियं नयन् सिन्धुमिवौषधीशः ॥ ८ ॥

स्फुरद्दशो दीप इवाऽङ्गभाजां
हरंश्च मिथ्यात्वतमःसमूहम् ।
पथि स्मयं घ्नन् कुमतिव्रजानां
महामृगाणामिव सिंहशावः ॥ ९ ॥

मलं दलन्नध्वनि दैवताध्व-
धुनीव सर्वज्ञमनोज्ञवृत्तिः ।
समूलमुत्तालमहार्यवीर्यः
प्रकम्पयन् पापतरून् करीव ॥ १० ॥

मुदां निदानं गुरु **गूर्जरत्रा**-
वधूललाटे तिलकायमानम् ।
श्रियां निधानं सुकृतप्रधानं
प्रभुः क्रमात् **पत्तन**माससाद ॥ ११ ॥

महोत्सवोत्साहसमुत्सुकस्या-
ऽनघस्य संघस्य सदादरस्य ।
वरं पुरं तद् गुरुणाऽऽग्रहेण
कियद्दिनान् पट्टधरोऽधितष्ठौ ॥ १२ ॥

तपाधिराजः प्रभु**हीरसूरिः**
पुरे वसन्नु**न्नतना**म्नि तत्र ।

सुपर्वशाखीव मनोऽभिलाषान्
प्रपूरयामास महाजनस्य ॥ १३ ॥

रुजं दुरन्तामधिगम्य सम्यक्
तथाऽऽयुषोऽत्यन्तसुखस्य चान्तम्।
प्रभुश्चकार प्रमनाश्चरित्र-
गृहध्वजाराधनयाऽन्त्यकृत्यम् ॥ १४ ॥

व्यधाद् विभुः स्वं तपसाऽग्निनेव
सुवर्णमात्मानमतीद्धभासम् ।
तदा बभौ चाऽस्तमलोऽस्य कायः
खरत्विषो बिम्ब इवाऽभ्रमुक्तः ॥ १५ ॥

स सर्वथा क्षीणबलं विचिन्त्य
सितेतरे पक्ष इवोडुपं स्वम् ।
मुनीन् समग्रान् गृहमेधिनश्च
प्रभुः प्रभूताद्भुतधीरिमाऽवक् ॥ १६ ॥

अवश्यभाविन्यवसानकेऽस्मिन्
न मेऽस्ति चिन्ता विहितात्मवृत्तेः।
इदं भयं भेत्तुमलं निरन्त-
बला अपि स्युर्न हि तीर्थनाथाः ॥ १७ ॥

अमुत्र सर्वत्र हितोद्यमानां
न कापि चिन्ता भवतामिहास्ति ।
प्रभुः स वः पट्टधरो मदीयो
महानुडूनामिव कौमुदीशः ॥ १८ ॥

भवद्भिराचार्य उदारधीर-
स्ततोऽभिगम्योऽहमिवाभिरूपैः ।
अनुप्लवानामयमस्ति पन्था-
निषेव्यते यत् तनयः पितेव ॥ १९ ॥

गुरोर्वचस्तच्छिरसा समस्तैः
प्रतिश्रुतं माल्यमिवेद्धवर्णम् ।
सुखं प्रसूते दिविषद्गवीव
प्रपालिताऽऽज्ञा प्रसभं प्रभूणाम् ॥ २० ॥

तदाऽभिधायेति हितान्यमीषां
वचांसि भूयांसि विभुः समेषाम् ।
उवाच संसारविकारकार-
स्करद्विपः सोऽनशनं विधित्सुः ॥ २१ ॥

अधीतनानाविधवाङ्मयानां
महामुनीनामिदमस्ति वर्त्म ।
विधीयतेऽभ्यागत आयुषोऽन्ते
यदर्तिहन्ताऽनशनाधिकारः ॥ २२ ॥

इह क्षणे सांप्रतमन्धसां मे
निरोध उच्चैः सुकृताभिबोधः ।
इतीरितं मे शृणुताऽऽश्रवा भो
निराश्रवाः ! संयमिशर्वरीशाः ! ॥ २३ ॥

शिवात्मकृत्याय कृतोद्यमस्य
भवन्तु विघ्ना मम मा भवन्तः ।
जगत्प्रमोदार्थमुपागतस्य
घनाघनस्येव मरुत्प्रवाहाः ॥ २४ ॥

वचोभिरित्यद्भुतभेषजाभैः
शनैः शनैः शुद्धरसायनज्ञः ।
गुरुर्भिषक् सौवपरिच्छदस्य
कदाग्रहव्याधिमपाचकार ॥ २५ ॥

गुरुं निरीक्ष्याऽनशनक्रियायां
सुमेरुचूलामिव धैर्यपात्रम् ।

विनेयवृन्देषु शुगात्मशङ्कु—
निविद्धमूर्तिष्विव मूर्च्छितेषु ॥ २६ ॥

इति प्रभोर्व्याहरणाप्रमाण—
समीरणश्रेणिभवानुभावात् ।
विनेयपूगप्रमदप्रदीपे
रुचां चयं मुञ्चति सुप्रकाशम् ॥ २७ ॥

इति प्रभोर्वाग्रजनीकरस्यो-
दयात् समुल्लासितपुण्यवार्धेः ।
विनेयवर्गेक्षणचन्द्रकान्त—
मणीषु मुञ्चत्सु जलानि बाढम् ॥ २८ ॥

इति प्रभूक्त्या शरदा समन्ताद्
विनिर्मितानल्पकपङ्कहान्या ।
कृते समस्तान्तिषदां विषाद—
तुषाररश्मावतिदीप्रदीप्तौ ॥ २९ ॥

तदेति सूरेर्वचनप्रपञ्च—
पयोमुचां संचयतः सपङ्काम् ।
विनेयचेतःसरसीं विहाय
गतेषु शर्मात्मसितच्छदेषु ॥ ३० ॥

भवार्त्यकूपारपयस्तितीर्षुः
प्रभुः प्रचेताः परमेष्ठिसाक्ष्यम् ।
चरित्रचैत्योपरि हेमकुम्भं
स्वयं निरीहोऽनशनं चकार ॥ ३१ ॥

अकारि यः श्राद्धजनैर्महीयां—
स्तदोत्सवः प्रीणितविश्वविश्वः ।
तमीक्षितुं वर्णयितुं च शक्तौ
पुलोमजाराजभुजङ्गराजौ ॥ ३२ ॥

स्मरन् नमस्कारमपारपापा—
पहं महानन्दसुखावहं च ।
मनोवचःकायकृतानि निन्दन्
पुनः पुनः पुण्यमना अघानि ॥ ३३ ॥

महोदयस्त्रीरतिदानदूतीं
भजन् समस्तेष्वसुमत्सु मैत्रीम् ।
जराजनुर्मृत्युभियां निदानं
त्यजन् शरीरेऽपि ममत्वमुच्चैः ॥ ३४ ॥

भुजाशुगर्तुद्विजराण्मितेऽब्दे
श्रियां पदे भाद्रपदे च मासे ।
तिथौ तथा शङ्करसंमितायां
सितद्युतेर्दीधितिबन्धुरायाम् ॥ ३५ ॥

विहाय नित्यं मलिनामिहत्यां
तनुं मनोज्ञां च सुपर्वयोनेः ।
गुरुर्गुणी ग्रामधुनीं विमुच्य
नभोनदीं हंस इव प्रपेदे ॥ ३६ ॥

सुगन्धसारैर्घनसारमिश्रैः
सकुङ्कुमैर्बन्धुरगन्धधूल्या ।
युतैश्च धूपैरभिरूपरूपै—
श्चतुःसमैर्मञ्जुलमौक्तिकैश्च ॥ ३७ ॥

ससौरभैः पेशलपुष्पपुञ्जै—
र्मुहुर्मुहुः काञ्चनरूप्यरूपैः ।
तदा च तादृग् वपुरार्यभर्तुः
सदर्चमानर्च समस्तसंघः ॥ ३८ ॥

अगारिवर्गः शिबिकां विशालां
वरैर्दुकूलै रचयाञ्चकार ।
प्रभोः शरीरस्य कृते सुधर्मा-
ऽनुजामिवोच्चैः सुमनोमनोज्ञाम् ॥ ३९ ॥

अगारिणश्चन्दनचर्चिताङ्गं
यथोचितन्यस्तमहर्षिवेषम् ।
हृदीव जीवन्तमनिन्द्यमूर्तिं
न्यवेशयंस्तच्छिबिकान्तरे तम् ॥ ४० ॥

पदे पदे मूर्च्छदपारबाष्पा
महेभ्यमुख्या गृहमेधिनश्च ।
महोत्सवाडम्बरसुन्दरं ते
सुरा इवैनां शिबिकामथोहुः ॥ ४१ ॥

सगन्धसाराऽगुरुमुख्यदारु-
भराचितायां शुचिमञ्चितायाम् ।
तदाऽथ संस्कारमकार्षुरेते
प्रभोस्तनोः किं तमसो निजस्य ? ॥ ४२ ॥

卐

# हीर स्वाध्याय

## हिंदी विभाग

## ३

१

कविसोमरचित

# श्रीहीरविजयसूरि सवैया

सवे मृगनयनी चली गुरुवंदन छूट मनो गजराज घटा
करी कंकण चूडि षलकती नेउर हार बण्यो सिर टूट लटा
गावती मंगल गीत सुहासणि पूरति मोतीको चोक घटा
कवि **सोम** कहि गुरु **हीर** भट्टारक और करे सब पेट नटा ॥ १॥

किहा मृगनाभि किहां षलषंड किहां कनक किहां पीतरीआ
किहा लूण कपूर किहा माणिक करछत्र किहा शिरछीतरीयां
एसोज परंतर हीरकि आगिलहि कुमति सित ठीकरीयां
कवि **सोम** कहि गुरु **हीर** भट्टारक ओर भट्टारक तीतलीया ॥ २॥

२

कविसोम रचित

# श्रीहीरविजयसूरिकवित

**विजै कुशल प्रभ हंस विमल रुचि सुंदर सागर,**
**कीरत चंद सोभाग धर्म** रंग गुणके सागर
**उदै रतन सोम** कि **आणंद वर्धन** हर्ष वडाइ,
शाखा एह अढारह एक कुल सब गुरुभाई ।
कवि राव कहै चितोडपति वर्ण च्यार जंपा अजंपा,
चोर्यासी गच्छ मांहै सिरै तपै पाट अविचल तपा ॥ १ ॥

अगडदौं अगडदौं नगारोंकी धौंस पडे गुरु पूर्बदेस पधारणकुं,
कुमति जनको टकुरांण पढै भयभीत भयो जग भारणकुं,
मुख गंगतरंग प्रवाह व्रहै अरिहंतको नाम उच्चारणकुं,
कवि **सोम** कहै गुरु **हीर** भरारक एह भयो जग तारणकुं ॥ २॥

पातिसाह **अकब्बर** आप कहैं गुरु **हीरविजैसूरि** आईयें ज्युं,
हम पापकी चाल चलावत हैं तुम धर्मको राह बताईयें ज्युं,
**बिजैदान**कै पाट उद्योत भयो महीमंडल सोभ चढाइयें ज्युं,
तपगछकै नायक **हीरसूरि** दर्शण सेती आणंद पाइयें ज्युं ॥ ३ ॥

सब मृगनेंण (२) चली गुरु वंदणकुं मुख छूट मांनु गजराज घटा,
कर कंकर्ण चूड षलकति नेउर हार बण्यो सर छूट लटा,
गौरी गावती मंगल गीत सुवासणी पूरती मोतीको चोक छटा,
कवि **सोम** कहै गुरु **हीर** भटारक ओर करे सब पेट लटा ॥ ४ ॥

**इति श्रीहीरविजयसूरजीरा कवित्त संपूर्ण**
**॥ श्री सिद्धाचलजीरा भाट वीरचंद लिषावतं ॥**

३

# श्रीहीरविजयसूरि छंद

श्री शारदा तुझ पाये लगुं कर जोडीने वर विद्या मगुं
कर पुस्तक गवर वेणा छज्जें वाहन हंस तुमही किरज्जे ॥ १ ॥

गवरीसुत अरदास सुनीज्जे सेवक जांणी नीवनिध दीज्जे
शुद्धबुद्ध वर वांछित दायक कहुं छंद तपगछपति नायक ॥ २ ॥

## दोहरा

तपगछपत **हीर** विराजत है **श्रीहीरविजेसूरिराय**
च्यारुं खंडों जांणीयै सो वंदत भूपति पाय ॥ १ ॥

**अकबर** साह बुलाइया लिष भेज्या फुरमांन
सो भूपति एसा कोन हे फीरत चिहुदिस आंन ॥ २ ॥

छपति **अकबर** साह हे आन फीरे
सो चारौं खंड जोडाहीं एकही ममावंत हे ॥ ३ ॥

**॥ छंदनी चाल जाणवी ॥**

एकह नंद **हमाउ** अवचल माह तपत जो आगरे
कुलजुग माही महीय जेनी आन तो तितने फीरे
एक तषत **दीलिसहर** आगरा **फतेपुर** वषानीये
पतसाह **अकबर** छत्रकी इम चारौ षंड सो जानीये
उत्तर दच्छन पुरव पछिम सब वसुधा तुम लई
भोपत जे वडे राजा आन बेटी तिन गई
साह चढत दलै भार इतनो सेस कंपे ते सही
दाल इंद्र महिमा मेर डोले सुनत हय गय ते सही
दल कुच होत उडत षेह आलोप भये जो भान ही

केतेक आगे रहे ठाढे गहे करमे लाकरी
केतेक भये दरवान सब दीन करत इनीविध चाकरी
केतेक भये दरवान सब दीन करत इनीविध चाकरी
केतेक मीले गुमान तजकर देत अपनो देस ही
छत्रपति साह **हीमाउ** नंद धन साह **अकबर** कहे

### दोहरा

एक तो **अकबर**साह है सो महिमा सुलतांन
तीन तो पूज बुलाइया सो अब सुनै वषान ॥ १ ॥

### छंद अरील

एक रोज पातसाहजी बेहें जो(गो)षमें
वाजत गाजत माई एक जात है
फुनी हां पातसाहजी यों कह्यो क्या बात है
**थानसींघ** सुन वात कहो क्या सोर है
छत्रपति वलवंड नही कछु जोर हौ
वरस एकके आदके रोजे जीन कीये
फुनी हां पातसाहजी यों कहे सो जन क्युं जीये

### दोहरा

पातसाहजी यों कहे सुनो **थानसींघ** वात
उस माइकौं बुलाइयै सो पुछे हम वृतांत ॥ १ ॥

माइ आन षडी रही पूछै पातसाहजी वात
तुम हमसों साची कहो स तुममें क्या करामात ॥ २ ॥

माइ कहै पातसाह सुनो हम वंदत जीनके पाय
सो गुरु जाने वात ही **श्रीहीरविजेसुरराय** ॥ ३ ॥

पातसाह युं कहे सुनो माइ बोल हमारा
वात कहो तुम साच पीर कहां रहे तुमारा ॥ ४ ॥

माइ कहे पातसाह सुनो वात हमारी
पीर हमारा **हीरविजे** गुजरात तुमारी
पातसाहजी यों कहै पीर क्यों आवे तेरा
के भेजों पालषी के सुषासन मेरा
के भेजों हाथी घोडा जेठा
कहो कौन षुस करे जीन मुनि आवे बेठा
तब **थांनसींघ** उठकर अरदास कर जोडें
पातसाहजी पीर हमारा न चढे घोडे
नांम लेह जगदीसका निपटकर वनेजोसादे
माल षाक करी गनै पाव भी चाले पीयादे
पातसाहजी यों कहे पीर हम देषें तेरा
**साहिबषान**कौ लीषो फुरमांन जो मेरा
लीषो हेतके तुम मांगै सो दीजीयै
पुन्नी हां **श्रीहीरविजै** मुनिराईकौं वेगे भेजीयै
तो फुरमान लीषा उ(व)जीरनें सो कीनी उजबक छापट
पा(वा)जीवेग बुलाइया सो साह **अकबर** आप

## छंद अरील

साह वचन मेवरा जो आये तिनकों बहुतीक दांम दीलाये
साह कहे बे करुं नीहाला **श्रीहीरविजै**को ल्यावो दरहाला
फुरमान साह मेवरा जो दीन्हा करी सलाम सीस पर लीन्हाट
कमरजंग पर सोभत सीसं इनी विध चले मेवरा वीसं

## छंद भुजंगीप्रिया

चले मेवरा वीस बने जो आछे
सीरे पाग वांकी अंग बने जो काछे
परै सीस सोहे कमरबंध जंगा
पाये कफुदना अंग वागा सुरंगा

दीन रात चाले जो दोरेजो आवे

फुन साहके त्रसना जन भावे

दिन चार तो राहके वीच लाये

दिन पांचमे **अमदाबाद** जो आये

बाबाषांनकौं जाय इतना सुनाया

......................................वहंत जात हे

उपरे जो पीलवान आकुसे जो हाथ हे

जरावकी जो पाखरे गयंद तो चले सवार

नांम तो कीते लहुं हाथीया तो केइ हजार

उपर तो विरधमान देषीये भली जो ढाल

हाथीया तो यों चले जानकौं भेजी रसाल

घोडे तो सवार ल्याये चाले तो चतुर चाल

लाल चाल चावकी कीसोर चोर हासले काबरे कबूतरे

हंसरा सुपेत रंग पीठ जाकी चोतरे

जराव के बने ज जीन मोतीकेरे झालरे

पंचरंग सोवने हेमकी बनी लगामे फुंदना तो रेसमी

लाल जरद सवज स्याम गीरजगाह बंधीये

उपरे जो असवार देषीये भले भले

सुरपति यों कहे देवता जो ए चले

काबील बने जो उंट उपरे चडे नीसांन

षेह तो उडी रहे अलोप भये जो भांनं

कामनी कीये सींगार हीर चीर पहनीये

मुष तो वीराजै पांन सीस बंध दीजीये

नारी तो सब मीली मंगल जो गावये

सोने रूपे केरे कुल मोतीयों वधावये

फीरंगसु फसकलात पावतले बिछावये

**थानसींघ** दोर कें पतसाहकौ सुनावये

## दोहरा

पातसाहजी यों कहे राजा भेजो च्यार
**श्रीहीरवीजै**कों बुलायकर देषें हम दीदार ॥ १ ॥

**श्रीहीरविजैसुर** आइया तीहां छत्रपति सुरग्यान
आवत देष षडे भये दीनो बहुत जो मांन ॥ २ ॥

तव पातसाहजी योकर पुछीया जुबाप कीयो मुनिराय.
**अकबर**साह षुसी भये तव वंदे गुरुके पाय ॥ ३ ॥

## छंद अरील

साह कहे मुनि हय गय लीजे पूज कहे हय गय ले क्या कीजे
साह कहेकछु लीजे दांम पूज कहै नही हम तीन कांम
साह कहे तुम कछु फरमावो भि इंहां काहेकौं आवो
पूजै जु माग्या वात विचारी माग्या देहु तो कोइ जीव न मारें
तव साहजी जीवदयाका क्या हे धरम् जु
कहो पूजै हमै चोही मरम जु ॥

## दोहरा

हय गय कंचन माल अनंत जो कोइ देह अनेक
तामे धरम अधक हे जा जींव राषे एक ॥ १ ॥

साह कहे तुमही कहो सो क्या जानें साच
जे कछु पुस्तगमें लीष्यो सोइ देषावो वाच ॥ २ ॥

पूज कहे पुस्तक सुनो शांति नेमजिन पास
त्याके फल देषै पछै साह **अकबर** रास ॥ ३ ॥

पूज वचन साह सुनतही लिष भेजे फुरमांन
जीव न मारे मही माहै साह **अकबर** आंन ॥ ४ ॥

## छंद

पूज कह्यो सो साहन कीन्हो.................. ( **अपूर्ण** )

## ४

कविमोहन रचित

# श्रीहीरसूरिनो छंद

**विजैहीरसूरिंद** तपगछ इंदं नमै नरेंदं जयकारं,
गुरु तपगछराजै बडै दिवाजे सोभा छाजै सोहंदं,
गुरु उत्तम राजै कहरा गाजै वांणी घन जिम गयंदं,
गुरु मुख उचारे च्यार प्रकारे धर्म भला जै अधिकारं ॥ १ ॥

जगमां ते सार दान विचारं मूल धर्म ए सुषकारं,
व्रत चोथो भारी सुणो नरनारी एह धरम सहू दिलधारं,
वली तप अधिकारं साधु विचारं कहतां नवै कोइ पारं,
**विजैहीरसूरिंदं** तपगछ इंदं नमै नरेंदं जयकारं ॥ २ ॥

पुन. भाव चतुर्थं वंछित अर्थं सिद्ध करै सहु संसारं,
च्यारु एं धारं ए अधिकारं **विजेहीरसूरीश्वर** उचारं,
गुरु विद्याधारी गुरु अधिकारी वंदे तेहने नर-नारं,
**विजैहीरसूरिंदं** तपगछ इंदं नमै नरेंदं जयकारं ॥ ३ ॥

सहू राज-पतिसाही नमै भलाई श्रीगुरु मेरे हे ए सारं,
गुरुदेव आधारं गुरुद अधिकारं सेवग कारज सहू सारं,
घर संताप पावै बहु थावै ल्यावै अपारं विजै ॥ ४ ॥

गुरु परचा पूरै संकट चूरै दुष्ट नमाव ए गुरु हीरं,
गुरु गुण है सारं ए दिलधारं भवि तुम ए मुख उच्चारं,
जस होय अपारं वली दरबारं जे गुरु पूजै इकतारं विजै ॥ ५ ॥

जिनमतमें सारं गुरु आधारं धर्म चलावण अधिकारं,
गुरु तपगछ धारी सोभाकारी गुरु उपगारी हेतारं,
वंछित सहु पूरै दालिद्र चूरै गुरु गुण हे बहु विस्तारं विजै ॥ ६ ॥

भविजन पडिबोहै देसना सोहै श्रीजिनवांणी आधारं,
जिनमत थिर थापै कुमति जड कापै सुमति देयण है गुरप्यारं,
बली गुरु दरबारं जस्स वधारं पुरजनमे हे सुखकारं विजै ॥ ७ ॥

श्रीगुरु दयाधारी गुण हे भारी कहेतां नावै है पारं,
गुरु गुण अनंता केम कहंता मुज बुध नही छे विस्तारं,
जो ए गुण गावै भविजन भावै गुरु गुण ए इकतारं विजै ॥ ८ ॥

**कलश कवित्त**

श्रीगुरु **हीरसूरेंद** **विजयदानसूरि** पाट विराजै,
श्रीगुरु **हीरसूरेंद** इंद्र तपगछपति गाजै,
श्रीगुरु **हीरसूरेंद** नमे नरेंद्र नरनारी,
श्रीगुरु **हीरसूरेंद** सहु मुनिजन हितकारी,
नित नमो एह गुरुदेवकुं ध्यांन एह दिलमें धरो,
ज्युं वरो सुख **मोहन** अधिक लच्छी लीला विसतरो ॥ ९ ॥

५

श्रीज्ञानविमलसूरि रचित

# श्रीहीरसूरि होरी

हां रे लाला रंग भर होरी खेले तनमें
श्रीगुरुदेवके चरण कमलमें ॥ रंग ॥ १ ॥

रंग लाग्यो गुरु ग्यांन बनेरो रंग लाग्यो हे तनमें ॥ श्री रं० ॥ २ ॥

श्रीजिनवांणी अबरी लें करकै और झोरी भरी घटमें ॥ श्री रं० ॥ ३ ॥

**ग्यांनविमल**विलासी घटमें पावत भवजल तटमें । हां० पा० श्री० ॥ ४ ॥

इति हीरविजैसूरीकी होरी

६

# श्रीहीरविजयसूरि सज्जाय

तुम्ह गुण लक्षण गुणवंती कन्या सइं सुणी रे ।
बहु गुणवंती कन्या मइं सुणी रे ।
**श्री हीरविजइ**नी अभया कुमरी मइं सुणी रे ।
गुरु द्यउ कन्यादाना वरनइ रे वरनइ रे ।
केउ वरीस हुइ जीविउ रे ॥ १ ॥

अणु परि आठ सहेली तेवड तेवडी रे ।
समति गुप्तिस्युं नारि रमती रे रमती रे ।
दीसइ जैन तणे घरे रे ॥ २ ॥

भवन अमार उढइ लाडी चूनडी रे ।
जतनाभरणसु चीर पहिरि रे पहिरि रे ।
प्राण त्राण कस कांचूउ रे ॥ ३ ॥

हंसा सुउकि तणी हत्यारी छोकरी रे ।
वध वरनइं वष नारि जांणी रे जांणी रे ।
जिण मुनिवर दोहीतरी रे ॥ ४ ॥

सुकइं दूक्षा देखु दीसइं पांगुला रे ।
टूंटा बहिरा अंध गरभि रे गरभि रे ।
गलीआ शस्त्र हण्या मरइं रे ॥ ५ ॥

इणि वर प्रिइं बंधावी माछिण दासडी रे ।
बांध्या धीवर दास पापी रे पापी रे ।
रूण सघला बंधावियां रे ॥ ६ ॥

दया कन्यानुं दयालु जो वर सावगूरे ।
वाधइ- जस सोभाग रूपइ रे रूपइ रे ।
शांतिनाथ परिसउ हूउ रे ।
ए वहू वरनइं कुसल कोउ दिइ छोडारां रे ॥ ७॥

वाधइ कुलि धन वंस वहूथी रे वहूथी रे ।
न हूइ वर रोग वियोगडा रे ।
ए कन्या वीवाह मंश न वापइरइ रे ।
गुरुवरनंइ हुइ रात-जातइ रे ।
गोत्रईसुं उंचउ वडइ रे ।
जिण ए कन्या परणी तस घर इंद्रनी रे ।
रिधि रमइं सुर धेन दूझइ रे दूझइ रे
सकल धरम माता दया रे ॥ ८॥

॥ छ॥

**॥ इति श्री हीरविजयसूरि सिज्झाय समाप्ता**

**॥ श्री ॥ शुभंभवः ॥ छ॥**

७

श्रीहंसमुनिरचित

# श्रीहीरविजयसूरिभास

सफल दिन आज हमारडउ दिखु सुगुर दीदारू,
साध धोरिधरु गच्छपती मलु विश्वनु. तारू.. १

जो रे सही ए मुनिराजीउ, मुख सरदकु चंदो,
श्री **हीरविजयसूरी**सरू, शमता लतां कुंड शम शुभगउ कंदो,
महण वलिउ कंदो जाउ रे.. आंचली.

जिम राणी रागिणी अेन्हे संयम राणी रुपमि रमि तिह स्फुरतंगि,
सीअलनि सुभग आभ्रण भल्या सोहि **हीरजी** अंगि.. २ जो०

श्री उवझाइ मंत्रीसिरू, सकल बुध्धि निधांन,
पंडित खाननिउंबरा म्हरो पूजि सूलतांन.... ३ जो०

महाव्रत घोड्या पाखर्यां, जसुमति सो मति यांचि,
उपशम रथ सिना अति भली, मिल्या सूरि नर राचि.. ४ जो०

कीरति छत्र सिरिताजउ, मुगट आण जिणंदो,
करुण रे हार उर लटकतो, दोए सूमहूम चाम रे,
टल्कति आवि श्री असुणि दो.... ५ जो०

वायत्रनाद सझाईउ सदा होइ कलोल,
वदन वासंति भारती साची वाणि तंबुल............... ६ जो०

मियण सरुपि रंजीउ खिमाय गिहण कोह,
शमता इ मान माया हणे संतोष लोभ मोह.... ७ जो०

कामदल हारि मनावीउ, एहनी ढुलति चटति
धर्मखजानइ वाधीउ एणि रागनिदोस मद टालीउ नमे **हंस** ए सूगति.. ८ जो०

इति श्रीहीरविजयसूरि भास समाप्तः ॥ छ ॥ शुभं भव



નડીયાદ



સ્ફુલિંગ પાર્શ્વનાથ જિનાલય - વિજાપુર



શ્રી શામળાજીપાર્શ્વનાથ દેરાસર
ડભોઇ



ઝવેરીવાડ સંભવનાથની ખડકી - અમદાવાદ



શ્રીહીરવિજયસૂરિ કાષ્ઠમૂર્તિ દોશીવાડાની પોળ - અમદાવાદ



શ્રીઅજિતનાથજી દેહરાસર - સિરોહી



શ્રીઆદેશ્વરજી દેરાસર - સિરોહી



આબુદેલવાડા



મહુવા



જાલોર

८

कविहेमविजयरचित

# श्रीहीरविजयसूरीश्वर स्तुति

जबलगिं जलनकी जोति जगि जगमगइ,
जबलगिं तपइ तिहुणतिलउ दिनमनी;
जबलगिं जगतमिं पवन फुरकती फिरती,
जबलगिं नीरनिधि नीरकी झुनी सुनी.
जबलगिं मेरुमंडित महीमोहए,
जबलगिं ओपए अचल अवनी घनी;
तबलगिं **हेम** कहि हरखसुं **हीरजी** जीव तुं जीव तुं
जीव तुं जीव तपगछधनी. १

जबलगिं ईस जगदीसके अंगसुं रही,
आलिंग करि तुहिनगिरिनंदनी;
जबलगिं नंदके नंद आनंदसु करग्रही,
नेह. करि नीरनिधिनंदनी;
जबलगिं इंदुसुं अतिहिं आदर करइ,
राग धरि राति दिन दक्षकी नंदनी तबलगिं० २

जबलगिं सबल सन्नेहसुं संमुही,
आवए अंबुनिधिके बहुत बाहिनी;
जबलगिं आपणे अवल आदरि अमर,
राजसुं रंग भरि रमति जयवाहिनी;
जबलगिं धरति धुयधाम धनधोरणी,
जबलगिं गहनगंगा गगनगाहिनी. तबलगिं० ३

जबलगिं इंद्र आवसि अहनिस करइ,
सचिवकी सीख, संभाल सुरगुरुगुनी;
जबलगिं गगनमंडलमहल मोहते,
सोभते सकल संवाद सातुं मुनी;
जबलगिं भूरिभूपाल भूषण भले,
जोतिजुत जनति मनि रोहणाचल खनी. तबलगिं०

गगनमंडलि रहइ अजब जब लगिं,
सबल सकल सुखकारिणी जोति रविचंदकी;
धरति धरणीतलं गहनगिरिसंकुलं
जबलगिं पीठपर चंडभुजगिंदकी;
जबलगिं चतुर चिहु षंड चति चमकंती,
राजकी थित्ति सुरलोकि सुरइंदकी;
तबलगिं **हेम** कहि **हीरजी** पट्टि प्रभु,
प्रगटी पदवी **विजयसेनसूरिंद**की.

सवालक्खसोवीर सिंधु सरसा सोरठ सण
मरु मालव मेवाड मोट महरट्ट मगहि भण,
कामरूप कालिंग कीर कुंतल कण कुंकण
गूजर गउड गिरिंदगंध गंगातटगंजण;
इणि देशि दसोदिसिं जयकसी
**हेमविजय** कवियण कही,
**श्रीविजयसेनसूरिंद**की कीरति कमला गहगही.

卐

९

श्रीफतेन्द्रविजयरचित

# अथ दादा हीरविजयसूरि स्तवन

॥ राग-थायै ॥

चालो भवी वंदन जईये, **हीरविजयसूरी** राय, चा० ही०
पूजत परमानन्दा, मिले सज्जन सहु भाय. चा० ॥ १ ॥

दादोजी परचा पूरें, तपगछ संघ सवाय, ॥ चा० ॥
**अकबर** साह प्रतिबोधीयों, दिल्लीनों पतिसाय. चा० ॥ २ ॥

मारीरोग निवारियो, जीव हिंसा मिटाय, ॥ चा० ॥
जमुना के जल उपरें, गुरुवाट बनाय. चा० ॥ ३ ॥

जिनमत थिरता थापी, जैन धरम दीपाय ॥ चा. ॥
दादोजी सेवकां सांनिध्यकारी **फतेन्द्रविजय** गुण गाय.
चा० ॥ ४ ॥

卐

१०

श्रीदयारुचिरचित

# दादाजी स्तवन

( म्हैं तो न्यारा रेहम्यांजी देराणी-जेठाणी आयै मेला रहम्यांजी । ए देशी ।)

म्हारा गुरुदेवजी हो लाल, गुरुदेव विघन निवार । म्हा० ।
गुरुदेवनायक माहरे, ने गुरुदेव है शिरदार,
श्रीगुरुदेवके चरण नम्यांथी, होवे जयजयकार । म्हा०. ॥ १ ॥

तपगच्छनायक है गुणलायक, श्रीविजय **हीरसूरीन्द** ।
श्री गुरु तोरा पाय नमन्तां, पांमे दोलत वृन्द । म्हा०. ॥ २ ॥

साह **अकब्बर** वादकर्यो तुम जीते गुर जस पाय ।
जीवदया गुरु तुम वरतावी, तपगच्छ सुजस चढाय । म्हा० ॥ ३ ॥

जमुनां जलपर बाट चलाई, चल आयै गुरु पार ।
अधर धारा पर चालण लागे, गुरु करामात है सार । म्हा० ॥ ४ ॥

श्रीगुरु **दानसूरीश्वर** पाटै, **हीरविजय**में तेज ।
कुमति तिमिर सहु दूर निवारी, जिनशासन करे हेज । म्हा० ॥ ५ ॥

वाद चौरासी श्रीगुरु जीत्या, जैनशासन शोभ चढाय ।
**दिल्ली** मांहे दया वरतावी, जैन धरम दीपाय । म्हा० ॥ ६ ॥

गुरु **हीरसूरी** सुपसायै, पामै अरथ भण्डार ।
**हीरगुरु** के जे गुण गावै, **दयारुची** जयकार । म्हा० ॥ ७ ॥

卐

## ११

श्रीदयारुचिरचित

# दादाजी का स्तवन

श्रीगुरु मेरे **हीरसूरीन्द्र** जयो गुरु, साहिब मेरो **हीरसूरीन्द** जयो ॥ १ ॥

श्री जिनशासन उद्योत कारी, श्रीगुरु **हीर** भयो ॥ २ ॥

**कुंअर** पिता **नाथीदेवी** माता **खीमसरा** गोत्र लयो ॥ ३ ॥ श्री० ही०

संवत पनरे छयाणुवें वरसे, महोच्छव दीक्षाकी कियो ॥ ४ ॥ श्री० ही०

सोलसें सातके वर्षे पंडित पदही पायो ॥ ५ ॥ श्री० ही०

सोलसें संवत् आठा कें वरसें, वाचक पद ही लयो ॥ ६ ॥ श्री० ही०

सोलसें संवत् दशा के वरसे, सूरीश्वर पदवी थयो ॥ ७ ॥ श्री० ही०

सोलसें **आगरे** नगरे, आय चौमासो कियो॥ ८ ॥ श्री० ही०

साहु **अकबरकुं** प्रतिबोध्यो, अमारपह्ड ठयों ॥ ९ ॥ श्री० ही०

लूंपाकमतछांडी **मेघऋषि**जी, पांचसें सुशिष्यभयो ॥ १० ॥ श्री० ही०

छमासी मरीरोग निवारी, गुरु मेरे दान दियो ॥ ११ ॥ श्री० ही०

नगर जीजीया गुरु छोडाया, गउ उपकार कियो ॥ १२ ॥ श्री० ही०

चिडिया मर तरखी गुरुदेव, श्रीगुरु जस्स भयो ॥ १३ ॥ श्री० ही०

बडा वाद चौरासी जीत्या, जिनमत हरख थयो ॥ १४ ॥ श्री० ही०

देस देसमें गुरु जस पायो, हर्षानन्द लयो ॥ १५ ॥ श्री० ही०

तपगच्छपति **श्रीहीरसूरीश्वर**, जयधारी जसलह्यो ॥ १६ ॥ श्री० ही०

विजय **दानसूरीश्वर** पाटे, तपगच्छपतितिलकभयो ॥ १७ ॥ श्री० ही०

**श्रीरूपरुचि** गुरु चरण प्रसाद, **दयारुचि** सुख भयो ॥ १८ ॥ श्री० ही०

卐

१२

श्रीजसविजयरचित

# दादाजी श्रीहीरविजयजी स्तवन

सोभागी श्रीगुरु **हीरविजय सूरीन्द्र,** मन मोहन श्रीगुरु हीर० ।
मैं सेवक सांनिध्यकारी, श्रीगुरु पूरै मनोरथ वृन्द सो० ॥ १ ॥

दोलत दायक श्रीगुरु मेरो, दादा हुं चरणनो दास ।
श्रीगुरुनां बिरुद छे भारी, धरिस ही मन आस सो० ॥ २ ॥

तो सेव्यां संकट टलेंजी, मिलै मुजने मोहन वेल ।
दादा ! तुम चरणां सुपसायै, पामै हरखनी रेल सो० ॥ ३ ॥

तपगच्छ अंबर दीनकर जैसो **दादाहीरसूरीन्द्र** भाह ।
**अकबर** बादकारीन जीतै, असुर सहु जिन्द सो० ॥ ४ ॥

परगट दादो देवताजी, परचा पूरै सूरीन्द ।
**वाचक जस** इम बीनवैजी, संघसकल आणन्द सो० ॥ ५ ॥

卐

१३

श्रीजसविजयरचित

# दादाजी श्रीहीरविजयजी स्तवन

(चाल - रेखता)

श्रीगुरु **हीरदेवके** दर्शन, दिल मुज होत हे परशन् ।
होत आनन्दधन मेरे, सम्पत्ति मिलत बहुतेरे श्री० ॥ १ ॥

गुरु ! तुम ध्यान दिल्ल धारूं, दुरबुद्धमती दूरवारूं ।
श्रीगुरु चरणकी सेवा, सेवक कुं दीजिये मेवा श्री० ॥ २ ॥

दादा ! दरसण मोहि दीजै, दादा तुम सोहिला कीजै ।
जे कोई समरण डो पावे, तोअ चिन्ती लक्ष्मी घर आवै श्री० ॥ ३ ॥

दादा ! तुम समरण करती, बाट घाटमें सुखै बहन्ता ।
भीत उपद्रव सहू जावै, श्रीगुरु ध्यान दिल ध्यांवै श्री० ॥ ४ ॥

दादा ! हम अरज दिल धारो, सेवकके कार्य सहु सारो ।
श्रीवीजै**हीरसूरी** देवा ! पावे **सुजश** तुम गुरुसेवा श्री० ॥ ५ ॥

卐

१४

श्रीजसविजयरचित

# दादा हीरविजयसूरि स्तवन

आज बधाई मेरे रङ्ग बधाई, गुरुचरणां सुपसायै रे, आ० ।
मौतिडे मेह वुठारे ॥आ० ॥

मङ्गल आज मेरे घरफलियां, सुखसंपति मेरे घर आईरे ॥ आ० ॥ १ ॥

वरषानंद भयो दिल मैरे, शुध्द समकितपाल पाई रे ॥ आ० ॥ २ ॥

श्री गुरुचरण कमल दरशणतें, सुमति सहि दिल आई रे ॥ आ० ॥ ३ ॥

दादा **श्रीबिजै हीरसूरीश्वर,** दिशोदिशो **सुजस** गवाइ रे ॥ आ० ॥ ४ ॥

१५

# जगद्गुरु श्रीहीरविजयसूरीश्वरजी का स्तवन

**राग ( टेर-घडी घन आज की सब को, मुबारक हो २ )**

सदा जय हो सदा जय हो, जगत्गुरुदेव की जय हो।
**कुराशा नाथी** के नन्दन, महावीर मार्ग के मण्डन।
विजय **श्री हीर** की जयहो ॥ जगत० ॥१॥

नमें **प्रताप** और **अकबर**, **अजमखान** देवडा जुक्कर।
हरे दिल की जो संशय हो॥ जगत० ॥२॥

गुरु उपदेस को सुनकर लिये फरमान में **अकबर**।
महिना छै, की अभय हो॥ जगत० ॥३॥

गुरु के गुण को गावे, धर्म भण्डार सुख पावे।
मति इज्जत व विजय हो॥ जगत० ॥४॥

ऐरे गुरुदेव के क्रम में,मुकाउ शिर हरदम मैं।
बनूं **रणजीत** निर्भय हो॥ जगत० ॥५॥

卐

१६

श्रीफतेन्द्रविजयरचित

# हीरविजय पद

॥ चाल जिंदवारी ॥

( श्रीगुरुध्यान धरो सदा, शुभ मन सुखकार ए टेक ॥)

श्रीगुरुमाने जै दिलधरै, पामै सुख अपार ।
श्रीगुरुध्यान जै भावतां गुरु आतम आर ॥ श्री० ॥ १ ॥

गुरुदरशण सुख उपजै, होवे जय जयकार ।
समकित पामे प्राणीयां, पूजो सह नरनार ॥ श्री० ॥ २ ॥

निरमल पहेरी धोतियां, घसी केसर घनसार ।
श्रीगुरुदेवकुं पूजीयैं, गुरु जग आधार ॥ श्री० ॥ ३ ॥

तपगच्छनायक राजीयो, दादो सेवक आधार ।
दादो दुनियां मे देवता, जिनशासन जयकार ॥ श्री० ॥ ४ ॥

तपगच्छसंघ सांनिध्यकरो, करो विघन निवार ।
दिन दिन जस चढती कला, बधै पुत्रपरिवार ॥ श्री० ॥ ५ ॥

**श्रीहीरविजय** सूरिसाहिबो, गुरु गुणनो भंडार ।
चरणकमलमें भेटीवा, **फतेन्द्रविजयके** आधार ॥ श्री० ॥ ६ ॥

卐

१७

श्रीज्ञानविमलरचित

# दादाजी पद

॥ राग विलास ॥

देख हो भवि आज, गुरु चरण देख ।
त्रिकरण शुद्धभाव करके, पूजो श्री गुरुराज ।
अज्ञानतिमिर दूर विणसैं, प्रगटैं ज्ञान आवाज । श्री० दे० ॥ १ ॥

श्री गुरुदेवको ध्यान धरत, होत मंगल काज ।
आज मुझ घर हर्ष वल्यो, मिल्यो सुखसमाज । श्री० दे० ॥ २ ॥

अष्ट भय सहु दूर बिणसैं, सरै सहु मन काज ।
ध्यान धरत सुख उपजत, श्रीगुरुनें आवाज । श्री० दे० ॥ ३ ॥

श्रीगुरु **हीरविजयदेवसूरीश्वर**, तपगच्छपति महाराज ।
संवत् १६४४ वर्षे फागुन सुदि २ दिने उसवालज्ञातीय पाल्हाउतगोत्रीय साह पांचा भार्या नगराजी सुत साह मांगा भार्या सोहागदे सुत कुबेर भा० सामी श्रीअनन्तनाथबिंबं तपागच्छाधिराज **श्रीहीरविजयसूरिभिः** प्रतिष्ठितं ।

**सांगानोर**

संवत् १६४४ वर्षे फागुण सुदि २ महिमवास्तव्य उसवालज्ञातीय छाजहड़गोत्रे विसलदास सा० अमीपाल भा० अमृतपदे सुत सामीदास सुत वीरदास हरदास । कारापितं श्रीअनन्तनाथबिंबं प्रतिष्ठितं तपागच्छे **श्रीहीरविजयसूरिभिः** ॥

## जयपुर

॥ संवत् १६४४ वर्षे श्रा० रंगादे कारितं श्रीसुमतिनाथबिंबं प्रतिष्ठितं **श्रीहीरविजयसूरि**पट्टालंकार-**श्रीविजयसेनसूरि**सिंहैः स्तंभतीर्थ नगरे ।

## नागोर

संवत् १६४७ वैशाख सुदि ७ सा० नानजी का० मुनिसुव्रतबिं० प्र० **श्रीहीरविजयसूरिभिः** ॥

## बेंतेड

॥ सं० १६५१ वर्षे पोष सु० १० शनौ श्रीविमलनाथबिंबं को० केसव पु० बोजा कजा राउल कुलधर का० प्र० तपागच्छे **श्रीहीरविजयसूरिभिः** ॥

## मेड़तारोड

सं० १६५३ वै० शु० ४ बुधे श्रीशीतलनाथ बिं० सा० भेऊ हासा सा० पद्मा.........प्र० तपागच्छे **श्रीविजयसेनसूरिभिः** पं० विनयसुन्दरगणिः प्रणमति।

पं० विद्यारत्नगणिभि[:] सह यात्रा कृता ॥

संवत(त्) १६२१ वर्षे पोस(पौष)शुंदि १३ शुक्रे श्रीतपागच्छ(च्छे) श्रीवीज(विजय)दानसूरि भटा(ट्टा)रक श्रीहीरविज(विजय)सूरि श्रीआंबइनगरे श्रीमालीलाडूआनीआ(ज्ञा)ती[य] श्रे । दपो(देपा)ल भाडा(र्या) बाई तेजू स(सु)त श्रे । सीहा.. .... ....(भार्या ?) रांपति स(सु)त संघवी हांमा भू(सु)त हेमा श्रीपति स(सु)त नाकर व्रधमांत(वर्धमान) सामल काहानजी वीरजी हीरजी सूरजी देमत मनरंगो अदी(आदि)नाथ संघ गया २ आमलेसर भरूअच जंबूसर करवाग तंथा गोत्र सांबा सरवगामसहतं पू(पु)त्री संघाई चंडअली मंगास जात्र सफल अ..... ॥

વિદ્યારત્ન ગણિની સાથે યાત્રા કરી.

સં. ૧૬૨૧ ના વર્ષમાં પોષ શુદિ ૧૩ને શુક્રવારે શ્રીતપાગચ્છીય શ્રીવિજયદાનસૂરીશ્વરજીના શિષ્ય ભટ્ટારક **શ્રીહીરવિજયસૂરિજી** (ના ઉપદેશથી); શ્રીઆંબઈનગરના રહેવાસી લાડવાશ્રીમાળીજ્ઞાતિના અને સાંબાગોત્રવાળા શેઠ દેપાલની ભાર્યા બાઈ તેજૂના પુત્ર શેઠ સિંહાની ભાર્યા રાંમતિના પુત્ર સંઘવી હાંમા, તેના પુત્રો હેમા અને શ્રીપતિ, તેના પુત્રો નાકર, વર્ધમાન, શામલ,

કહાનજી, વીરજી, હીરજી, સૂરજી, દેમત, મનરંગો તથા પુત્રીઓ સંઘાઇ અને ચંડબલી વગેરે તથા આમ્લેસર (કદાચ અંકલેશ્વર અથવા આમલસાડ હોય), ભરૂચ, જંબૂસર, કરવાગ (કદાચ કાવી હોય) અને સર્વ ગામના લોકો સહિત શ્રીઆબુ ઉપર શ્રી આદિનાથ ભ.ની યાત્રા કરવા સંઘ ગયો. તેઓની યાત્રા સફળ થાઓ. (૨૨૫)

### जेसलमेर

संवत् १६२६ फागुण वदि ८ सोमे उसवंशे घीयागोत्रे सा० दोना भार्या...... सा० पेथा भार्या मनरंगदे सुत नरबद श्रीतपागच्छे सिरोमणि **श्रीहीरविजयसूरि** प्रतिष्ठितं श्रीसंभवनाथबिंबं क्रारितः श्रीस्तंभतीर्थ श्रीखंभाते नगरं प्र०................।

### जेसलमेर

श्रीशांतिनाथ प्र० **श्रीहीरविजयसूरि** सा० । देवचंद

### अजीमगंज

संवत् १६३० वर्षे माघ सुदि १३ दिने पत्तन वास्तव्य सा० सांडा भार्या लषमाइ सुत वीरपालेन भार्या रंगाइ प्रमुख कुटुंबयुतेन श्री संभवनाथ बिंबं कारितं प्रतिष्ठितं तपागच्छाधिराज श्री **हीरविजयसूरिभि**श्चिरं नंदतात् ।

### कलकत्ता'

सं० १६३४ वर्षे फा० श्रु०- शः पत्तने सं० माड़णना समस्त कुटुम्ब युतेन श्री श्रेयांसनाथ बिं० का० प्र० श्री बृहत्तपागच्छाधिराज श्री **हीरविजयसूरिभिः** ॥

### जोधपुर

ॐ संवत् १६३८ वर्षे माघ सुदि १३ सोमे श्री स्तंभतीर्थवास्तव्य सोनी मनजी भार्या मोहणदे सुत सोनी मंगलदासनाम्ना श्री श्री माल ज्ञातीय श्री अजितनाथबिंबं कारापितं तपागच्छे श्री **हीरविजयसूरीश्वरै** प्रतिष्ठितं ।

### शत्रुंजय

संवत् १६२८ वर्षे वै० बु० १० श्रीमालज्ञातीय महषेता भा० हासी सुत मूलजी भा० अहिवदेकेन श्री वासपूज्य बिंब कारापितं श्री तपाश्री **हीरवजय-सुरिभिः** प्रतिष्ठितं शुभं भवतु ॥ छ ॥

## जूना बेडा ( मारवाड )

संवत् १६४४ वर्षे फागुण दि १३ उकेस ज्ञातीय बापणे गोत्रे सेंघवी टीलु भार्या दीड़मदे पुत्र सं० गोपा भार्या गेलमदे पुत्र रूपा चंदा श्री रादुलिया भार्या मन भगीदे पुत्र भोजा भा० ना....श्री पार्श्वनाथ बिंब कारित तपागच्छ भट्टारक श्रीश्री**हीरविज**..... ।

सं० १६३० वर्षे वैशाख वदि ८ दिने श्री वहड़ा ग्रामे उसवाल सुते गोत्र सोलाकी बाघणे सागासाहा भा दाभा० खेमलदे पुत्र राजा भार्या सेवादे पुत्र माना कमरसी श्री कुंथुनाथ बिंबं श्री **हीर**.........

सं० १६३० वर्षे वैशाख वदि ८ दिने श्री वहड़ा ग्राम उसवाल ज्ञातीय गोत्र तिलहरा सा० सूदा भार्या सीहलादे पुत्र नासण वीदा नासण भार्या न काग देवीदा भार्या कनकादे सुत वला श्री आदिनाथ बिंब कारापितं श्री**हीरविजय सूरिभिः** प्रतिष्ठितः ॥

सं० १६२३ वर्षे वैशाख मासे शुक्रवारे १० तिथौ इडरनगर वास्तव्य उसवाल ज्ञातीय । म० श्री । लहुआ सुत मं० जसा मं श्री रामा महा श्राधेन भार्या रला । दम० कडूआ भ० सिंघराज प्रमुख सकल कुटुंब युतेन श्री शांतिनाथ बिंब कारितं । श्री श्रीतपागच्छ युगप्रधान **विजयदानसूरि** पट्टे श्री **हीरविजय-सूरिभि** प्रतिष्ठितं । वैशाख सुदि दशमी दिन ॥

## कलकत्ता

संवत् १६४२ वर्षे पो० सु० १२ सोमे श्रीअजित बिंबं का० सा० नानू भुदिज्जाकेन प्र० श्री **हीरविजयसूरि** ।

## आगरा

सं० १६४२ श्री सुपार्श्वनाथ बि० का० प्र० श्री **हीरविजयसूरिभिः** ॥

## लखनउ

॥ संवत् १६१७ वर्षे माघ वदि १ गुरौ मं० आना भार्या अवलादे पु० मं० नींवाकेन भ्रातृ मं० कान्हाई सा० वस्था आजीवा भार्या जइवंत तत् पुत्र मं०

कर्मसी राजसी नेतया कुटुंबयुतेन स्वश्रेयोर्थं श्री **कुंथुनाथ** बिंबं का० प्र० श्री तपागच्छे श्री **दानविजय सूरि**भिः श्री **हीरविजयसूरि** प्रमुखैः परिवारपरिवृतैः ॥

### अयोध्या

॥ संवत् १६४४ वर्षे फागुण शुदि र दिने उसवाल ज्ञातीय बंभ गोत्रीय साह कटारू भार्या टुलादे सुत सा० तारू भार्या जीवादे सुत सा० टटना प्री ( ?) संघनाम चिंतामणि श्री श्रेयांसनाथ बिंबं तपागच्छाधिराज श्री **हीरविजयसूरिभिः** प्रतिष्ठितं ॥

### पालीताणा

बा० हीराई श्री शान्तिनाथ...श्री **हीरविजयसूरि** प्र० ॥

### पालीताणा

संवत् १६३७ वर्षे माघ वदि ९ शनौ श्री दीव वास्तव्य श्री श्रीमाल ज्ञातीय लघुशाखामण्डन श्रे० काया भा० कामलदे सुत कक्की भार्या हर्षादे सुत सचवीर भार्या सहिजलदे सुत हीरजी भार्या हीरादे श्री आदिनाथ बिंबं कारितं तपागच्छे **श्रीहीरविजयसूरिभिः** प्रतिष्ठितं ॥ छ ॥

### पालीताणा

सं० १६५१ वर्षे मार्गशीर्ष विद ४ गुरौ, दो० वेधराजकेन निजश्रेयसे श्री शान्तिनाथ बिंबं कारितं प्रतिष्ठितं च तपापक्षे श्री **हीरविजयसूरिश्वरैः** भार्या मोलादे सुत धनजी प्रमुखकुटुम्बयुतेन श्री दीवबन्दिर वास्तव्येन ॥ श्री रस्तु ॥

### केरडा-मेवाड

संवत् १६३९ वर्षे वैशाख सुदि १३ खौ श्री स्तम्भतीर्थ वास्तव्य श्री नागर ज्ञातीय सा० पना० भार्या कीलादे सुत सा० होसा भार्या वा । हांसलदे नाम्ना श्री आदिनाथ पंचतीर्थी करापितं । श्रीमत्तपा गच्छे भट्टारक प्रभु श्री **हीर विजय** सूरिभिः प्रतिष्ठितं । शुभं भवतु ॥

### सिरोही

सं० १६४४ वर्षे फागण वदि १३ बुधे हालीवाडा वास्तव्य श्री संघेन कारितं श्री शांतिनाथ बिंबं प्रतिष्ठितं तपागच्छाधिराज **श्री हीरविजयसूरिभिः** ॥

ॐ॥ उँ नमः ॥ संवत् [१६] २० वर्षे आशाढ शुदि २ रवौ गंधारवास्तव्य । प्राग [वंश] दोसी । श्रीगोइआ सुत दौ । नेजपाल भार्या बाई [भोड] की सुत दौ । पंचारणा भ्रातृ दौ । भीम दौ । नने दौ । देवराजप्रमुख – [स्व] कुटुंबेन युतः । श्रीमहावीरदेवकुलिका । कारापिता हर्षेण । तपागछे विबुधशिरोमणिश्रीविजयदानसूरि**श्रीहीरविजय**सूरिप्रसादा[त्] शुभं भवतु ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

આ લેખ, આદીશ્વર ભગવાન્‌ના મંદિરની ભમતીના દક્ષિણ તરફના ન્હાના મંદિરમાં, ૮ પંક્તિમાં કોતરેલો છે. એમાં લખ્યું છે કે- સંવત્ ૧૬૨૦ ના આષાઢ સુદી ૨ અને રવિવારના દિવસે એ દેવકુલિકા* ની પ્રતિષ્ઠા થઇ છે. ગંધાર બંદર નિવાસી પ્રાગ્વાટ (પોરવાડ) જ્ઞાતીય દોસી ગોઇઆના પુત્ર તેજપાલ (સ્ત્રી ભોડકી) ના પુત્ર દો૦ પંચારણાએ પોતાના ભાઇ દો૦ ભીમ, દો૦ નના અને દો૦ દેવરાજ પ્રમુખ સ્વકીય કુટુંબ સાથે મહાવીર તીર્થંકરની એ દેવકુલિકા, તપાગચ્છાચાર્ય શ્રી વિજયદાનસૂરિ અને તેમના પટ્ટધર **શ્રીવિજયહીરસૂરિ**ના ઉપદેશથી કરાવી.

ॐ ॥ संवत् १६२० वर्षे कार्तग शुदि २ दिने गंधारवास्तवं श्रीश्रीमालज्ञातीय सा । श्री [पा] स [वीर] भार्या बाई [पू] तल सुत सा । श्रीवर्धमान भार्या बाई वमलादे अमरादे सुत सा । श्रीरामजी भाई सा । श्रीलहुजी सा । हंस[रा]ज सा । मनजी प्रमुखस्वकुटंबेन युतः श्रीशेत्रंजयोपरि श्रीशांतीनाथप्रासादंचोमष(चौमुख) कारापित । श्रीतपागछे विबुधशिरोमणि **श्रीहीरविजयसूरि**प्रसादात् शुभं भवतु ॥

આ લેખ, આદીશ્વર ભગવાન્‌ના મંદિરની ભમતીના ઇશાન ખૂણામાં આવેલા ગંધારીયા ચૌમુખ-મંદિરમાં, ૯ પંક્તિમાં ખોદેલો છે. સં. ૧૬૨૦ના કાર્તિક સુદી ૨ને શનિવારના દિવસે એ મંદિરની પ્રતિષ્ઠા થઇ. ગંધાર નિવાસી શ્રીમાલજ્ઞાતીય સા. પાસવીર (સ્ત્રી પૂતલ) ના પુત્ર વર્ધમાન (સ્ત્રીઓ બે, વમલાદે અને અમરાદે) ના પુત્ર સા. રામજીએ, સા. લહુજી, સા. હંસરાજ અને સા.

---

★ ન્હાનાં મંદિરો 'દેવકુલિકા' કહેવાય છે અને મ્હોટાં પ્રાયઃ કરીને 'પ્રાસાદ' અથવા 'વિહાર' કહેવાય છે.

મનજી આદિ પોતાના ભાઇઓ વિગેરે કુટુંબ સાથે, શત્રુંજય પર્વત ઉપર ચતુર્દ્વારવાળું શાંતિનાથ તીર્થંકરનું મ્હોટું મંદિર, તપગચ્છાચાર્ય શ્રી વિજયદાનસૂરિ અને **શ્રીહીરવિજયસૂરિ**ના શુભ-ઉપદેશથી બનાવ્યું.

ॐ॥ उँ नमः ॥ संवत् १६२० वर्षे वैशाख शुदि ५ गुरौ । श्रीगंधारवास्तव्य प्रागवंशज्ञातीय । संघवी श्रीजावडा सुत सं. श्री [सीपा] भार्या बाई ॥ गिर [सुनाम्री सुत । सं ।] जिवंत भ्रातृ । सं । काउजी । सं। आ[ढू]जी । प्रमुख [स्व] कुटंबेन युतः ॥ श्रीपार्श्वनाथदेवकुलिका । कारापिता ॥ श्रीतपागच्छे । श्रीविजयदानसूरि० **श्रीहीरविजयसूरि**प्रसादात् शुभं भवतु ॥

આ લેખ, ઈશાનકોંણમાં, આદીશ્વરના મંદિરની દિવાલની સામેની દેહરીમાં, ૮ પંક્તિમાં કોતરેલો છે. આની મિતિ સં. ૧૬૨૦ ના વૈશાખ સુદી ૫ ગુરૂવારની છે. ગંધારના રહેવાસી પ્રાગ્વાટ જ્ઞાતીય સંઘવી જાવડના પુત્ર સં. સીપા (સ્ત્રી ગિરસુ) ના પુત્ર જીવંતે, સં. કાઉજી અને સં. આઢુજી પ્રમુખ પોતાના ભાઇ વિગેરે કુટુંબ સાથે, શ્રીવિજયદાનસૂરિ અને **શ્રીહીરવજયસૂરિ**ના સદુપદેશથી, પાર્શ્વનાથ તીર્થંકરની દેવકુલિકા બનાવી.

॥ ॐ॥ संवत् १६२० वर्षे वैशाख शुदि ५ गुरु श्रीअह्मदावादवास्तव्य दीशावालज्ञातीय महं श्रीवणाइग सुत महं । श्रीगला भार्या बाई मंगाइ सुत । महं। वीरदास स्वकुटंबेन युतः । श्री शेत्रुंजयोपरि श्रीआदिनाथदेवकुलिका कारापिता। श्रीतपागच्छे श्रीविजयदानसूरि**श्रीहीरविजय**सूरिप्रसादात् ॥ शुभं भवतु ॥

આ લેખ, ઉપરના લેખવાળી દેવકુલિકાની જમણી બાજુએ આવેલી દેવકુલિકામાં, ૮ પંક્તિમાં કોતરેલો છે. આની મિતિ ઉપર મુજબજ છે. અમદાવાદ નિવાસી ડીસાવાલ● જ્ઞાતિના, મહં*. વણાઇગ (હાલનું વિનાયક ?) ના સુત

● વર્તમાનમાં માત્ર ઓશવાલ, પોરવાડ, અને શ્રીમાલ જાતોજ જૈનધર્મ પાલનારી દેખાય છે; પરંતુ પૂર્વમાં પ્રાયઃ ડીસાવાલ, નાણાવાલ, માઢ, નાગર, ગુજર, ખડાયતા, વાયડા આદિ બધી વૈશ્ય જાતો જૈનધર્મ પાલતી હતી એમ આ પ્રાચીન લેખો વિગેરે ઉપરથી સ્પષ્ટ જણાય છે.

★ 'મહં' એ શબ્દ નામની પૂર્વે, આબૂ વિગેરેના ઘણા લેખોમાં જોવામાં આવે છે. આના સંબંધમાં, પ્રસિદ્ધ ઇતિહાસજ્ઞ શ્રીયુત ગૌરીશંકર હીરાચંદ ઓઝા પોતાના 'सिरोहीराज्यका इतिहास' નામક પુસ્તકમાં (પૃ. ૬૮ની પાદ ટીકામાં) આ પ્રમાણે લખે છે. ''(કેટલાક) લેખોમાં નામોની પૂર્વે 'મહં૦' લખેલું મળે છે, જે 'મહત્તમ'ના પ્રાકૃત રૂપ 'મહંત'નું સંક્ષિપ્ત રૂપ હોવું જોઇએ. 'મહત્તમ'

મહં. ગલા (સ્ત્રી મંગાઈ) ના સુત મહં. વીરદાસે સ્વકુટુંબ સાથે, શત્રુંજય ઉપર શ્રી આદિનાથની દેવકુલિકા, આચાર્ય શ્રી **વિજયદાન** અને **વિજયહીરના** શુભોપદેશથી કરાવી.

ॐ ॥ उँ नमः ॥ संवत् १६२० वर्षे वैशाख शुदि ५ दिने गंधारवास्तव्य प्रागवांशज्ञातीय व्यो० समरीआ भार्या बाई । भोलु पुत्री बाई वेरथाई । बाई कीबाई स्वकुटंबेन युतः । श्रीशांतिनाथदेवकुलिका कारापिता । श्रीतपागच्छे विबुधशिरोमणि श्रीविजयदानसूरि **श्रीहीरविजय**सूरिप्रसादात् ॥ शुभं भवतुं ॥ श्री ॥

આ લેખ, મુખ્ય મંદિરના ઉત્તર દ્વારની પશ્ચિમે, જમણી બાજુએ આવેલ દેવકુલિકામાં, ૮ પંક્તિમાં કોતરેલો છે. મિતિ સં. ૧૬૨૦ વૈશાખ સુદી ૫ ઉપર્યુક્ત નગર અને જાતિના વ્યો૦ સમરીઆએ, પોતાની ભાર્યા ભોલુ અને પુત્રિઓ બાઇ વેરથાઇ તથા બાઈકીબાઈ આદિ કુટુંબ સમેત, એજ આચાર્ય દ્વયના સદુપદેશથી, શાંતિનાથની દેવકુલિકા કરાવી.

ॐ ॥ उँ नमः ॥

श्रेयस्वी प्रथमः प्रभुः प्रथिमभाग् नैपुण्यपुण्यात्मना-
मस्तु स्वस्तिकरः सुखाब्धिमकरः श्रीआदिदेवः स वः ।
पद्मोल्लासकरः करैरिव रविर्व्योम्नि क्रमांभोरुह-
न्यासैर्यस्तिलकीबभूव भगवान् शत्रुंञ्जयेऽनेकशः ॥ १ ॥

श्रीसिद्धार्थनरेशवंशसरसीजन्माब्जिनीवल्लभः
पायाद्वः परमप्रभावभवनं **श्रीवर्धमानः** प्रभुः ।
उत्पत्तिस्थिति[सं]हृतिप्रकृतिवाग् यद्गौर्जगत्पावनी
स्वर्वापीव महाव्रतिप्रणयभूरासीद् रसोल्लासिनी ॥ २ ॥

(મહંત) એ એક પ્રકારનો ઇલ્કાબ હોવાનો અનુમાન થાય છે જે પ્રાચીનકાલમાં મંત્રિયો (પ્રધાનો) આદિને આપવામાં આવતો હશે. રાજપૂતાનામાં હજુ સુધી કેટલાએ મહાજન(મહાજનો ઘણાભાગે ઓસવાલો ગણાય છે પરંતુ માહેશ્વરી વિગેરે બીજી જાતોમાં પણ એ શબ્દ વ્યવહૃત થઇ શકે છે.) 'મૂંતા' અને 'મહતા' કહેવાય છે, જેમના પૂર્વજોને એ ઇલ્કાબ મળ્યો હશે; અને પાછળથી વંશપરંપરાગત થઇ વંશના નામનું સૂચક થઇ ગયો હશે. 'મૂંતા' અને 'મહતા' એ બંને 'મહત્તમ' (મહંત)ના અપભ્રંશ હોવા જોઇએ.

आसीद्वासववृंदवंदितपदद्वंद्वः पदं संपदां
तत्पट्टांबुधिचंद्रमा गणधरः श्रीमान् **सुधर्म्माभिधः** ।
यस्यौंदार्ययुता प्रहृष्टसुमना अद्यापि विद्यावती
धत्ते संततिरुन्नतिं भगवतो वीरप्रभोर्गौरिव ॥ ३ ॥

श्री**सुस्थितः** **सुप्रतिबुद्ध** एतौ
सूरी अभूतां तदनुक्रमेण ।
याभ्यां गणोऽभूदिह **कोटिकाह्व**-
श्चंद्रार्यमभ्यामिव सुप्रकाशः ॥ ४ ॥

तत्राभूद्वज्रिणां वंद्यः श्रीवज्रर्षिगणाधिपः ।
मूलं श्रीवज्रशाखाया, गंगाया हिमानिव ॥ ५ ॥
तत्पट्टांबरदिनमणिरुदितः **श्रीवज्रसेनगुरु**रासीत् ।
नागेंद्र-चंद्र-निर्वृति-विद्याधर-संज्ञकाश्च तच्छिष्याः ॥ ६ ॥

स्वस्वनामसमानानि येभ्यश्चत्वारि जज्ञिरे ।
कुलानि काममेतेषु कुलं चान्द्रं तु दिद्युते ॥ ७ ॥

भास्करा इव तिमिरं हरंतः ख्यातिभाजनम् ।
भूरयः सूरयस्तत्र जज्ञिरे जगतां मताः ॥ ८ ॥

बभूवुः क्रमतस्तत्र **श्रीजगच्चंद्रसूरयः** ।
**यैस्तपाबिरुदं** लेभे बाणसिद्धयर्क १२८५ वत्सरे ॥ ९ ॥

क्रमेणास्मिन् गणे **हेमविमलाः** सूरयोऽभवन् ।
तत्पट्टे सूरयोऽभूव**न्नानंदविमलाभिधाः** ॥ १० ॥

साध्वाचारविधिः पथः शिथिलतः सम्यक्श्रियां धाम यै-
रुद्दध्रे स्तनसिद्धिसायकसुधारोचिर्निभे १५८२ नेहसि ।
जीमूतैरिव यैर्जगत्पुनरिदं तापं हरद्भिर्भृशं
सश्रीकं विदधे गवां शुचितमैः स्तोमैः रसोल्लासिभिः ॥ ११ ॥

पद्माश्रयैरलमलंक्रियते स्म तेषां
प्रीणन्मनांसि जगतां कमलोदयेन ।
पट्टः प्रवाह इव निर्झर निर्झरिण्याः
शुद्धात्मभि**र्विजयदान**मुनीशहंसैः ॥ १२॥

सौभाग्यं हरिसर्व[प]र्वहरणं रूपं च रंभापति-
श्रीजैत्रं शतपत्रमित्रमहसां चौरं प्रतापं पुनः ।
येषां वीक्ष्य सनातनं मधुरिपुस्वःस्वामिधर्म्मांशवो
जाताः काममपत्रपाभरभृतो गोपत्वमासास्त्रयः ॥ १३॥

तत्पट्टः प्रकटः प्रकामकलितोद्द्योतस्तथा सौधव[त्]
सस्नेहर्य[ति]राज**हीरविजय**स्नेहप्रियैर्निर्म्ममे ।
सौभाग्यं महसां भरेण महतामत्यर्थमुल्लासिनां
बिभ्राणः स यथाजनिष्ट सुदृशां कामप्रमोदास्पदम् ॥ १४॥

देशाद् गूर्जरतोऽथ सूरिवृषभा आकारिताः सादरं
श्रीमत्साहिअकब्बरेण विषयं **मेवातसंज्ञं** शुभम् ।
शा..........जपाणयोवतमसं सर्वं हरंतो गवां
स्तोमैः सूत्रितविश्वविश्वकमलोल्लासैर्नभोर्का इव ॥ १५॥

चक्रुः फतेपुरम..........[र्न] भौम-
दृग्युग्मकोककुलमात्तसुखं सृजंतः ।
अब्देंकपावकनृपप्रमिते १६३९ स्वगोभिः ।
सोल्ला............................बुजकाननम् ये ॥ १६॥

दामेवाखिलभूपमूर्द्धसु निजमाज्ञां सदा धारयन्
श्रीमान् शाहिअकब्बरो नरवरो [देशेष्व] शेषेष्वपि ।
षण्मासाभयदानपुष्टपटहोद्घोषानघध्वंसितः
कामं कारयति स्म हृष्टहृदयो यद्वाक्कल्हारंजितः ॥ १७॥

यदुपदेशवशेन मुदं दधन्
निखिलमण्डलवासिजने निजे ।

मृतधनं च करं च सुजीजिआ-
भिधमकब्बरभूपतिरत्यजत् ॥ १८ ॥

यद्वाचा कतकाभया विमलितस्वांतांबुपूरः कृपा-
पूर्णः शाहिरनिन्द्यनीतिवनिताक्रो[डीकृतात्मा]त्यजत् ।
शुल्कं त्य[कुम]शक्यमन्यधरणीराजां जनप्रीतये
तद्वात्रीडजपुंजपूरुषपशूंश्चामूमुचद्भूरिशः ॥ १९ ॥

यद्वाचां निचयैर्मुधाकृतसुधास्वा[दैर] मंदैः कृता-
ल्हादः **श्रीमदकब्बरः** क्षितिपतिः संतुष्टिपुष्टाशयः ।
त्यक्त्वा तत्करमर्थसार्थमतुलं येषां मनःप्रीतये
जैनेभ्यः प्रददौ च तीर्थतिलकं शत्रुंजयोर्वीधरम् ॥ २० ॥

यद्वाग्भिर्मुदितश्चकार करुणास्फूर्जन्मनाः पौस्तकं
भाण्डागारमपारवाङ्मयमयं वेश्मेव वाग्दैवतम् ।
यत्संवेगभरेण भावितमतिः शाहिः पुनः प्रत्यहं
पूतात्मा बहु मन्यते भगवतां सद्दर्शनो दर्शनम् ॥ २१ ॥

यद्वाचा तरणित्विषेव कलितोल्लासं मनःपंकजं
बिभ्रच्छाहिअकब्बरो व्यसनधीपाथोजिनीं चंद्रमाः ।
जज्ञे श्राद्धजनोचितैश्च सुकृतैः सर्वेषु देशेष्वपि
विख्याताऽर्हतभक्तिभावितमतिः श्रीश्रेणिकक्ष्मापवत् ॥ २२ ॥

लुंपाकाधिपमेघजीऋषिमुखा हित्वा कुमत्याग्रहं
भेजुर्यच्चरणद्वयीमनुदिनं भृंगा इवांभोजिनीम् ।
उल्लासं गमिता यदीयवचनैर्वैराग्यरंगोन्मुखै-
र्जाताः स्वस्वमतं विहाय बहवो लोकास्तपासंज्ञकाः ॥ २३ ॥

आसीच्चैत्यविधापनादिसुकृतक्षेत्रेषु वित्तव्ययो
भूयान् यद्वचनेन **गूर्जर**धरामुख्येषु देशेष्वलम् ।
यात्रा गूर्जरमालवादिकमहादेशोद्भवैर्भूरिभिः
संघैः सार्द्धमृषीश्वरा विदधिरे **शत्रुंजये** ये गिरौ ॥ २४ ॥

तत्पट्टमब्धिमिव रम्यतमं सृजन्तः
स्तोमैर्गवां सकलसंतमसं हरन्तः ।
कामोल्लसत्कुवलयप्रणया जयंति
स्फूर्जत्कला **विजयसेन**मुनींद्रचंद्राः ॥ २५ ॥

यत्प्रतापस्य माहात्म्यं वर्ण्यते किमतः परम् ।
अस्वप्राश्चक्रिरे येन जीवं[तोऽ]पि हि वादिनः ॥ २६ ॥

सौभाग्यं विषमायुधात्कमलिनीकांताच्च तेजस्विना-[तां]
मैश्वर्यं गिरिजापतेः कुमुदिनीकांतात्कलामालिनाम् ।
माहात्म्यं धरणीधरान्मखभुजां गांभीर्यमंभोनिधे-
रादायांबुजभूः प्रभुः प्रविदधे यन्मूर्त्तिमेतन्मयीम् ॥ २७ ॥

ये च श्रीमद**कब्बरेण** विनयादाकारिताः सादरं
श्री**मल्लाभपुरं** पुरंदरपुरं व्यक्तं सुपर्वोत्करैः ।
भूयोभिव्रतिभिर्बुधैः परिवृतो वेगादलंचक्रिरे
सामोदं सरसं सरोरुहवनं लीलामराला इव ॥ २८ ॥

अर्हंतं परमेश्वरत्वकलितं संस्थाप्य विश्वोत्तमं
साक्षात्साहि**अकब्बरस्य** सदसि स्तोमैर्गवामुद्यतैः ।
यैः मीलितलोचना विदधिरे प्रत्यक्षशूरैः श्रिया
वादोन्मादभृतो द्विजातिपतयो भट्टा निशाटा इव ॥ २९ ॥

श्रीमत्साहि **अकब्बरस्य** सदसि प्रोत्सर्प्पिभिर्भूरिभि-
र्वादैर्वादिवरान् विजित्य समदान्सिंहैर्द्विपेंद्रानिव ।
सर्वज्ञाशयतुष्टिहेतुरनघो दिश्युत्तरस्यां स्फुरन्
यैः कैलास इवोज्ज्वलो निजयशःस्तंभो निचख्ने महान् ॥ ३० ॥

दत्त साहसधीर**हीरविजय**श्रीसूरिराजां पुरा
यच्छ्रीशाहि**अकब्बरेण** धरणीशक्रेण तत्प्रीतये ।
तच्चक्रेऽखिलमप्यबालमतिना यत्साज्जगत्साक्षिकं
तत्पत्रं **फुरमाणसंज्ञमनघं** सर्वा दिशो•व्यानशे ॥ ३१ ॥

किं च गोवृषभकासरकांताकासरा यमगृहं न हि नेयाः ।
मोच्यमेव मृतवित्तमशेषं वंदिनोऽपि हि न च ग्रहणीयाः ॥ ३२ ॥

यत्कलासलिलवाहविलासप्रीतचित्ततरुणाजनतुष्टयै ।
स्वीकृतं स्वय**मकब्बर** धात्रीस्वामिना सकलमेतदपीह ॥ ३३ ॥

चोली**वेगम**नंदनेन वसुधाधीशेन सन्मानिता
गुर्व्वी **गूर्जर**मेदिनीमनुदिनं स्वर्लोकबिब्बोकिनीम् ।
सद्वृत्ता महसां भरेण सुभगा गाढं गुणोल्लासिनो
ये हारा इव कंठमंबुजदृशां कुर्वन्ति **शोभास्पदम्** ॥ ३४ ॥

इतश्च-

आभूरान्वय[प]द्मसवद्मा **ओकेशवंशे**ऽभव
च्छ्रेष्ठी श्री**शिवराज** इत्यभिधया सौवर्णिकः पुण्यधीः ।
तत्पुत्रोऽजनि **सीधरश्च** तनयस्तस्याभवत्पर्वतः
**[का]लाह्लोऽजनि** तत्सुतश्च तनुजस्तस्यापि **वाघाभिधः** ॥३५॥

तस्याभूद्वछिआभिधश्च तनुजः ख्यातो रजाईभव-
स्तस्याभूच्च सुहासिणी[ति] गृहिणी पद्मेव पद्मापतेः ।
इंद्राणीसुरराजयोरिव जयः पुत्रस्तयोश्चाभव-
**त्तेजःपाल** इति प्रहृष्टसुमनाः पित्रोर्मनःप्रीतिकृत् ॥ ३६ ॥

[का]मस्येव रतिर्हरेरिव रमा गौरीव गौरीपते-
रासीत्तेजलदे इति प्रियतमा तस्याकृतिः [..........]
भोगश्रीसुभगौ गुरौ प्रणयिनौ शश्वत्सुपर्वादरौ
पौलोमीत्रिदशेश्वराविव सुखं तौ दंपती भेजतुः ॥ ३७ ॥

वैराग्यवारिनिधिपूर्णनिशाकराणां
तेषां च **हीरविजय**व्रतिसिंधुराणाम् ।
सौभाग्य[भा]ग्यपरभागविभासुराणां
तेषां पुन**र्विजयसेन**मुनीश्वराणाम् ॥ ३८ ॥

वाग्भिर्मुधाकृतसुधाभिरुदंचिचेताः
श्राद्धः स शोभनमना भजति स्म भावम् ।
श्रीसं[घभ]क्तिघनदानजिनेंद्रचैत्यो-
द्धारादिकर्म्मसु भृशं सुकृतिप्रियेषु ॥ ३९ ॥

(विशेषकम् ।)

ग्रहैः प्रशस्तेऽह्नि **सुपार्श्वभर्त्तु-**
[र]नन्तभर्त्तुश्च शुभां प्रतिष्ठाम् ।
सोऽचीकरत्षड्युगभूप १६४६ वर्षे
हर्षेण सौवर्णिक**तेजपालः** ॥ ४० ॥

आदावार्षभिरत्र तीर्थतिलके शत्रुं[ज]येऽचीकरं-
श्चैत्यं शैत्यकरं दृषोर्मणिगणस्वर्णादिभिर्भासुरम् ।
अत्रान्येपि भुजार्जितां फलवतीमुच्चैः सृजंतः श्रियं
[प्रा]सादं तदनुक्रमेण बहवश्चाकारयन् भूभुजः ॥ ४२ ॥

तीर्थेऽत्र साधुकरमाभिधो धनी
सिद्धि सिद्धि तिथि १५८८ संख्ये ।
चैत्यम[ची] करदुक्तेरानंदविमलमुनिराजाम् ॥ ४३ ॥

तं वीक्ष्य जीर्णं भगवद्विहारं
स तेजपालः स्वहृदीति दध्यौ ।
भावी कदा सो ऽवसरो बरीयान्
यत्रा ऽत्र चैत्यं भविता नवीनम् ॥ ४४ ॥

अन्येद्युः स्वगुरूपदेशशरदा कामं वलक्षीकृत-
स्वांतांभाः स वणिग् व[र]पुरवरे **श्रीस्तंभतीर्थे वसन्**।
तीर्थे श्रीमति तुंगतीर्थतिलके शत्रुंजयेऽर्हद्गृहो-
द्धारं कर्तुमना अजायततमां साफल्यमिच्छञ् श्रियः ॥ ४५ ॥

अत्र स्यात् सुकृतं कृतं तनुमतां श्रेयः श्रियां कारणं
मत्वैवं निजपूर्वजव्रजमहानंदप्रमोदाप्तये ।

तीर्थे श्रीविमलाचले ऽतिविमले मौलेऽर्हतो मंदिरे
जीर्णोद्धारमकारयत्स सुकृती कुंतीतनूजन्मवत् ॥ ४६ ॥

शृङ्गेण भिन्नगगनांगणमेतदुच्चै-
श्चैत्यं चकास्ति शिखरस्थितहेमकुंभम् ।
हस्तेषु ५२ हस्तमितमुच्चमुपैति नाक-
लक्ष्मीं विजेतुमिव काममखर्वगर्वाम् ॥ ४७ ॥

यत्रार्हदोकसि जितामरकुंभिकुंभाः
कुंभा विभांति शरवेदकरेंदु १२४५ संख्याः ।
किं सेवितुं प्रभुमयुः प्रचुरप्रताप-
पूरैर्जिता दिनकराः कृतनैकरूपाः ॥ ४८ ॥

उन्मूलितप्रमदभूमिरुहानशेषान्
विश्वेषु विघ्नकरिणो युगपन्निहंतुम् ।
सज्जाः स्म इत्थमभिधातुमिवेंदुनेत्राः (२१)
सिंहा विभांत्युपगता जिनधाम्नि यत्र ॥ ४९ ॥

योगिन्यो यत्र शोभंते चतस्रो जिनवेश्मनि ।
निषेवितुमिवाक्रांताः प्रतापैरागता दिशः ॥ ५० ॥

राजंते च दिशां पाला [.....।] यत्राऽर्हदालये ।
मूर्तिमंत×किमायाता धर्म्मास्संयमिनाममी ॥ ५१ ॥

द्वासप्ततिः श्रियमयंति जिनेंद्रचंद्र-
बिंबानि देवकुलिकासु च तावतीषु ।
द्वासप्ततेः श्रितजनालिकलालतानां
किं कुड्मला) (परिमलैर्भुवनं भरंतः ॥ ५२ ॥

राजंते यत्र चत्वारो गवाक्षा जिनवेश्मनि ।
विरंचेरिव वक्त्राणि विश्वाकारणहेतवे ॥ ५३ ॥

यत्र चैत्ये विराजंते चत्वारश्च तपोधनाः ।
अमी धर्म्माः किमायाताः प्रभूपास्त्यै वपुर्भृतः ॥ ५४॥

पंचालिका: श्रियमयंति जिनेंद्रधाम्नि
द्वात्रिंशदिंद्ररमणीभरजैत्ररूपाः ।
ज्ञात्वा पतीनिह जिने किमु लक्षणक्ष्मा-
राजां प्रिया निजनिजेशनिभालनोत्का: ॥ ५५॥

द्वात्रिंशदुत्तमतमानि च तोरणानि
राजंति यत्र जिनधाम्नि मनोहराणि ।
किं तीर्थकृद्दशनलक्ष्मिमृगेक्षणाना-
मंदोलनानि सरलानि सुखासनानि ॥ ५६॥

गजाश्चतुर्विंशतिरऽद्रितुंगा
विभांति शस्ता जिनधाम्नि यत्र ।
देवाश्चतुर्विंशतिरीशभक्त्यै
किमागताः कुञ्जररूपभाजः ॥ ५७॥

स्तंभाश्चतुस्सप्ततिरद्रिराजो-
त्तुंगा विभांतीह जिनेंद्रचैत्ये ।
दिशामऽधीशैः सह सर्व्व इंद्राः
किमाप्तभक्त्यै समुपेयिवांसः ॥ ५८॥

रम्यं नंदपयोधिभूपति १६४९ मिते वर्षे सुखोत्कर्षकृत्
साहाप्याद् **जसुठक्कुरस्य** सुकृतारामैकपाथोमुचः ।
प्रासादं **वछिआसु**तेन सुधिया शत्रुंजये कारितं
दृष्ट्वाऽष्टापदतीर्थचैत्यतुलितं केषां न चित्ते रतिः ॥ ५९॥

चैत्यं चतुर्णामिव धर्म्ममेदिनी-
भुजां गृहं प्रीणितविश्वविष्टपम्

**शत्रुंजयोर्व्वीभृति** **नंदिवर्द्धना**-
भिधं सदा यच्छतु वांछितानि वः ॥ ६० ॥

[प्राज्य]यः प्रभाभरविनिर्म्मितनेत्रशैत्ये
चैत्ये ऽत्र भूरिरभवद् विभवव्ययो यः ।
ज्ञात्वा वदंति मनुजा इति **तेजपालं**
कल्पद्रुमत्ययमनेन धनव्ययेन ॥ ६१ ॥

शत्रुंजये गगनबाणकला १६५० मितेऽब्दे
यात्रां चकार सुकृताय स **तेजपालः** ।
चैत्यस्य तस्य सुदिने गुरुभिः प्रतिष्ठा
चक्रे च **हीरविजया**भिधसूरिसिंहैः ॥ ६२ ॥

मार्तण्डमण्डलमिवांबुरुहां समूहः
पीयूषरश्मिमिव नीरनिधेः प्रवाहः ।
केकिव्रजः सलिलवाहमिवातितुंगं
चैत्यं निरीक्ष्य मुदमेति जनः समस्तः ॥ ६३ ॥ च्छ

चैत्यं चारु चतुर्मुखं कृतसुखं **श्रीरामजीकारितं**
प्रोत्तुंगं **जसुठक्कुरेण** विहितं चैत्यं द्वितीयं शुभम् ।
रम्यं **कुअरजीवि**निर्म्मितमभूच्चैत्यं तृतीयं पुन-
**र्मूलश्रेष्ठिकृतं** निकामसुभगं चैत्यं चतुर्थं तथा ॥ ६४ ॥

एभिर्विश्वविसारिभिर्द्युतिभरैरत्यर्थसंसुत्रितोद्-
द्योतो दिक्ष्वखिलासु निर्ज्जरपतिः स्वर्लोकपालैरिव ।
श्रीशत्रुंजयशैलमौलिमुकुटं चैत्यैश्चतुर्भिर्युतः
प्रासादो ऽङ्गिमनोविनोदकमलाचैत्यं चिरं नंदतु ॥ ६५ ॥

वस्ताभिधस्यं वरसूत्रधरस्य शिल्पं
चैत्यं चिरादिदमुदीक्ष्य निरीक्षणीयम् ।
शिष्यत्वमिच्छति कलाकलितोऽपि विश्व-
कर्माऽस्य शिल्पिपटले भवितुं प्रसिद्धः ॥ ६६ ॥

सदाचाराब्धीनां **कमलविजया**ह्वानसुधियां
पदद्वंद्वांभोजभ्रमरसदृशो **हेमविजयः** ।
अलंकारैराढ्यां स्त्रियमिव शुभां यां विहितवान्
प्रशस्तिः श[स्तै]षा जगति चिरकालं विजयताम् ॥ ६७॥

इति सौवर्णिकसाह श्रीतेजःपालोद्धृतविमलाचल-
मण्डनश्रीआदीशमूलप्रासादप्रशस्तिः ॥ च्छ॥
बुधसहजसागराणां विनेयजयसागरोऽलिखद्वर्णैः
शिल्पिभ्यामुत्कीर्णा माधवनानाभिधानाभ्याम् ॥ ६८॥

(एपिग्राफिआ इण्डिका-२/५०-५९)

મુખ્ય મંદિરના પૂર્વદ્વારના રંગમંડપમાં, નં. ૧ વાળા લેખની સામી બાજુએ આવેલા સ્થંભ ઉપર, આ નં. ૧૨નો શિલાલેખ આવેલો છે. શત્રુંજય ઉપરના વિદ્યમાન લેખોમાં આ લેખ સૌથી મ્હોટો છે. એની કુલ ૮૭ પંક્તિઓ છે અને દરેક પંક્તિમાં ૪૦ થી ૫૦ અક્ષરો આવેલા છે. જગદ્ગુરૂ શ્રી **હીરવિજયસૂરિ** અને તેમના પટ્ટધર આચાર્ય **શ્રી વિજયસેન**ના સદુપદેશથી, ખંભાત બંદરના મહાન્ ધનિક સાહ **તેજપાલ સૌવર્ણિ**કે શત્રુંજયના એ મહાન્ મંદિરનો સવિશેષ પુનરૂદ્ધાર કરી, તેને ફરીથી તૈયાર કરાવ્યું અને **હીરવિજયસૂરિ**ના પવિત્ર હાથે તેની પ્રતિષ્ઠા કરાવી તે સંબંધી વર્ણન આમાં આપવામાં આવેલું છે. આ આખા લેખનો સાર આ પ્રમાણે છે :-

પ્રથમના બે પદ્યોમાં આદિનાથ ભગવાન અને વર્ધમાન પ્રભુની સ્તવના છે. પછી જેમની સાધુસંતતિ વર્તમાન સમયે ભરતક્ષેત્રમાં પ્રવર્તે છે તે શ્રીસુધર્માગણધરની સ્તવના છે. (પ. ૩) સુધર્માગણધરની શિષ્ય પરંપરામાં સુસ્થિત અને સુપ્રતિબુદ્ધ નામના બે આચાર્યો થયા જેમનાથી કૌટિકગણ પ્રસિદ્ધિ પામ્યો. (પ. ૪) ત્યાર બાદ વજ્રસેન નામના આચાર્ય થયા જેમના લીધે વજ્રી શાખા પ્રખ્યાત થઇ. (પ. ૫) વજ્રસેનસૂરિના નાગેન્દ્ર, ચંદ્ર, નિર્વૃતિ અને વિદ્યાધર નામના ૪ શિષ્યો થયા જેમનાથી તેજ નામના ૪ જુદા જુદા કુલો વિખ્યાતિ પામ્યાં. (પ. ૬-૭) પહેલા ચાંદ્રકુળમાં પાછળથી અનેક પ્રસિદ્ધ

આચાર્યો થયા. (પ. ૮) ક્રમથી સંવત્ ૧૨૮૫ માં જગચ્ચંદ્ર નામના આચાર્ય થયા જેમણે 'તપા' બિરૂદ પ્રાપ્ત કર્યું. (પ. ૯) પાછળથી એ સમુદાયમાં હેમવિમલસૂરિ થયા કે જેમના શિષ્ય આનંદવિમલાચાર્ય હતા. (પ. ૧૦) આનંદવિમલસૂરિએ, સાધુ સમુદાયમાં શિથિલાચારનું પ્રાબલ્ય વધતું જોઇ સં. ૧૫૮૨ માં ક્રિયોદ્ધાર કરી સુવિહિતમાર્ગને પ્રગતિમાં મુક્યો. (પ. ૧૧) આનંદવિમલાચાર્યના શિષ્ય વિજયદાનસૂરિ થયા. (પ. ૧૨) વિજયદાનસૂરિની પાટે પ્રભાવક **શ્રીહીરવિજયસૂરિ** થયા, (પ. ૧૪) જેમને ગુજરાતમાંથી, અકબર બાદશાહે પોતાના મેવાત દેશમાં, આદર પૂર્વક બોલાવ્યા. (પ. ૧૫) સંવત્ ૧૬૩૯ માં સૂરિજી અકબરની રાજધાની ફતેપુર (સીખરી) માં પહોંચ્યા. (પ. ૧૬) બાદશાહ હીરવિજયસૂરિની મુલાકાત લઈ બહુ ખુશી થયો અને તેમના ઉપદેશથી બધા દેશોમાં છ મહિના સુધી જીવદયા પલાવી, મૃત મનુષ્યોના ધનનો ત્યાગ કર્યો, જીજીઆ વેરો બંધ કર્યો, પાંજરાઓમાં પૂરી રાખેલા પક્ષિઓને ઉડાડી મુકયા, શત્રુંજય પર્વત જૈનોને સ્વાધીન કર્યો અને પોતાની પાસે જે મ્હોટો પુસ્તકભંડાર હતો તે સૂરિજીને સમર્પણ કર્યો. (પ. ૧૭-૨૧) જે બાદશાહે શ્રેણિક રાજાની માફક, **હીરવિજયસૂરિ**ના કથનથી જગતમાં જૈનધર્મની પ્રભાવના કરી. (પ. ૨૨) મેઘજીઋષિ નામનો લુંપક (લુંકા) ગચ્છનો મ્હોટો આચાર્ય, પોતાના પક્ષને અસત્ય જાણી **હીરવિજયસૂરિની** સેવામાં હાજર થયો. (પ. ૨૩) જેમના વચનથી ગુજરાત આદિ દેશોમાં, મંદિરો વિગેરે બનાવવામાં શ્રાવકોએ અગણિત દ્રવ્યવ્યય કર્યો. જેમણે ગુજરાત અને માલવા આદિ દેશોના અનેક સંઘો સાથે શત્રુંજયની યાત્રા કરી. (પ. ૨૪) શ્રીહીરવિજયસૂરિની પાટે શ્રીવિજયસેનસૂરિ જયવંતા વર્તે છે કે જેમના પણ પ્રતાપનું વર્ણન કોણ કરી શકે છે. (પ. ૨૫-૭) એમને પણ અકબર બાદશાહે વિનયપૂર્વક લાહોરમાં બોલાવ્યા હતા કે જ્યાં અનેક વાદિઓ સાથે વાદ કરી વિજય મેળવ્યો અને બાદશાહના મનને ખુશ કર્યું. (પે. ૨૮-૩૦) બાદશાહે, હીરવિજયસૂરિને પ્રથમ જે જે ફરમાનો આપ્યાં હતાં તે બધા વિજયસેનસૂરિને પણ આપ્યાં, અને વિશેષમાં એમના કથનથી પોતાના રાજ્યમાં, સદાના માટે ગાય, ભેંસ, બળદ અને પાડાનો પ્રાણનાશ નહિ કરવાના પણ ફરમાનો કાઢયાં. (પ. ૩૨-૩)

ખરેખર *ચોલી બેગમના પુત્ર અકબરશાહ પાસેથી મહાન્ સન્માન મેળવી એમણે ગુર્જરધરાને શોભાવી છે (પ. ૩૪.)

ઓસવંશમાં આભૂ શેઠના કુળમાં સૌવર્ણિક (સોની) શિવરાજ નામનો પુણ્યશાળી શેઠ થયો. તેનો પુત્ર સીધર, તેનો પુત્ર પર્વત, તેનો કાલા અને તેનો વાઘા નામનો પુત્ર થયો. (પ. ૩૫.) તેને રજાઇ નામની ગૃહિણીથી વચ્છિઆ નામનો પુત્ર થયો કે જેની લક્ષ્મી જેવી સુહાસિણી નામની સ્ત્રીએ તેજપાલ નામના પ્રતાપી પુત્રને જન્મ આપ્યો. (પ઼ ૩૬.) તેજપાલને, શિવને પાર્વતી અને વિષ્ણુને લક્ષ્મીની જેમ, તેજલદે નામની પ્રિય પત્ની હતી. તે બંને દંપતી ઈન્દ્ર અને ઇન્દ્રાણીના જેવા સુખો ભોગવતાં હતાં. (પ. ૩૭) **હીરવિજયસૂરિ** અને **વિજયસેનસૂરિ**નો તે અતિભક્ત હતો. તેમના ઉપદેશથી તેણે જિનમંદિરો બનાવવામાં અને સંઘભક્તિ કરવામાં અગણિત ધન ખર્ચ્યું હતું. (પ. ૩૮-૯.) સંવત્ ૧૬૪૬માં તેણે પોતાના જન્મ સ્થાન (ખંભાત)માં સુપાર્શ્વનાથ તીર્થંકરનું ભવ્ય ચૈત્ય બનાવ્યું. (પ. ૪૦)

સં. ૧૫૮૭ માં, કર્માસાંહે* આનંદવિમલસૂરિના સદુપદેશથી શત્રુંજયતીર્થ ઉપરના મૂળ મંદિરનો પુનરૂદ્ધાર કર્યો. (પ. ૪૩). પરંતુ, બહુજ પ્રાચીનતાના લીધે, થોડાજ સમયમાં, પાછું એ મૂળ મંદિર, જીર્ણપ્રાય જેવું અને જર્જર થઈ ગયેલું દેખાવા લાગ્યું. તેથી તેજપાલે પોતાના મનમાં વિચાર કર્યો કે, આ મંદિરનો ફરીથી બરોબર ઉદ્ધાર થાય તો કેવું સારૂં ? (પ. ૪૪) એમ વિચારી, **હીરવિજયસૂરિ** આદિના સદુપદેશથી પોતે એ મંદિરનો ઉદ્ધાર કરવો શરૂ કર્યો અને થોડાજ સમયમાં આખું મંદિર તદ્દન નવા જેવું તૈયાર થયું. (પ. ૪૬-૬).

મંદિરની રચનાનું કેટલુંક વર્ણન આ પ્રમાણે છે-ભૂતલથી તે શિખર સુધીની એની ઉંચાઇ ૫૨ હાથની છે. ૧૨૪૫ કુંભો એના ઉપર વિરાજમાન છે. વિઘ્ન રૂપી

---

★ અકબર બાદશાહની માતાનું નામ જૈનલેખકો 'ચોલી બેગમ' એવું આપે છે. हीरसौभाग्य, विजयप्रशस्ति, कृपारसकोश આદિ અનેક ગ્રંથોમાં એ નામ મળે છે. પરંતુ, અન્યન્ય ઐતિહાસિક પુસ્તકોમાં તો તેનું નામ 'મરીયમ મકાની' લખેલું જોવામાં આવે છે.

★ 'शत्रुंजयतीर्थोद्धारप्रबंध' માં તો, કર્માસાહને એ કાર્યમાં વિશેષ પ્રેરણા કરનાર બૃહત્તપાગચ્છના વિનયમંડન પાઠક લખ્યા છે. આનંદવિમલસૂરિનું તેમાં નામ સુધાં નથી. તેમજ પ્રબંધકારના કથનમાં સંશય લેવા જેવું પણ કશું નથી. કદાચ પ્રતિષ્ઠાના સમયે આનંદવિમલસૂરિ ત્યાં વિદ્યમાન હોય અને તેના લીધે આ કથન કરેલું હોય તો ના નહિ.

હાથિયોનો નાશ કરવા માટે જાણે તત્પર થયેલા હોય તેવા ૨૧ સિંહો એ મંદિર ઉપર શોભી રહ્યા છે. (પ. ૪૯) ચારે દિશાઓમાં ૪ યોગિનિઓ અને ૧૦ દિક્પાલો પણ યથાસ્થાન સ્થાપિત છે. (પ. ૫૦-૧) એ મહાન મંદિરની ચારે બાજુએ ૭૨ દેવકુલિકાઓ તેટલીજ જિનમૂર્તિઓથી ભૂષિત થયેલી છે (પ. ૫૨.) ૪ ગવાક્ષો (ગોખલાઓ) ૩૨ પંચાલિકા (પૂતલિયો) અને ૩૨ તોરણોથી આ મંદિરની શોભા અલૌકિક દેખાય છે. (પ. ૫૩-૬.) વળી એ મંદિરમાં, ૨૪ હાથિઓ અને બધા મળી ૭૪ સ્તંભો લાગેલાં છે. (પ. ૫૭-૮.) આવું અનુપમ મંદિર જસુ ઠક્કુરની સહાયતાથી સંવત્ ૧૬૪૯ માં તેજપાલે તૈયાર કરાવ્યું, અને તેનું 'નંદિવર્દ્ધન' એવું નામ સ્થાપન કર્યું. આ ચૈત્ય સમરાવવા માટે તેજપાલે જે ધન ખર્ચ્યું, તે જોઈ લોકો તેને કલ્પવૃક્ષની ઉપમા આપતા હતા. (પ. ૫૮-૬૦.) સંવત્ ૧૬૫૦ માં, બહુ ધામધુમથી તેજપાલે શત્રુંજયની યાત્રા કરી અને તેજ વખતે **શ્રીહીરવિજયસૂરી**ના પવિત્ર હાથે એ મંદિરની પ્રતિષ્ઠા કરાવી. (પ. ૬૧-૨.)

આ મંદિરના ઉદ્ધારની સાથે, (૧) સા. રામજીનું (૨) જસુ ઠકકુરનું, (૩) સા. કુંઅરજીનું, અને (૪) મૂલા શેઠનું; એમ બીજા પણ ૪ મંદિરો તૈયાર થયાં હતાં કે જેમની પ્રતિષ્ઠા પણ એ સૂરિવરે, આજ સમયે કરી. (પ. ૬૨-૫.)

વસ્તા નામના સૂત્રધારે, કે જેનું શિલ્પચાતુર્ય જોઇ વિશ્વકર્મા પણ તેનો શિષ્ય થવા ઇચ્છે, તેણે આ રમણીય મંદિર બનાવ્યું છે. (પ. ૬૬.) સદાચારના સમુદ્રસમાન શ્રીકમલવિજયવિબુધના ચરણસેવક શ્રી હેમવિજય ++કવિવરે અલંકારયુક્ત આ શુભ પ્રંશસ્તિ બનાવી છે કે જે ચિરકાલ સુધી જગત્માં જયવંતી રહો. (પ. ૬૭.)

પંડિત સહજસાગરના શિષ્ય જયસાગરે આ પ્રશસ્તિ શિલાપટ્ટ ઉપર લખી અને માધવ તથા નાનાનામના શિલ્પિઓએ કોતરી છે. (પ. ૬૮)

॥ ॐ॥ सं० १६५० [प्र०] चै० पूर्णिमायां सुविहितसाधुक्षीरसागर-प्रोल्लासशीतपादानां निजवचनरंजितसाहि श्रीअकब्बरप्रदत्तश्रीसिद्धशैलानां भट्टारक-श्रीविजयसेनसूरिप्रमुखसुविहितभक्तिभरसेव्यमानपादारविंदानां श्री६ **श्रीहीरविजय**-सूरिपादानां माहात्म्यप्रीणितसाहिनिर्मितसकलसत्वद्रव्यग्रहण [मु]क्तिकायां प्रथम-चैत्रपूर्णिमायां तच्छिष्यसकलवाचककोटि-कोटीरशतकोटिश्री६श्रीविमलहर्षगणिभिः।

श्रे० पं० देवहर्षग० श्रीशत्रुंजय० कृतकृत्य पं० धनविजयग० पं० जयविजयग० जसविजयहंसविजयग० मुनि[ वे ]सादिमुनिशतद्वयपरिकरितैर्निर्विघ्नीकृता यात्रा इति भद्रम् ॥

મ્હોટી ટુંકમાં આદીશ્વર ભગવાનના મુખ્ય મંદિરની દક્ષિણ તરફની દિવાલ ઉપર, ન્હાંની ન્હાંની ૨૨ પંક્તિઓમાં, આ નં. ૩૩ નો લેખ કોતરેલો છે. લેખમાં જણાવેલું છે કે-

સં. ૧૬૫૦ ના પ્રથમ ચૈત્ર માસની પૂર્ણિમાના દિવસે, ચારિત્રપાત્ર અને સન્માર્ગગામી એવા સાધુ રૂપ સમુદ્રને ઉલ્લસિત કરવા માટે જેઓ ચંદ્ર જેવા છે, જેમના વચનોથી રંજિત થઇ **અકબર બાદશાહે શત્રુંજય** પર્વત જેમના સ્વાધીન કર્યો છે અને ભટ્ટારક **વિજયસેનસૂરિ** પ્રમુખ સુવિહિતજનો જેમની ભક્તિપૂર્વક ચરણસેવા કરે છે એવા આચાર્ય **શ્રીહીરવિજયસૂરિ**ના મહિમાથી આનંદિત થઇ બાદશાહે શત્રુંજયની યાત્રાએ જનાર બધા મનુષ્યો પાસેથી જે દિવસે મસ્તક કર (માથા વેરો-મુંડકો) લેવાનો નિષેધ કર્યો છે તેજ દિવસે, ઉક્ત આચાર્યવર્યના શિષ્ય, સકલવાચક શિરોમણિ **શ્રીવિમલહર્ષ ઉપાધ્યાયે** પં. દેવહર્ષ, પં. ધનવિજય, પં. જયવિજય, પં. જસવિજય, પં. હંસવિજય અને મુનિ વેસલ આદિ ૨૦૦ મુનિઓના પરિવાર સાથે નિર્વિઘ્ન રીતે, શત્રુંજયની યાત્રા કરી છે.

## आबु

संवत् १६६१ वर्षे आसो सुदि ११ दिने वार शुक्रे ओसवालज्ञातीय सा० मुला संघवी रूपा राउत कचरा जगमाल श्रीसीरोहिनगरवास्तव्यैः श्रीअर्बुदाचलचैत्ये युगप्रधानभट्टारक श्रीश्रीश्री**हीरविजय**सूरिस्थापितमहोपाध्याय श्रीलब्धिसागर वासक्षेप.....................

## राणकपुर

॥ ई० ॥ संवत १६५१ वर्षे वैशाखशुदि-१३ दिने पातसाहि **अकब्बर**प्रदत्तजगद्गुरुबिरुदधा[ र ]क परमगुरु तपागछा( च्छा )धिराज भट्टारकश्री ६ **हीरविजयसूरी**णामुपदेशेन **श्रीराणपुरनगरे** चतुमु( र्मु )खश्रीधरणविहारश्री

मदम्हदावादनगरनिकटवत्तु(र्त्त्यु)समापुरवास्तव्यप्राग्व(ग्वा) ट ज्ञातीय सा० रायमलभार्यावरजू भार्या सुरूपदे तत्पुत्र [सा०] खेता सा० नायकाभ्यां सा० वरधादि कुटुंबयुताभ्यां पूर्वदिगप्र(क्प्र)तोल्या मेघनादामिल(भि)धो मंडप (पः) कारितः स्वश्रेयार्थे ॥ सूत्रधार समलमंडपरिवनादविरचित (तः) [॥]

॥ र्द० ॥ संवत १६४७ वर्षे श्री फाल्गुनमासशुक्लपक्षे पंचम्यां तिथौ गुरुवासरे श्रीतपागच्छाधिराजपातसाह श्री**अकबर**जगद्गुरुबिरुदधारक भट्टारि(र)क श्री श्रीश्री४ **हीरविजय**सूरीणामुपदेशेन । चतुर्मुखश्रीधरणविहारे प्राग्वाटज्ञातीयसुश्रावक सा० खेतानायकेन वर्द्धापुत्रयशवंतादि कुटं(टुं)बयुतेन अष्टचत्वारिंशत्४८ प्रमाणानि सुवर्णनाणकानि मुक्तानि पूर्वदिक्सत्कप्रतोलीनिमित्तमिति श्रीअहिमदावादपार्श्वे । उसमापुरतः ॥ श्री रस्तु ॥

(नं. ૩૦૮-૦૯ ના લેખોમાં જણાવ્યું છે કે- સંવત્ ૧૬૪૭માં અમદાવાદની પાસે આવેલા ઉસમાપુરના રહેવાસી પ્રાગ્વાટજ્ઞાતિના સા. ખેતા અને નાયકે, જેમને અકબર બાદશાહે જગદ્ગુરુનું બિરૂદ આપ્યું છે એવા **શ્રી હીરવિજયસૂરિના સદુપદેશ**થી, રાણપુર નગરમાં, સં. ધરણાએ કરાવેલ ચતુર્મુખ વિહારમાંના પૂર્વદિશાવાળા દરવાજાના સમારકામ સારૂં ૪૮ સોના મહોર આપી તથા તેજ દરવાજા પાસે મેઘનાદ નામનો એક મંડપ કરાવ્યો.

### नाणा

संव० १६३० वर्षे वैशाखवदि ८ दिने श्रीबहडाग्रामे उसवालज्ञातीय गोत्रतिलाहरा सा० सूदा भार्या सोहलादे पुत्र नासण वीदा नासण भार्या नकागदे वीदा भार्या कनकादे सुत वला श्रीआदिनाथबिंबं कारापितं **श्रीहीरविजय**सूरिभिः प्रतिष्ठितः ।

### नाणा

॥ र्द० ॥ संवत् १६२३ वर्षे वैशाखमासे शुक्रवारे १० दिने ईडरनगरवास्तव्य उसवाल ज्ञातीय मं० श्रीलहूआ सुत मं० जसा० मं० श्रीरामा महाश्राद्धेन भार्या रमादे मं० सिंधराजप्रमुखसकलकुटुंबयुतेन श्रीशांतिनाथबिंबं कारितं॥ श्रीतपागच्छयुगप्रधानश्रीविजयदानसूरिपट्टे **श्रीहीरविजयसूरिभिः** प्रतिष्ठितं ।

## खंभात

॥ ओं ॥

श्रेयःसन्ततिधाम कामितमनःकामद्रुमांभोधरः
पार्श्वः प्रीतिपयोजिनीदिनमणिश्चिन्तामणिः पातु वः ।
ज्योतिःपङ्क्तिरिवाब्जिनीप्रणयिनं पद्मोत्करोल्लासिनं
सम्पत्तिर्न जहाति यच्चरणयोः सेवां सृजन्तं जनम् ॥ १ ॥

श्रीसिद्धार्थनरेशवंशसरसीजन्माब्जिनीवल्लभः
पायाद्वः परमप्रभावभवनं श्रीवद्धमार्नः प्रभुः ।
उत्पत्तिस्थितिसंहृतिप्रकृतिवाग् यद्‌गोर्जगत्पावनी
स्वर्वापीव महाव्रतिप्रणयभूरासीद् रसोल्लासिनी ॥ २ ॥

आसीद्वासववृन्दवन्दितपदद्वन्द्वः पदं सम्पदां
तत्पट्टांबुधिचन्द्रमा गणधरः श्रीमान् सुधर्म्माभिधः ।
यस्यौदार्ययुता प्रहृष्टसुमना अद्यापि विद्यावनी
धत्ते सन्ततिरुन्नतिं भगवतो वीरर्प्रभोर्गौरिव ॥ ३ ॥

बभुवुः क्रमतस्तत्र श्रीजगच्चन्द्रसूरयः ।
यैस्तपाबिरुदं लेभे बाणसिद्ध्यर्कवत्सरे (१२८५) ॥ ४ ॥

क्रमेणास्मिन् गणे हेमविमलाः सूरयोऽभवन् ।
तत्पट्टे सूरयोऽभवन्नानन्दविमलाभिधाः ॥ ५ ॥

साध्वाचारविधिपथः शिथिलतः सम्यक्श्रियां धाम यै-
रुद्दध्रे स्तनसिद्धिसायकसुधारोचिर्म्मिते(१५८२)वत्सरे ।
जीमूतैरिव यैर्जगत्पुनरिदं तापं हरद्भिर्भृशं
सश्रीकं विदधे गवां शुचितमैः स्तोमैरसोल्लासिभिः ॥ ६ ॥

पद्माश्रयैरलमलं क्रियतेस्म तेषां
प्रीणन्मनांसि जगतां कमलोदयेन ।
पट्टः प्रवाह इव निर्ज्जरनिर्ज्झरिण्याः
शुद्धात्मभिर्विजयदानमुनीशहंसैः ॥ ७ ॥

तत्पट्टपूर्वपर्व्वतपयोजिनीप्राणवल्लभप्रतिमाः ।
श्रीहीरविजयसूरिप्रभवः श्रीधाम शोभन्ते ॥ ८ ॥

ये श्रीफतेपुरं प्राप्ताः श्रीअकब्बरशाहिना ।
आहूता वत्सरे नन्दानलर्तुशशभून्मिते (१६३९) ॥ ९ ॥

निजाशेषेषु देशेषु शाहिना तेन घोषितः ।
षाण्मासिको यदुक्त्योच्चैरमारिपटहः पटुः ॥ १० ॥

स श्रीशाहिः स्वकीयेषु मण्डलेष्वखिलेष्वपि ।
मृतस्वं जीजिआख्यं च करं यद्वचनैर्जहौ ॥ ११ ॥

दुस्तजं तत्करं हित्वा तीर्थं शत्रुंजयाभिधम् ।
जैनसाद्यद्रिरा चक्रे क्ष्माशक्रेणामुना पुनः ॥ १२ ॥

ऋषीश्रीमेघजीमुख्या लुम्पाकामतमात्मनः ।
हित्वा यच्चरणद्वन्द्वं भेजु भृङ्गा इवाम्बुजम् ॥ १३ ॥

तत्पट्टमब्धिमिव रम्यतमं सृजन्तः
स्तोमैर्गवां सकलसन्तमसं हरन्तः ।
कामोल्लसत्कुवलयप्रणया जयन्ति
स्फूर्जत्कला **विजयसेन**मुनीन्द्रचन्द्राः ॥ १४ ॥

यत्प्रतापस्य माहात्म्यं वर्ण्यते किमितः परम् ।
अस्वप्राश्चक्रिरे येन जीवन्तोऽपि हि वादिनः ॥ १५ ॥

सुन्दरादरमाहूतैः **श्रीअकब्बर**भुभुजा ।
द्राग् यैरलंकृतं लाभपुरं पद्ममिवालिभिः ॥ १६ ॥

**श्रीअकब्बर**भूपस्य सभासीमंतिनीहृदि ।
यत्कीर्त्तिमौक्तिकीभूता वादिवृन्दजयाब्धिजा ॥ १७ ॥

**श्रीहीरविजया**ह्वानसूरीणां शाहिना पुरा ।
अमारिमुख्यं यद्दत्त यत्सात्तत्सकलं कृतं ॥ १८ ॥

अर्हन्तं परमेश्वरत्वकलितं संस्थाप्य विश्वोत्तमं
साक्षात् शाहि**अकब्बरस्य** सदसि स्तोमैर्गवामुच्चतैः ।
यैः संमीलितलोचना विदधिरे प्रत्यक्षशूरैः श्रिया
वादोन्मादभृतोद्विजातिपतयो भट्टा निशाटा इव ॥ १९ ॥

सैरभी सौरभेयी च सौरभेयश्च सैरभः ।
न हन्तव्या न च ग्राह्या बन्दिनः केऽपि कर्हिचित् ॥ २० ॥

येषामेष विशेषोक्तिविलासः शाहिनाऽमुना ।
ग्रीष्मतप्तभुवे वाब्दपयःपूरः प्रतिश्रुतः ॥ २१ ॥ युग्मम् ।

जित्वा विप्रान् पुरः शाहेः कैलास इव मूर्तिमान् ।
यैरुदीच्यां यशःस्तम्भः स्वो निचख्ने सुधोज्ज्वलः ॥ २२ ॥

इतश्च-

उच्चैरुच्छलिताभिरूर्मिततिभिर्वारांनिधे बन्धुरे
श्री**गन्धार**पुरे पुरन्दरपुरप्रख्ये श्रिया सुन्दरे ।
श्रीश्रीमालिकूले शशाङ्कविमले पुण्यात्मनामग्रणी-
रासीदाल्हणसी परीक्षकमणिर्नित्यास्पदं सम्पदाम् ॥ २३ ॥

आसीदेल्हणसीति तस्य तनुजो जज्ञे धनस्तत्सुत-
स्तस्योदारमनाः सनामुहलसी संज्ञोऽभवन्नन्दनः ।
तस्याभूत्समराभिधश्च तनयस्तस्यापि पुत्रोऽर्जुन-
स्तस्यासीत्तनयो नयोर्जितमतिर्भीमाभिधानः सुधी ॥ २४ ॥

लालूरित्यजनिष्ट तस्य गृहिणी पद्मेव पद्मापते-
रिभ्योऽभूत्तनयोऽनयोश्च जसिआसंज्ञः सुपर्वप्रियः ।
पौलोमीसुरराजयोरिव जयः पित्रोर्मनःप्रीतिकृद्
विष्णोः सिंधुसुतेव तस्य जसमादेवीति भार्याऽभवत् ॥ २५ ॥

सद्धर्मं सृजतोस्तयोः प्रतिदिनं पुत्रावभूतामुभा-
वस्त्येको वजिआभिधः सदभिधोऽन्यो राजिआह्वःसुधीः ।

पित्रोः प्रेमपरायणौ सुमनसां वृन्देषु वृन्दारकौ
शर्व्वाणीस्मरवैरिणोरिव महासेनैकदन्ताविमौ ॥ २६ ॥

आद्यस्य विमलादेवी देवीव शुभगाकृतिः ।
परस्य कमलदेवी कमलेव मनोहरा ॥ २७ ॥

इत्यभूतामुभे भार्य्ये द्वयोर्बान्धवयोस्तयोः ।
ज्यायसो मेघजीत्यासीसूनुः कामो हरेरिव ॥ २८ ॥ युग्मम् ।

सुस्निग्धौ मघुमन्मथाविव मिथो दस्त्राविव प्रोलस-
द्रूपो ख्यातिभृतौ धनाधिपसतीनाथाविव प्रत्यहम् ।
अन्येद्युर्वृहदिभ्यसभ्यसुभगं श्रीस्तम्भतीर्थं परं
प्राप्तौ पुण्यपरम्पराप्रणयिनौ तौ द्वावपि भ्रातरौ ॥ २९ ॥

तत्र तौ धर्म्मकर्म्माणि कुर्व्वाणौ स्वभुजार्ज्जिताम् ।
श्रियं फलवतीं कृत्वा प्रसिद्धिं प्रापतुः पराम् ॥ ३० ॥

काबिल्लदिक्पतिर**कब्बर**सार्व्वभौमः
स्वामी पुनः परतकालनृपः पयोधेः ।
कामं तयोरपि पुरः प्रथिताविमौस्त-
स्तत्तद्दिशोरसद्दशोरनयोः प्रसिद्धिः ॥ ३१ ॥

तेषां च **हीरविजय**व्रतिसिन्धुराणां
तेषां पुनर्विजयसेनमुनीश्वराणाम् ।
वाग्भिर्मुधाकृतसुधाभिरिमौ सहोदरौ
द्राग् द्वावपि प्रमुदितौ सुकृते बभुवतुः ॥ ३२ ॥

श्रीपार्श्वनाथस्य च वर्द्धमान
प्रभोः प्रतिष्ठां जगतामभीष्टाम् ।
घनैर्धनैः कारयतः स्म बन्धू तौ
वार्द्धिपाथोब्धिकलामितेऽद्बे [१६४४] ॥ ३३ ॥

श्रीविजयसेनसूरिर्निर्म्ममे निर्म्ममेश्वरः ।
इमां प्रतिष्ठां श्रीसङ्घकैरवाकरकौमुदीम् ॥ ३४ ॥

चिन्तामणेरिवात्यर्थं चिन्तितार्थविधायिनः ।
नामास्य पार्श्वनाथस्य श्रीचिन्तामणिरित्यभूत् ॥ ३५ ॥

अङ्गुलैरेकचत्वारिंशता चिन्तामणेः प्रभोः ।
संमिता शोभते मूर्त्तिरेषा शेषाहिसेविता ॥ ३६ ॥

सदैव विध्यापयितुं प्रचण्ड-
भयप्रदीप्रानिव सप्तसर्प्पान् ।
योऽवस्थितः सप्त फणान् दधानो
विभाति चिन्तामणिपार्श्वनाथः ॥ ३७ ॥

लोकेषु सप्तस्वपि सुप्रकाशं
किं दीप्रदीपा युगपद्विधातुम् ।
रेजुः फणाः सप्त यदीयमूर्ध्नि
मणित्विषा ध्वस्ततमःसमूहाः ॥ ३८ ॥

सहोदराभ्यां सुकृतादराभ्या-
माभ्यामिदं दत्तबहुप्रमोदम् ।
व्यधायि चिन्तामणिपार्श्वचैत्य-
मपत्यमुर्व्वीधरभित्सभायाः ॥ ३९ ॥

निकामं कामितं कामं दत्ते कल्पलतेव यत्
चैत्यं कामदनामैतत् सुचिरं श्रियमश्नुताम् ॥ ४० ॥

उत्तम्भा द्वादश स्तम्भा भान्ति यत्रार्हतो गृहे ।
प्रभूपास्त्यै किमऽभ्येयुः स्तम्भरूपपभृतोंशवः ॥ ४१ ॥

यत्र प्रदत्तदृक्शैत्ये चैत्ये द्वाराणि भान्ति षट् ।
षण्णां प्राणभृतां रक्षार्थिनां मार्गा इवागतेः ॥ ४२ ॥

शोभन्ते देवकुलिकाः सप्तचैत्येऽत्र शोभनाः ।
सप्तर्षीणां प्रभुपास्त्यै सद्विमाना इवेयुषाम् ॥ ४३ ॥

द्वौ द्वारपालौ यत्रौच्चैः शोभेते जिनवेश्मनि ।
सौधर्म्मेशानयोः पार्श्वसेवार्थं किमितौ पती ॥ ४४ ॥

पञ्चविंशतिरुत्तङ्गा भान्ति मङ्गलमूर्त्तयः ।
प्रभुपार्श्वे स्थिताः पञ्चव्रतानां भावाना इव ॥ ४५ ॥

भृशं भूमिगृहं भाति यत्र चैत्ये महत्तरम् ।
किं चैत्यश्रीदिदृक्षार्थमितं भवनमासुरम् ॥ ४६ ॥

यत्र भूमिगृहे भाति सौपानी पञ्चविंशतिः ।
मार्गालिरिव दुरितक्रियातिक्रान्तिहेतवे ॥ ४७ ॥

संमुखो भाति सोपानोत्तारद्वारिद्विपाननः ।
अन्तःप्रविशतां विघ्नविध्वंसाय किमीय[यि]वान् ॥ ४८ ॥

यद्भाति दशहस्तोच्चं चतुरस्रं महीगृहम् ।
दशदिक्सम्पदां स्वैरोपवेशायेव मण्डपः ॥ ४९ ॥

षड्विंशतिर्विबुधवृन्दवितीर्णहर्षा
राजन्ति देवकुलिका इह भूमिधाम्नि ।
आद्यद्वितीयदिवनाथरवीन्दुदेव्यः
श्रीवाग्युताः प्रभुनमस्कृतये किमेताः ॥ ५० ॥

द्वाराणि सुप्रपञ्चानि पञ्च भान्तीह भूगृहे ।
जिघत्सवोऽंहोहरिणान् धर्म्मसिंहमुखा इव ॥ ५१ ॥

द्वौ द्वास्थौ द्वारदेशस्थौ राजतो भूमिधामनि ।
मूर्त्तिमन्तौ चमरेन्द्रधरणेन्द्राविव स्थितौ ॥ ५२ ॥

चत्वारश्चमरधरा राजन्ते यत्र भूगृहे ।
प्रभुपार्श्वे समायाता धर्म्मास्त्यागादयः किमु ॥ ५३ ॥

भाति भूमिगृहे मूलगर्भागारेऽतिसुन्दरे ।
मूर्त्तिरादिप्रभोः सप्तत्रिंशदंगुलसंमिता ॥ ५४ ॥

श्रीवीरस्य त्रयस्त्रिंशदङ्गुला मूर्त्तिरुत्तमा ।
श्रीशान्तेश्च सप्तविंशत्यङ्गुला भाति भूगृहे ॥ ५५ ॥

यत्रोद्धता धराधाम्नि शोभन्ते दश दन्तिनः ।
युगपज्जिनसेवायै दिशामीशा इवाययुः ॥ ५६ ॥

यत्र भूमिगृहे भान्ति स्पष्टमष्ट मृगारयः ।
भक्तिभाजामष्टकर्म्मगजान् हन्तुमिवोत्सुकाः ॥ ५७ ॥

श्रीस्तम्भतीर्थपूर्भूमिभामिनीभालभूषणम् ।
चैत्यं चिन्तामणेर्वीक्ष्य विस्मयः कस्य नाभवत् ॥ ५८ ॥

एतौ नितांतमतनु तनुतः' प्रकाशं
यावत् स्वयं सुमनसां पथि पुष्पदन्तौ ।
श्रीस्तम्भतीर्थधरणीरमणीललामं
तावच्चिरं जयति चैत्यमिदं मनोज्ञम् ॥ ५९ ॥

श्रीलाभविजयपण्डितालिकैः समशोधि बुद्धिधनधुर्यैः ।
लिखिता च कीर्त्तिविजयाभिधेन गुरुबान्धवेन मुदा ॥ ६० ॥

वर्ण्णिनीव गुणाकीर्ण्णा सदलङ्कृतिवृत्तिभाग् ।
एषा प्रशस्तिरुत्कीर्णा श्रीधरेण सुशिल्पिना ॥ ६१ ॥

श्रीकमलविजयकोविदशिशुना विबुधेन हेमविजयेन।
रचिता प्रशस्तिरेषा कनीव सदलङ्कृतिर्जयति ॥ ६२ ॥

इति श्रीपरीक्षक प्रधान प० वजिआ प० राजिआनामसहोदरनिर्म्मापित-श्रीचिन्तामणिपार्श्वजिनपुङ्गवप्रासादप्रशस्तिः सम्पूर्णा । भद्रंभूयात् ॥

ओं नमः । श्रीमद्विक्रमातीत संवत् १६४४ वर्षे प्रवर्त्तमानशाके १५०९ गंधारीय प० जसिआ तद्भार्या बाई जसमादे सम्प्रति श्रीस्तम्भतीर्थवास्तव्य तत्पुत्र

प० वजिआ प० राजिआभ्यां वृद्धभ्रातृभार्याविमलादे लघुभ्रातृभार्याकमलादे वृद्धभ्रातृपुत्रमेघजी तद्भार्यामयगलदेप्रमुखनिजपरिवारयुताभ्यां श्रीचिन्तामणिपार्श्वनाथ श्रीमहावीर प्रतिष्ठा कारिता । श्रीचिन्तामणिपार्श्वचैत्यं च कारितं । कृता च प्रतिष्ठा सकलमण्डलाखण्डलाशाहिश्रीअकब्बरसन्मानित **श्रीहीरविजय**सूरी-शपट्टालङ्कारहारसदृशैः शाहिश्रीअकब्बरपर्षदि प्राप्तवर्णवादैः श्रीविजयसेनसूरिभिः ॥

આ લેખના એકંદર ૬૨ પદ્યો છે. તેમાં પ્રારંભના બે પદ્યોમાં ક્રમથી પાર્શ્વનાથ અને મહાવીર દેવની સ્તુતિ કરવામાં આવી છે. ૩જા કાવ્યમાં ભગવાન્ શ્રીમહાવીરદેવના સુધર્મ ગણધર, જેમની શિષ્ય સંતતિએ આ કાળમાં જૈન ધર્મનું સંરક્ષણ કર્યું છે તેમની પ્રશંસા છે. ૪ થા શ્લોકમાં સંવત્ ૧૨૮૫માં તપાબિરૂદ પ્રાપ્ત કરનાર જગચ્ચંદ્રસૂરિનો ઉલ્લેખ છે. એ જગચ્ચંદ્રસૂરિની કેટલીક પેઢીએ હેમવિમલસૂરિ થયા અને તેમના શિષ્ય આનંદવિમલસૂરિ થયા. (૫) પોતાના સમયમાં સાધુસમુદાયને પોતાના આચારમાં શિથિલ થએલો જોઈ, સંવત્ ૧૫૮૨માં તેમણે ક્રિયોદ્ધાર કર્યો. (૬) અને તેમના પટ્ટધર વિમલસૂરિના શિષ્ય **વિજયદાનસૂરિ** થયા (૭) અને તેમના પટ્ટધર આચાર્ય સુપ્રસિદ્ધ **શ્રીહીરવિજયસૂરિ** થયા. (૮) પછીના ૫ શ્લોકોમાં **હીરવિજયસૂરિ**ના પુણ્યા-વદાતોનું સંક્ષિપ્ત સૂચન કરેલું છે, તે આ પ્રમાણેઃ- સંવત્ ૧૬૩૯માં તેમને **અકબર બાદશાહે** ફત્તેપુર (શિકરી)માં આદરપૂર્વક બોલાવ્યા હતા. બાદશાહે તેમના કથનથી પોતાના સમગ્ર દેશોમાં છ માસ સુધી જીવહિંસા થતી અટકાવી હતી. વળી તેણે પોતાના રાજ્યાં જે ‘જીજીઆ વેરો’ લેવામાં આવતો હતો તેમજ મરેલા મનુષ્યોની સંપત્તિ સરકારમાં જમા કરવામાં આવી હતી તે, એ આચાર્યના ઉપદેશથી બંધ કરાવી હતી. શત્રુંજય નામનું જૈનોનું પવિત્ર સ્થળ બાદશાહે જૈનસમાજનેસ્વાધીન કર્યું હતું અને તેની યાત્રા કરનાર યાત્રી પાસેથી જે ‘મુંડકા વેરો’ લેવાતો હતો તે બંધ કરવામાં આવ્યો હતો. મેઘજી નામના એક લુંકા મતનો પ્રસિદ્ધ અને આગેવાન સાધુ, પોતાના અનુયાયી એવા કેટલાક બીજા સાધુઓ સાથે, સ્વમતનો આગ્રહ છોડી **હીરવિજયસૂરિ**નો શિષ્ય થયો હતો. ૧૪માં પદ્યથી તે ૨૨માં સુધીમાં એ **હીરવિજયસૂરિ**ના મુખ્ય શિષ્ય આચાર્ય **વિજયસેનસૂરિ**ના ગુણોનું સંક્ષિપ્ત વર્ણન આપવામાં આવ્યું છે. **હીરવિજયસૂરિ**ની માફક એમને પણ **અકબર બાદશાહે** ઘણા આદરપૂર્વક પોતાની પાસે લાહોર મૂકામે મુલાકાત લેવા બોલાવ્યા હતા. ત્યાં બાદશાહની સભામાંજ કેટલાક બીજા

વિદ્વાનો સાથે એમણે શાસ્ત્રચર્ચા કરી હતી અને તેમાં એમને 'વિજય' મળ્યો હતો. **હીરવિજયસૂરિ**ના કથનથી જેવી રીતે બાદશાહે પોતાના સામ્રાંજ્યમાં છ મહિના સુધી જીવહિંસા થતી બંધ કરી હતી તેવીજ રીતે એમના કથનથી પણ તેણે પુનઃ કર્યું હતું. વિશેષમાં તેણે આ વખતે ગાય, ભેંસ, બળદ, અને પાડાને મારવાનો, સર્વથા અને સદાને માટે પ્રતિબંધ કર્યો હતો.

અહિંથી પછી, લેખના મુખ્ય નાયક જે પરખ **વજીઆ રાજીઆ** છે તેમની હકીકત શુરૂ થાય છે.

**ગન્ધારપુર**માં, પૂર્વે શ્રીમાલી વંશના પરીક્ષક કુટુંબનો **આંલ્હણસી** નામે એક પ્રસિદ્ધ અને પુણ્યવાન્ ગૃહસ્થ થઇ ગયો. (૨૩) તેનો પુત્ર **દેલ્હણસી**, તેનો **મુહલસી**, તેનો **સમરા**, તેનો **અર્જુન** અને તેનો **ભીમ** નામે પુત્ર થયો. (૨૫) ભીમને **લાલૂ** નામની ગૃહિણીથી **જસીઆ** નામે સર્વજનપ્રિય પુત્ર થયો, અને તેની સાક્ષાત્ લક્ષ્મી જેવી **જસમાદેવી** નામે પત્ની થઇ. (૨૪) એ પુણ્યશાલી દમ્પતીને વજીઆ અને રાજીઆ નામે બે પિતૃવત્સલ અને સજ્જનમાન્ય શ્રેષ્ઠ પુત્રો થયા. (૨૬) વજીઆને વિમલાદેવી નામે અને રાજીઆને કમલાદેવી નામે પતિભક્ત પત્ની હતી. (૨૭) તેમાં મોટા ભાઇને એક મેઘજી નામે સુપુત્ર થયો. (૨૮) પાછળથી વજીઆ અને રાજીઆ બંને પ્રેમપરાયણ ભાઇઓ પોતાની જન્મભૂમિ ગંધાર છોડી ખંભાતમાં આવી રહ્યા. (૨૯) ત્યાં બંને ભાઇઓએ પોતાના હાથે ઉપાર્જ્જન કરેલી અઢળક લક્ષ્મીનો સદ્માર્ગે વ્યય કરી ખૂબ યશ મેળવ્યું. (૩૦) તેમની કીર્તિ સર્વત્ર ખૂબ પ્રસરી અને તે તરફ સાર્વભૌમ બાદશાહ અકબરના અને આ તરફ પોર્તુગાલના ગર્વનરના દરબારમાં તેમણે મળતું હતું. (૩૧) તે બંને ભાઇઓ, આચાર્ય હીરવિજયસૂરિ અને વિજયસેનસૂરિના પરમ ભક્ત હતા અને તેમના ઉપદેશાનુસાર નિરંતર ધર્મકાર્યમાં આગેવાની ભર્યો ભાગ લેતા હતા. (૩૨) આ બંને બંધુઓએ સંવત્ ૧૬૪૪માં વિપુલ ધન ખર્ચી પાર્શ્વનાથ અને વર્દ્ધમાન એમ બે તીર્થંકરોની પ્રતિમાઓની ઘણા આડંબર અને ઠાઠપૂર્વક વિજયસેનસૂરિના હાથે પ્રતિષ્ઠા કરાવી. (૩૩-૩૪) તેમાં પાર્શ્વનાથની પ્રતિમાને 'ચિન્તામણિ પાર્શ્વનાથ' નામે સ્થાપના કરી. (૩૫) એ પ્રતિમા ૪૧ આંગળ ઉંચી અને શેષનાગથી સેવિત હતી. (૩૬) તેમજ મસ્તક ઉપર સર્પની સાત ફણાએ કોતરેલી હતી. (૩૭-૩૮)

આ પછી, ૨૧ શ્લોકોમાં, આ બંને ભાઈઓએ કરાવેલા ચિંતામણિ પાર્શ્વનાથ નામના મંદિરનું, કે જેમાં ઉપર્યુક્ત પ્રતિમાઓ સ્થાપના કરવામાં આવી હતી તેનું, વર્ણન આપવામાં આવ્યું છે. તે આ પ્રમાણે :-

એ મંદિરમાં બાર સ્તંભો હતા, અને છ દ્વારો હતાં. સાત ન્હાની ન્હાની દેવકુલિકાઓ હતી અને બે દ્વારપાલોની મૂર્તિઓ હતી. મૂલપ્રતિમાની આસપાસ બીજી પંચવીસ ઉત્તમ મૂર્તિઓ સ્થાપન કરવામાં આવી હતી. એ મંદિરમાં વળી, એક ભવ્ય ભૂમિગૃહ (ભોંયરૂં) હતું જેને ૨૫ પગથિઆં હતાં. એ સોપાનની સામેજ સુંદરાકૃતિવાળા ગણેશની મૂર્તિ બેસાડેલી હતી. એ ભૂમિગૃહ સમચતુરસ્ર (ચોરસ) હતું અને દશ હાથ જેટલું ઉંચું હતું. એની અંદર બીજી ન્હાની ન્હાની ૨૬ દેવકુલિકાઓ હતી અને પાંચ એનાં દ્વાર હતાં. એ ભૂમિગૃહના પણ બે દ્વારપાલો હતા, તેમજ ચાર ચામરધારકો હતા. એની વેદિકા ઉપર ૩૭ આંગળ પ્રમાણ આદિનાથની, ૩૩ આંગળ પ્રમાણ મહાવીરદેવની અને ૨૭ આંગળ પ્રમાણ શાંતિનાથની પ્રતિમા સ્થાપિત કરવામાં આવી હતી. વળી એ ભૂમિગૃહમાં ૧૦ હાથિઓ અને ૮ સિંહો કોતરેલા હતા. આવી રીતે સ્થંભતીર્થ (ખંભાત) માં ભૂષણ સમાન અને જોવાલાયક એ મંદિર ઉક્ત બંને ભાઈઓએ બંધાવ્યું હતું. (૩૯-૫૯)

છેવટના ત્રણ શ્લોકોમાં, આ પ્રશસ્તિ બનાવનાર વિગેરેનો ઉલ્લેખ કરવામાં આવ્યો છે.-કમલવિજય કોવિદના શિષ્ય હેમવિજય* કવિએ આ પ્રશસ્તિની રચના કરી હતી અને લાભવિજય[1] પંડિતે એનું સંશોધન કર્યું હતું. કીર્તિવિજય[2] નામના તેમના ગુરૂબંધુએ શિલા ઉપર લખી આપી હતી અને શ્રીધર નામના શિલ્પિએ (સલાટે) તેને કોતરી કાઢી હતી.

છેવટે જે ગદ્યભાગ છે તેમાં પણ ટુંકાણમાં આ આખા લેખની મુખ્ય હકીકત પુનઃ આપી દેવામાં આવી છે.

---

* 'વિજયપ્રશસ્તિ' નામના કાવ્યની રચના કરનાર આજ હેમવિજય કવિ છે. કીર્તિકલ્લોલિની આદિ બીજી પણ અનેક કૃતિઓ એમની કરેલી છે. જુઓ વિજય પ્રશસ્તિ કાવ્યની પ્રશસ્તિ શ્લો. ૪૭-૫૭.

૧ આ લાભવિજય તે ઘણું કરીને સુપ્રસિદ્ધ તાર્કિક મહોપાધ્યાય યશોવિજયજીના ગુરૂના ગુરૂ જે લાભવિજય છે તેજ હોવા સંભવે છે.

૨ કીર્તિવિજય પણ મહોપાધ્યાય વિનયવિજયજીના જે ગુરૂ થયા છે તેજ આ હોય તેમ સંભવે છે.

આ પ્રશસ્તિમાં આપેલું વર્ણન વિજયપ્રશસ્તિ કાવ્યના ૧૧મા સર્ગમાં પણ અક્ષરેઅક્ષર આપેલું છે. એટલુંજ નહિં પરંતુ આમાંના ૩૭, ૩૮, ૩૯ અને ૫૯ નંબરનાં પદ્યો તો, થોડા શબ્દોના ફેરફાર સાથે, જેમના તેમજ એ કાવ્યના ઉક્ત સર્ગમાં મળી આવે છે. ત્યાં એમની સંખ્યા ક્રમથી ૪૯, ૫૦, ૫૩ અને ૬૯ ની છે. આમ હોવાનું કારણ સ્પષ્ટજ છે કે આ 'પ્રશસ્તિ' અને તે કાવ્યના કર્તા એકજ હોવાથી સ્વાભાવિક રીતેજ પ્રશસ્તિનાં પદ્યો કાવ્યમાં લઈ શકાય છે.

## कावी

(४५१)

॥ ई० ॥ ॐ नमः। पातिशाहिश्री६ अकब्बरजलालदीनप्रदत्तबहुमान-जगद्गुरुश्रीश्रीश्रीश्रीश्रीश्रीश्री**हीरविजय**सूरीश्वरपादानां पट्टप्रभावकेभ्यो भट्टारकश्री५-श्रीविजयसेनसूरिगुरुभ्यो नमः ।

श्रेयस्संततिसिद्धिकारिचरितं सर्वेऽपि यं योगिनो
ध्यायन्ति स्थिरताप्रपन्नमनसो विद्यान्तरासंक्रमात् ।
श्रीमन्नाभिनरेन्द्रसूनुरमरश्रेणीसमासेवितो
देयान्निर्भिभक्तियुक्तमनसां मुख्यानि सौख्यानि सः ॥ १ ॥

श्रीवर्द्धमानस्य बभूव पूर्वं पूर्वादिकृत्पट्टधरः सुधर्मा ।
गतोऽपि सिद्धं तनुते जनानां सहायकं यः प्रतिधर्ममार्गम् ॥ २ ॥

ततोऽपि पट्टे नवमे बभूवुः श्रीसूरयः सुस्थितनामधेयाः ।
येभ्यः क्रियाज्ञानुगणाकरेभ्यो गच्छोऽभवत् कोटिकनामतोऽयम्
॥ ३ ॥

ततो ये वज्रशाखायां कुले चान्द्रेऽत्र सूरयः ।
तेषां प्रभावं प्रत्येकं वक्तुं शक्नोति कः सुधीः ॥ ४ ॥

पट्टे युगाब्धिप्रमिते क्रमेणाभवन् जगच्चंद्रगणाधिपास्ते ।
येषां सदाचाम्लतपोविधानात् तपा इति प्राग् बिरुदं तदाभूत् ॥ ५ ॥

तेषां वंशे क्रमतस्तपःक्रियाज्ञानशुद्धिपरिकलितः ।
रसबाणमिते पट्टे संजातः सुविहितोत्तंसः ॥ ६ ॥

आनन्दविमलसूरिः श्रुतोऽपि चित्ते करोति मुदमतुलाम् ।
कुमतांधकूपमग्नं स्वबलाज्जगदुद्धृतं येन ॥ ७॥

तत्पट्टे महिमभरख्याताः श्रीविजयदानसूरीशाः ।
येभ्यः समस्तविधिना प्रससार तपागणः सम्यक् ॥ ८ ॥

तेषां पट्टे प्रकटाः शांतरसापूर्णहृदयकासाराः ।
**श्रीहीरविजय**गुरवः प्रभवोऽभुवंस्तपागच्छे ॥ ९ ॥

साहिश्रीमदकब्बरस्य हृदयोर्व्यां यः पुरा रोपितः
संसिक्तोऽपि च यैर्वचोऽमृतरसैः कारुण्यकल्पद्रुमः ।
दत्तेऽद्यापि फलान्यमारिपटहोद्घोषादिकानि स्फुटं
श्रीशत्रुंजयतीर्थमुक्तकरतासन्मानमुख्यानि च ॥ १० ॥

तेषां पट्टे प्रकटनहंसाः श्रीविजयसेनसूरिवराः ।
संप्रति जयन्ति वाचकबुधमुनिगणग्रन्थपरिकरिताः ॥ ११ ॥

तर्कव्यारकरणादिशास्त्रनिबिडाभ्यासेन गर्वोद्धुरा
ये कुर्च्चालसरस्वतीतिबिरुदं स्वस्मिन्वहंतेऽनिशम् ।
वाचोयुक्तिभिरेव यैः स्फुटतरं सर्वेऽपि ते वादिनः
साहिश्रीमदकब्बरस्य पुरतो वादे जिताः स्वोजसा ॥ १२ ॥

तेषां चरणसरोरुहमकरंदास्वादलालसः सततम् ।
संघो जयतु चतुर्धा भूयांसि महांसि कुर्वाणः ॥ १३ ॥

इतश्च-
गूर्जरमंडलमंडनमभयं वडनगरमस्ति तत्रासीत् ।
नागरलघुशाखायां भद्रसिआणाभिधे गोत्रे ॥ १४ ॥

गांधिदेपाल इति प्रसिद्धनामा सुधर्मकर्मरतः ।
तत्सुत अलुआह्वानस्तस्य सुतो लाडिकाभिधया ॥ १५ ॥

पत्नीति धर्मपत्नी शीलालंकारधारिणी तस्य ।
तत्कुक्षिभुवौ बाढुक-गंगाधरनामकौ तनयौ ॥ १६ ॥

तत्रापि बाढुआख्यः सुभाग्यसौभाग्यदानयुतः ।
धैर्योदार्यसमेतो जातो व्यवहारिगणमुख्यः ॥ १७ ॥

आद्यस्य पोपटीति च हीरादेवी द्वितीयका भार्या ।
ताभ्यां वराननाभ्यां सुतास्त्रयः सुषुविरे सुगुणाः ॥ १८ ॥

आद्यसुतः कुंवरजीति नामा सुपात्रदानेषु रतो विशेषात् ।
मार्गप्रवृत्तेर्गुणसंग्रहाच्च पितुर्यशो वर्द्धयति प्रकामं ॥ १९ ॥

जातौ परस्यामथ धर्मदासः सुवीरदासश्च सुतौ वरेण्यौ ।
अथान्यदार्थार्जनहेतवेऽसौ स्थानान्तरान्वेषणमानसोऽभूत् ॥ २० ॥

श्रीस्तंभनाधीशजिनेशपार्श्वप्रसादसंपादितसर्वसौख्यम् ।
त्रंबावतीति प्रति नामधेयं श्रीस्तंभतीर्थं नगरं प्रसिद्धम् ॥ २१ ॥

स बाहुआख्यः स्वसुखाय तत्र वसन्ननेकैः सह बन्धुवर्गैः ।
सन्मानसंतानधनैर्यशोभिर्दिने दिने वृद्धिमुपैति सम्यक् ॥ २२ ॥

श्री**हीरसूरे**रुपदेशलेशं निशम्य तत्त्वावगमेन सद्यः ।
मिथ्यामतिं यः परिहाय पूर्वं जिनेन्द्रधर्मे दृढवासनोऽभूत् ॥ २३ ॥

पूर्वार्जितप्रबलपुण्यवशेन तस्य
सन्न्यायमार्गसुकृतानुगतः प्रवृत्तेः ।
पापप्रयोगविरतस्य गृहे समस्ता
भेजुः स्थिरत्वमचिरादपि संपदो यः ॥ २४ ॥

सधर्म्मसाधर्मिकपोषणेन मुमुक्षुवर्गस्य च तोषणेन ।
दीनादिदानैः स्वजनादिमानैः स्वसंपदस्ताः सफलीकरोति ॥ २५ ॥

इतश्च-

शत्रुंजयख्यातिमथो दधानं कावीति तीर्थं जगति प्रसिद्धम् ।
काष्ठेष्टकामृन्मयमत्र चैत्यं दृष्ट्वा विशीर्णं मनसेति दध्यौ ॥ २६॥

दृढं भवेच्चैत्यमिदं यदीह कृतार्थतोमेति ममापि लक्ष्मीः ।
अर्हद्वचोवासितमानसस्य मनुष्यतायाः फलमेतदेव ॥ २७ ॥

ततः श्रद्धावता तेन भूमिशुद्धिपुरःसरम् ।
कावीतीर्थे स्वपुण्यार्थं श्रीनाभेयजिनेशितुः ॥ २८ ॥

नंदवेदरसैणांकमिते संवत्सरे (१६४९) वरे ।
स्वभुजार्जितवित्तेन प्रासादः कारितो नवः ॥ २९॥

सारसारस्वतोद्गाररंजितानेकभूधवैः ।
श्रीमद्विजयसेनाख्यसूरिराजैः प्रतिष्ठितः ॥ ३०॥

मूलस्वामी जिनपतियुगादीश्वरो यत्र भास्वत्
द्वापंचाशत्त्रिदशकुलिकासंयुतः पुण्यसत्रम् ।
उच्चैरभ्रंलिहशिखरभृत्तोरणैरंचितश्रीः
प्रासादोऽयं धरणीवलये नंदतादाशंशांकम् ॥ ३१ ॥

श्रीयुगादिजिनाधीशप्रासादेन पवित्रितः ।
ग्रामोऽपि वर्द्धतामेष सुखसंपत्तिभिश्चिरम् ॥ ३२ ॥

॥ इति प्रशस्तिः॥

આ લેખમાં ૩૨ પદ્યો છે. તેમાં પ્રથમના એક પદ્યમાં આદિનાથની સ્તુતિ કરવામાં આવી છે અને તે પછીના ૧૨ પદ્યોમાં, ઉપરના લેખ પ્રમાણેજ, પ્રતિષ્ઠાકર્તા આચાર્ય **વિજયસેનસૂરિ** પર્યંતના કેટલાક તપગચ્છના મુખ્ય મુખ્ય આચાર્યોનો ઉલ્લેખ કરેલો છે.

૧૪માં પદ્યથી મંદિર બંધાવનાર ગૃહસ્થનું વંશવર્ણન શુરૂ થાય છે. તે આ પ્રમાણે :-

ગુજરાત દેશમાં સુપ્રસિદ્ધ એવા વડનગર નામના શહેરમાં નાગર જ્ઞાતિની લઘુ શાખામાં ભદ્રસિઆણા ગોત્રવાળો એક **દેપાલ ગાંધી** કરીને ધર્મિષ્ઠ ગૃહસ્થ રહેતો હતો. તેને અલુઆ નામે પુત્ર થયો અને તેનો પુત્ર લાડિક નામે થયો. એ લાડિકને પોતાની પત્ની (?) નામે પત્નીથી બાઢુક અને ગંગાધર નામે બે પુત્રો થયા હતા. તેમાં બાઢુઆ પોતાના ધર્મ કર્મથી વ્યાપારિઓમાં મુખ્ય ગણાવા લાગ્યો હતો. તેને બે સ્ત્રિઓ હતી, તેમાં પહેલીનું નામ પોપટી અને બીજીનું નામ હીરાદેવી હતું. પોપટીને કુંઅરજી નામે એક પુત્ર થયો હતો અને હીરાદેવીને ધર્મદાસ, સુવીરદાસ એમ બે પુત્રો હતા. પોતાના આ બધા સ્વજન... બંધુવર્ગ સાથે સાથે બાઢુઆ ગાંધી વડનગરથી નિકળી વ્યાપારાર્થે ત્રંબાવતી કે જે સ્તંભતીર્થના નામે પ્રસિદ્ધ છે તેમાં, (ખંભાતમાં) આવીને વસ્યો હતો. ત્યાં એને વ્યાપારમાં પુષ્કળ ધનપ્રાપ્તિ થઇ હતી અને લોકોમાં સન્માન પણ બહુ વધ્યું હતું. આવી રીતે તે સન્માન, સંતાન, ધન અને યશથી દિન પ્રતિદિન અધિક ઉન્નત થતો જતો હતો. તેવા પ્રસંગે તેણે આચાર્યશ્રી **હીરવિજયસૂરિ**નો ધર્મોપદેશ સાંભળી જૈન ધર્મનો સ્વીકાર કર્યો હતો અને પૂર્વનો પોતાનો મિથ્યામત છોડી દીધો હતો. આવી રીતે તે પરમ શ્રાવક થયો, અને સાધર્મિક ભાઇઓને તેમજ મુમુક્ષુ વર્ગને દાન આપી, સ્વજનોને સન્માન આપી અને દીનજનોના દુઃખો દૂર કરી, પોતાની સંપત્તિમે સફળ કરતો હતો.

શત્રુંજય તીર્થની સ્થાપના રૂપે પ્રસિદ્ધ એવા કાવી નામના તીર્થના ચૈત્ય (મંદિર) ને લાકડા અને ઇંટથી બનેલું જોઇ તે બાઢુંઆ ગાંધિએ એક વખતે મનમાં વિચાર કર્યો કે જો આ મંદિરને પાકું બંધાવી સદાના માટે દૃઢ (મજબૂત) બનાવવામાં આવે તો મહાન પુણ્યની સાથે મ્હારી લક્ષ્મી પણ સફળ થાય. આ વિચારથી પ્રેરાઇ તેણે સંવત્ ૧૬૪૯માં આખું મંદિર નવું તૈયાર કરાવ્યું, અને પછી વિજયસેનસૂરિના હાથે તેની પ્રતિષ્ઠા કરાવી.

છેવટના બે પદ્યોમાં, આ પર દેવકુલિકાયુક્ત પુણ્યના સત્રરૂપ યુગાદિ જિનના મંદિરનું સ્થાયિત્વ કચ્છી આશીર્વાદ આપવામાં આવ્યો છે, અને લેખ સમાપ્ત કરવામાં આવ્યો છે.

# वैराटनगरस्थजिनालयप्रशस्तिः ।

(१) ॥ ई० ॥ श्रीहीरविजयसूरीश्वरगुरुभ्यो नमः ॥ स्वस्ति श्रीमन्नृ.................]

(२) ...शाके १५०१ प्रवर्तमाने फाल्गुनशुक्ल द्वितीयायां र[वौ.......................

(३) ... अखिल प्रतिपक्षक्ष्मापालचक्रवालतमोजालरुचिरतरचरणकम[ल]...........

(४) ...प्रसरतिलकितनम्रीभूतभूपालभालप्रबलबलप्राक्रमकृतचतुर्द्दिग्[विजय].....

(५) ...न्यायैकधुराधरण धुरीण दुरपासनमदिरादिव्यसननिराकरण प्रवीण..............

(६) ण गोचरीकृतप्राक्तननलनरेंद्ररामचंद्रयुधिष्ठिरविक्रमादित्यप्रभृतिमहीमहें[द्र]....

(७) कीर्तिकौमुदीनिस्तंद्रचंद्र**श्रीहीरविजयसूरि**द्विंचंद्रचारुचातुरी चंचुरचतुरनरानिर्वच-[नी].......................................................................................

(८) न प्रोद्भूतप्रभूततरदयार्द्रतापरिणतिप्रणीतात्मीयसमग्रदेशप्रतिवर्षपर्युषणापर्व.........

(९) जन्ममास ४० रविवासर ४८ संबंधिषडधिकशतदिनावधिसर्वजन्तुजाता-भयदानफुर[मान].......................................................................

(१०) बली वर्ण्यमानप्रधानपीयूष........देदीप्यमान विशदतमनिरपवादयशोवाद ध र्मकृत्य.......................................................................................

(११) श्री अकब्बरविजयमानराज्ये अद्येह श्रीवइराटनगरे । पांडुपुत्रीयविधावदात-श्रवण.......................................................................................

(१२) म्राद्यनेकगैरिकखानिनिधानीभूतसमग्रसागरांबरे श्रीमालज्ञातीय रांक्याणगोत्रीय सं नाल्हा.......................................................................................

(१३) श्रीदेल्हीपुत्र सं० ईसर भार्या झवकू पुत्र सं० रतनपालभार्या मेदाई पुत्र सं० देवदत्त भार्या धम्मू पुत्र पातसा.................................................

(१४) टोडरमल सबहुमानप्रदत्त सुबहुग्रामस्वाधिपत्याधिकारीकृत स्वप्रजापाल-नानेकप्रकार सं० भारमल्ल भा.......................................................

(१५) इंद्रराजनाम्ना प्रथमभार्या जयवंती द्वितीय भार्या नगीनां स्वद्वितीयलघुभ्रातृ सं० चूहडमल्ल । स्वप्रथमलघुभ्रातृ सं० अज [यराज].............................

(१६) ........रीनां पुत्र सं० विमलदास द्वितीय भार्या नगीनां स्वद्वितीयलघुभ्रातृ सं० स्वामीदास भार्या.......................................................................

(१७) कां पुत्र सं० जगजीवन भार्या मोतां पुत्र सं० कचरा स्वद्वितीयपुत्र सं० चतुर्भुज प्रभृति समस्त कुटुंबयु.....................................................[व]-

(१८) इराटद्रंगस्वाधिपत्याधिकारं बिभ्रता स्वपितृनामप्रासशैलमयश्रीपार्श्वनाथ १ रीरीमयस्वनामधारितश्रीश्री-

(१९) चंद्रप्रभ २ भ्रातृअजयराजनामधारित श्रीऋषभदेव ३ प्रभृतिप्रतिमालंकृतं मूलनायकश्रीविमलनाथबिंबं

(२०) स्वश्रेयसे कारितं । बहुलतमवित्तव्ययेन कारिते श्रीइन्द्रविहारापरनाम्नि महोदयप्रासादे स्व प्रतिष्टा(ष्ठा)यां

(२१) प्रतिष्टि(ष्ठि)तं च श्रीतपागच्छे **श्रीहेमविमलसूरि**तत्पट्टलक्ष्मीकमलाक्षी-कंठस्थलालंकारहारकृतस्वगुर्वाज्ञप्ति-

(२२) सहकृतकुमार्गपारावारपतज्जंतुसमुद्धरणकर्णधाराकारसुविहितसाधुमार्गक्रियो-द्धार **श्रीआणंद-**

(२३) **विमलसूरि**पट्टप्रकृष्टतममहामुकुटमंडन चूडामणीयमान**श्रीविजयदानसूरि**-तत्पट्टपूर्वाचलतटीप-

(२४) ——–—— करणसहस्रकिरणानुकारिभिः स्वकीयवचनचातुरीचमत्कृ-तकृत**कश्मीरकामरूप-**

(२५) ——–——[स्ता]**नकाबिलबदकसाढिल्लीमरूस्थलीगुर्जरत्रामालव-मंडल**प्रभृतिकानेकजनपद-

(२६). ...आचरणनैकमंडलाधिपतिचतुर्दशच्छत्रपतिसंसेव्यमानचरण**हमाउनंदनज-**लालु-

(२७) दीनपातसाहि**श्रीअकब्बरसुरत्राण**प्रदत्तपूर्वोपवर्णितामारिफुरमानपुस्तकभांडा-गारप्रदानबंदि.........

(२८) .........दिबहुमानसर्वदोपगीयमानसर्वत्रप्रख्यातजगद्गुरुबिरुदधारिभिः । प्रशांततानिःस्पृहता-

(२९) —— तासंविज्ञतायुगप्रधानताद्येनकगुणगणानुकृतप्राक्तन**वज्रस्वाम्या**दि-सूरिभिः सुवि

(३०) [हितसिरोम]णिसुगृहीतनामधेय भट्टारकपुरंदरपरमगुरुगच्छाधिराज श्री श्री श्री श्री श्री श्री श्री श्री

(३१) श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री [ **हीरविज** ]**य-सूरिभिः** स्वशिष्यसौभाग्यभाग्यवैराग्य-

(३२) [औदा]र्यप्रभृतिगुणग्राम....[म]...हनीयमहामणिगणरोहणक्षोणी—

(३३) [तलमंड]णगुर्वाज्ञापालनैक..........वनीकृतानेकमंडलमहाडंबरपुरस्सर—

(३४) —— प्रतिष्ठप्रतिष्ठाप्रष्ठ——————क्षीवशीकरणकार्मणप्राज्यप्रव्रज्याप्रदा-

(३५) —— कर्म्मनिर्माण — क — माणभव्य - जनमन पवित्रक्षेत्रबोधिबीजवपनप्रधान-

(३६) ————————तिरस्कृतसुधारसवाग्विलासराजमानतत्तदेशीयदर्शन-स्पृहया-

(३७) ——————— मनोरथप्रथाप्रथितकल्पलता प्रवर्द्धनसुपर्वपर्वतायमान-विबुधजन-

(३८) ——————— कीर्ति —— पुरंदर महोपाध्याय श्री५ **श्रीकल्याण-विजय**गणिपरिवृतै-

(३९) ——————— श्रीइंद्रविहारप्रासादप्रशस्तिः पं० **लाभविजयगणि**कृता लिखिता पं० **सोमकुशल [ ग० णिना ]**

(४०) भइरवपुत्र मसरफ भगतू महमवाल ।

આ લેખ ૧' ૭½" લાંબી અને ૧' ૪½" પહોળી શિલા ઉપર ૪૦ પંક્તિઓમાં કોતરાએલો છે. ભાષા સંસ્કૃત ગદ્ય છે. જમણી બાજુ તરફ પત્થરનો ઉપરનો ભાગ તુટી જવાથી તેમજ ડાબી બાજુએ નીચેનો ભાગ પણ ખરી જવાથી ઘણીક લાઇનો અપૂર્ણજ હાથ લાગી છે. તોપણ જેટલો ભાગ અક્ષત છે તેના ઉપરથી લેખનો સાર ભાગ સારી પેઠે સમજી શકાય છે.

પ્રથમ પંક્તિમાંના જતા રહેલા ભાગમાં મિતિના માટે વિક્રમ સંવત આપેલો હતો જે બીજી પંક્તિમાં શરૂઆતમાં આપેલા ૧૫૦૯ ના શક સંવત ઉપરથી, ૧૬૪૪ હોય તેમ નિશ્ચિત જણાય છે. (શકસંવત્‌માં ૧૩૫ ઉમેરવાથી વિક્રમ સંવત્ આવે છે તે હિસાબે; ૧૫૦૯+૧૩૫=૧૬૪૪; ઇ.સ. ૧૫૮૭)

ત્રીજી પંક્તિથી ૧૦મી પંક્તિ સુધી, અકબર બાદશાહ, કે જેના રાજ્યમાં આ લેખ અને એમાં વર્ણવેલું મંદિર તૈયાર થયું હતું તેની પ્રશંસા આપેલી છે.

એ પ્રશંસામાં, હીરવિજયસૂરિની મુલાકાત લઈ તેમના મનને સંતુષ્ટ કરવા માટે જીવરક્ષા સંબંધી જે ફરમાનો તેણે બહાર પાડ્યા હતા તેમનો પણ ખાસ ઉલ્લેખ કરવામાં આવ્યો. છે. નવમી પંક્તિમાં વિદ્યમાન રહેલા પાઠ ઉપરથી જણાય છે કે અકબર બાદશાહે વર્ષ ભરમાં બધા મળી ૧૦૬ દિવસ (षडधिकशतदिन) જીવહિંસા નહિં કરવા માટે ફરમાન કર્યું હતું. એ ૧૦૬ દિવસમાંથી ૪૦ દિવસ તો બાદશાહના જન્મમાસ સંબંધી હતા અને ૪૮ સાલ ભરના બધા રવિવારના દિવસો હતા. બાકી રહેલા દિવસોમાં જૈન ધર્મના પર્યુષણ પર્વના દિવસો (કે જે બીજા અનેક લેખો પ્રમાણે ૧૨ની સંખ્યાવાળા હતા) વિગેરે હતા. તેના પછી 'વઈરાટ નગર' નો ઉલ્લેખ કરવામાં આવ્યો છે. બારમી પંક્તિના પ્રારંભમાં લખ્યા પ્રમાણે એ વઈરાટ નગરમાં તાંબા અને ગેરૂ આદિની અનેક ખાણો હતી આ કથનને અબુલ-ફજલની **આઈન-એ-અકબરી**નો પણ ટેકો મળે છે. તેમાં પણ બૈરાટમાં તાંબાની અનેક ખાણો હોવાનું લખેલું છે. શ્રીયુત ભાંડારકરના લખવા પ્રમાણે 'આ ગામ તથા એની આસપાસની જગ્યાઓ હજી સુધી ધાતુના કચરાથી ઢંકાએલી છે.'

આ કથન પછી મંદિર નિર્માતાની વંશાવળી આપી છે જે ખંડિત થઈ જવાના લીધે પૂરી જાણી શકાતા નથી: પરંતુ એટલું સ્પષ્ટ જણાય છે કે તેની જ્ઞાતિ શ્રીમાલી અને ગોત્ર રાંકયાણ હતું. તેમજ તેના પૂર્વજોમાં પ્રથમ પ્રસિદ્ધ પુરૂષ સં. નાલ્હા નામે થયો. ન્હાલા પછીના એક બે નામો જતાં રહ્યાં છે જે ઘણું કરીને તેની સ્ત્રી અને પુત્રનાં હશે. ચૌદમી પંક્તિની આદિમાં એક દેલ્હી નામેની સ્ત્રીનું નામ વંચાય છે. પછીની વંશાવલી આ પ્રમાણે છે :- તેનો પુત્ર સં. ઈસર-સ્ત્રી ઝબકુ; તેમનો પુત્ર સં. રતનપાલ-સ્ત્રી મેદ્દાઈ; તેમનો પુત્ર સં. દેવદત્ત-સ્ત્રી ધમ્મૂ, તેમનો સં. ભારમલ થયો. આ ભારમલને બાદશાહે કાંઈક આપ્યું જેનો ઉલ્લેખ ૧૩મી પંક્તિના નષ્ટભાગમાં કરેલો હતો. ૧૪મી પંક્તિના પ્રમાણે જણાય છે કે ટોડરમલે તેને સારા માનપૂર્વક ઘણા ગામોનો કારભાર કરનાર એક મોટો અધિકાર બનાવ્યો હતો. તે પછી, એ સં. ભારમલનો પુત્ર ઈન્દ્રરાજ અને તેના કુટુંબનાં નામો આપ્યાં છે, જે આ પ્રમાણે છે :-

સં. ભારમલ-સ્ત્રી.........

| ઇંદ્રરાજ (સ્ત્રીયો બે-જયવંતી-દામા) | સં. અજયરાજ (સ્ત્રી...રીનાં ૨ નગીનાં) | સં.સ્વામીદાસ. સ્ત્રી......કાં. |
|---|---|---|
| સં. ચતુર્ભુજ સં. ચૂહડલમલ્લ | સં. વિમલદાસ | સં.જદજીવન, સ્ત્રી મોતાં |
| | | સં. કચરા, |

આના પછી (પં. ૧૮થી) જણાવવામાં આવે છે કે-વઈરાટ નગરનો અધિકાર ભોગવતા ઈન્દ્રરાજે પોતાના ઉક્ત કુટુંબ સાથે કલ્યાણાર્થે ઘણું ધન ખર્ચીને ઈન્દ્રવિહાર ઉર્ફ મહોદયપ્રાસાદ નામનું મંદિર બનાવ્યું, જેમાં મૂલનાયક તરીકે વિમલનાથ તીર્થંકરની પ્રતિમા સ્થાપિત કરી. એ મંદિરમાં બીજી પણ અનેક પ્રતિમાઓ સ્થાપન કરવામાં આવી. જેમાંની આ મુખ્ય હતી :- પોતાના પિતાના નામથી પાષાણમય પાર્શ્વનાથની મૂર્તિ, ખાસ પોતાના નામથી પિત્તલમય ચંદ્રપ્રભની મૂર્તિ અને ભાઈ અજયરાજના નામથી ઋષભદેવની મૂર્તિ.

આ પછી લેખમાં, પ્રતિષ્ઠા કરનાર આચાર્ય **હીરવિજયસૂરિ**નું વર્ણન આપ્યું છે, જેમાં એ આચાર્યે પોતાના જીવનમાં જે જે વિશેષ યા મહાન્ કાર્યો કર્યાં તેમનો સંક્ષિપ્ત રીતે ઉલ્લેખ કરેલો છે. એ ઉલ્લેખમાં અકબર બાદશાહ સાથેની મુલાકાતનું પણ સૂચન છે જ. ૩૧ થી તે ૩૮ સુધીની પંક્તિઓમાં, એ મહાન્ આચાર્યના શિષ્ય મહોપાધ્યાય કલ્યાણવિજયની પ્રસંશા છે કે જેમના હાથે આ પ્રતિષ્ઠા કાર્ય કરાવવામાં આવ્યું. છેવટે આ પ્રશસ્તિ બનાવનાર પં. લાભવિજય ગણિ, લખનાર પં. સોમકુશલ ગણિ અને ભઈરવ પુત્ર મસરફ ભગત્ મહવાલ (જે ઘણું કરીને કોતરનાર હશે)નું નામ આપી લેખ પૂર્ણ કરવામાં આવ્યો છે.

## मडार

संवत १६२४ वर्षे फागुण शुदि ३ रवौ वृद्धप्राग्वाटज्ञातीय श्रे० मगू भा० करमाईसुत श्रे० ठाकरएम भा० वाछीसुत सिधजी प्रमुख समस्त कुटुंबयुतेन कारितं श्रीआदिनाथबिंबं प्रतिष्ठितं श्रीमत्तपागच्छनायकश्री ५ **हीरविजयसूरी**न्द्रैश्चिरं नंदतात् ॥

સં૦ ૧૬૨૪ના ફાગણ સુદિ ૩ને રવિવારે વીશાપોરવાડજ્ઞાતીય શ્રેષ્ઠી મગૂની ભાર્યા કરમાઈના પુત્ર શ્રેષ્ઠી ઠાકરે, ભાર્યા વાછીના પુત્ર સિંઘજી વગેરે સમગ્ર કુટુંબ સાથે શ્રીઆદિનાથ ભ૦નું બિંબ ભરાવ્યું અને તેની શ્રીતપાગચ્છના નાયક **શ્રીહીરવિજયસૂરિ**એ પ્રતિષ્ઠા કરી તે ચિરકાળ સુધી જય પામો.

## सातसेणग्राम

महाराय श्रीअखयराज विजय(यि)राज्ये ॥ सं[०] १७२१ वर्षे ज्येष्ट शुदि ३ रवौ श्रीसीरोहीनगरवास्तव्य प्राग्वाटज्ञातीय वृद्धशाखीय... ... ... ....नाम्न्या श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं च तपागच्छीय भ । **श्रीहीरविजयसूरि**(भिः)। **श्रीविजयसेन**.... .... .... .... .... ....

મહારાજ શ્રીઅખયરાજના વિજયી રાજ્યમાં સં૦ ૧૭૨૧ના જેઠ સુદિ ૩ને રવિવારે શ્રીસીરોહીનગરના રહેવાસી પોરવાડજ્ઞાતીય વૃદ્ધશાખીય... શ્રીશાંતિનાથ ભ૦નું બિંબ કરાવ્યું અને તેની તપાગચ્છીય ભટ્ટારક **શ્રીહીરવિજયસૂરિ**ના ભ૦ **વિજયસેનસૂરિ**..........પ્રતિષ્ઠા કરી.

## वरमाण

श्रीशांतिः ॥ ॥ ०पेथा कारितः प्रतिः

॥ सं[०] १६१७ वर्षे, ज्ये[०] सुदि ३ श्रीतपागच्छे **श्रीविजयदानसूरि** **श्रीहीरविजयसूरि**(भिः).... ....

સં૦ ૧૬૫૭ના સુદિ ૩ના દિવસે શ્રીપેથાએ પ્રતિમા ભરાવી અને તેની તપાગચ્છીય **શ્રીવિજયદાનસૂરિ**ના શિષ્ય **શ્રીહીરવિજયસૂરિ**એ પ્રતિષ્ઠા કરી.

## कोलर

सं० का० मं०... .... ....मेहाजल[लेन] श्रीवासुपूज्यबिंबं कारित(तं) प्रतिष्टित(ष्ठितं) तपागच्छे **श्रीहीरविजयसूरि**भिः । १६३२ वर्षे ।

સં૦ કા૦ મં૦.........મેહાજલે શ્રીવાસુપૂજ્ય ભ૦નું બિંબ ભરાવ્યું અને તેની **શ્રીહીરવિજયસૂરિ**એ સં૦ ૧૬૩૨માં પ્રતિષ્ઠા કરી.

## सिरोही

संवत् १६३४ वर्षे शाके १५०१ प्रवर्तमाने हिमंतऋतौ माग्गशिर(र्ष)मासे शुक्लपक्षे पंचम्यां तिथौ महारायश्रीमहाराजाधिराजः श्रीसुरतांणजी कुंअरश्री-

राजसिंघजी विजयराज्ये **श्रीसिरोहीनगरे** श्रीचतुर्मुषप्रासाद[:] कारा-पितं(तः) ॥ श्री ॥ श्रीसंघमुष्य सं० सीपा भा० सरूपदे पुत्र सं० आसपाल सं० वीरपाल सं० सचवीरा तत्पुत्र सं० मेहाजल आंबा चांपा केसव द्दसना जसवंत जइराज॥

॥ तपागच्छे श्रीगछा(च्छा)धिराज **श्रीहीरविजयसूरि** आचार्य श्रीश्री५ विजयसेनसूरि[णा] श्रीआदिनाथश्रीचतुर्मुख(खं) प्रतिष्ठितं ॥ श्री ॥ वु० मना पुत्र वु० हंसा पुत्र शिवराज कमठा क(का)रापिंत । शुभं भवतु ॥

सुत्रधार नरसिंघ श्रीरांइण वु० हांसारोपी ।

સં૦ ૧૬૩૪ શાકે ૧૫૦૧ના હેમંતઋતુમાં માગશર માસના શુક્લ પક્ષમાં પાંચમને રોજ મહારાજ શ્રીમહારાજાધિરાજ સુરતાંણજીના કુવંર શ્રીરાજસિંઘજીના વિજયી રાજયમાં શ્રીસિરોહી નગરમાં શ્રીસંઘના મુખિયાઓમાં સં૦ સીપા, તેની ભાર્યા સરૂપપદે, તેના પુત્ર સં૦ આસપાલ, સં૦ વીરપાલ, સં૦ સચવીર, તેના પુત્ર સં૦ મેહાજલ, આંબા, ચાંપા, કેસવ, દસન, જસવંત, જઈરાજ વગેરે (શ્રીસંઘે) શ્રીચતુર્મુખપ્રાસાદ કરાવ્યો. અને તપાગચ્છના ગચ્છાધિરાજ **શ્રીહીરવિજયસૂરિ**ના શિષ્ય આચાર્ય **શ્રીવિજયસેનસૂરિ**એ શ્રીઆદિનાથ ચતુર્મુખની પ્રતિષ્ઠા કરી. વુ૦ મના, તેના પુત્ર વુ૦ હંસા, તેના પુત્ર શિવરાજ અને કમઠાએ (મૂ૦ ના૦ની પ્રતિમા) કરાવી. તેનો **સૂત્રધાર** નરસિંઘ, શ્રીરાંઈણ હતો. વુ૦ હાંસારોપી

## झांडोली

सं० १६३२ श्रीआदिनाथबिंबं संप्र...तं कारितं प्र० तपागच्छे **श्रीहीरविजयसूरिभिः** उपा० श्रीधर्मसागरगणिः प्रणमते ।

સં૦ ૧૬૩૨ના વર્ષે શ્રીઆદિનાથ ભગવાનનું બિંબ.........ભરાવ્યું અને તેની તપાગચ્છના **શ્રીહીરવિજયસૂરિ**એ પ્રતિષ્ઠા કરી. તે બિંબને ઉપાધ્યાય **શ્રીધર્મસાગરગણિ** પ્રણામ કરે છે.

## रोहिडा

सं० १६१७ वर्षे पोषवद १ श्रीवजे(विजय)**दानसूर(रि)** हीसोरवजसूर(**हीरविजयसूरि**) ॥ बा० ॥ प्रामाई श्रीशांतिनाथबिंबं ॥

સં૦ ૧૬૧૭ના પોષ વદિ ૧ના રોજ બાઈ પ્રેમાઈએ શ્રીશાંતિનાથ ભગવાનનું બિંબ ભરાવ્યું અને તેની **શ્રીવિજયદાનસૂરિજી**ના શિષ્ય **શ્રીહીરવિજયસૂરિજી**એ પ્રતિષ્ઠા કરી.

# हीर स्वाध्याय

## परिशिष्ट विभाग

## ५

१

पं. उदयवर्धनरचितं

# श्रीविजयदानसूरिस्तोत्रम्

श्रीवीरं प्रणिपत्य सादरतया श्रीगौतमस्वामिनं
संसारांबुनिधौ निमज्जदसुमत्पोतायमानं सदा
दानादिप्रविभाषकं वरनृभिस्संसेव्यमानं प्रभुदम्
मर्चासंस्तवनादिभेदनिकरैः स्याद्वादिनं शर्मदं ॥ १ ॥

लब्ध्यादिप्रविराजमानमनिशं वाचंयमैः सेवितं
सिद्धान्तादिविशालशास्त्रकरणे लोकेश साधारणं
नत्वाहं श्रवणप्रकाण्डमचिराच्छ्रीशारदां वाग्विदामम्
मिष्टार्थप्रतिपादनैकरसिकास्तोष्ये मुदा श्रीगुरुम् । युग्मम् ॥ २ ॥

श्रीगच्छाधिपसंस्तुतिं कथमहं कर्तुं क्षमः कुण्ठधीः
त्वद्भक्त्या खलु नोदितोस्मि भगवन् क्व त्वं क्व मे स्वल्पधीः
मिथ्यात्वादिमहांधकूपपततामालम्बनं श्रीगुरोः
पादाब्जं प्रवराब्जकोमलमघं व्यापादनं संस्तुवे ॥ ३ ॥

यत्पादाम्बुजसेवनेन विमला बुद्धिर्मनोहारिणी
स्याच्छोभादिगुणावली च विलसत् वर्गादिप्राप्तिः शुभा
आचारप्रतिपादकप्रविशदं ज्ञानं भवेत्सर्वदा
तत्पादाम्बुजमेव संसृतिमहाटव्याः पुनः पातु वः ॥ ४ ॥

भव्याब्जालिविबोधनैकतरणिं कन्दर्पदर्पापहम्
सिद्धान्तार्थविचारणे सुरगुरुं सर्वार्थसम्पादकम्
साराब्धिकुबोधतोयलहरी यानोपमंतागृहम्
विश्वप्राणिदयं महत्सुगुणिनं श्रेयस्करं प्राणिनाम् ॥ ५ ॥

सच्चारित्रविभूषिताङ्गमुनिपं साधुव्रजैस्सेवितम्
भव्यप्राणिगणैः सदोदययुतैः संसेव्यमानं मुदा
भव्यानां भवदुःखतापहरणे मेघोपमं मत्प्रभुम्
वन्देहं जनताप्रमोदजनकं विश्वत्रयीतारकम् ॥ ६ ॥

जीयाच्छ्रीगुरुराजपादयमलं भव्याब्जसूरोपमम्
कल्याणावलिसारकेलिसदनं भव्यालिपापापहृत्
हर्षोत्कर्षकरं मुनीन्द्रविमलं चक्रोर्द्धरेखान्वितम्
मर्त्येन्द्रादिनतेच्छते वरमुने स्वर्गापवर्गप्रदम् ॥ ७ ॥

धर्मारामरतं सदोदययुतं संसारनिस्तारकम्
सर्वप्राणिदयान्वितं वरगुरुं प्रद्युम्नदर्पापहम्
साध्वाचाररतं महाव्रतयुतं सत्त्वक्षमाधारकम्
सेव्यं साधुकदम्बकैर्वरनरैर्हर्षोल्लसन्मानसैः ॥ ८ ॥

सच्चारित्रविराजितैः शिवरतैर्वाधक्रियाकारकैः
धर्मध्यानरतैर्विनेयहितदैः सत्संगसेवापरैः
स्वाध्यायप्रवणैर्गुणौघनिलयैर्ज्ञानत्रयाधारकैः
वंदेहं भुविभुप्रमोदजनकं गच्छाधिपं श्रीगुरुम् ॥ ९ ॥

## शार्दूलविक्रीडितम्

जयतु सज्जनलोकहितावहा रविकलाविमलाजनतापहा
भविकपंचजनस्फटमंगलं सुगुरुपादनखप्रवरच्छविः ॥ १० ॥

शिवरमारमणीरमणोपमा प्रवरसाधुपते तव दर्शनम्
मम मनःस्मितपङ्कजभासन ग्रहपते जयति स्फटमंगलम् ॥ ११ ॥

शिवरमानयविगतस्पृह प्रणतभक्तिकलोककदम्बकम्
विशदपञ्चमहाव्रतपालन प्रसितसाधुपते जनशर्मद ॥ १२ ॥

सकलसाधुशिरोमणिनायकं विबुधलक्षसुसेवितपत्कजम्
कुमततापनिवारणवारिदं नमत भव्यजनाः खलु सादरम् ॥ १३ ॥

मुनिपते तव वक्त्रनिशाकरं निखिलभव्य ब्जविबोधकम्
विमलसंयममार्गविभासनं प्रवरसाधुसुतारकसेवितम् ॥ १४ ॥
श्रमणपङ्कजनस्फुटहर्षदं प्रमुखशौचिमहोज्ज्वलचन्द्रिकाम्
गणनभोविमलस्थितमण्डलं नमतवागमृतमुनिमोददम् ॥ १५ ॥ ॥ युग्मम् ॥

निखिलभिक्षुनमस्कृतपत्कजं कविजनाननसंस्तुतविग्रहम्
सुकृतपदपवर्द्धनवारिदं नमतसंमदपूरितभक्तिकाः ॥ १६ ॥

शमरसामृतपूरितविग्रहा मदनदाहनिवारणनीरदाः
कुमतकंदविवर्द्धनपर्शवो मुनिवराः शिवभाकसुखप्रदाः ॥ १७ ॥ युग्मम्

स्फूर्ज्जयशोधवलिताखिलमर्त्यलोकं, सम्प्रणीतप्रणतभाक्तिकसाधुकोकम्
प्रादुर्भवद्बलमङ्गलराजिदेयं, त्वां संस्तवीमि मुनिपुङ्गवराजगेयम् ॥ १८ ॥

येऽहर्निशं पादयुगं त्वदीयं नमन्ति भक्त्या गतरोषपोषाः
तेषामनन्तोत्तमसौख्यलक्ष्मीर्विलासगेहाभरति ह्यजस्रं ॥ १९ ॥

त्वत्पादपीठे विलुठंति ये तु शश्वन्मुनीन्द्रागतसर्वतन्द्रा
भद्राणि सान्द्राण्यनशं लभन्ते ते प्राप्तपुण्योदयभूरिशोभाः ॥ २० ॥
त्वत्पादपद्म·ग्रदर्शनेहमानन्दस्वलतां गतास्मि
अम्बामुखं वीक्ष्य शिशुः प्रमोदं नैति प्रभोकिवरहर्षपूर्णः ॥ २१ ॥

अद्य प्रभो तव मुखाम्बुजवीक्षणेन प्रादुर्बभूव मम सर्वसुमङ्गलाली
भालं मदीयं तव पादयोगात् प्रष्ठाप्रतिष्टास्पदतां समागात् ॥ २२ ॥

इत्येवं स्तुतिमार्गं नीत्वा श्रीविजयदानसूरीन्द्रान्
**श्रीउदयवर्द्धन**करं त्वत्सेवनमेव याचेहं ॥ २३ ॥

**पं० उदयवर्द्धनपंडितरचितं ।**

२

श्रीसकलचन्द्र रचित

# श्रीविजयदानसूरीश्वरस्वाध्यायः

**विजयदानसूरये नमः । श्रीविजयसेनसूरिगुरुभ्यो नमः ॥**

आदिजिनादिककेवलिनेलं श्रीदा**नंदविमल**गुरवेरम्
संबोधितभुवनामसदावा विजय**विजयदानं** बहुमानम् ॥ १ ॥

आराधयत शमाम्बुधिमीनं श्रीजिनशासनतिलकसुमीनम्
संयमशोभितसुयुगप्रधानं विजय**विजयदानं** बहुमानम् ॥ २ ॥

दिनकरवदशुभतमोहरन्तं . दारुणदरहरतपसीचरन्तम्
बोधिकमलवनतरणिसमानं जयत **विजयदानं** बहुमानम् ॥ ३ ॥

जितगाम्भीर्यगुणादितदीनं नंदिकरं शिवललनालीनम्
धित्क्रीतमदमुपचशिवपानं यतिप**विजयदानं** बहुमानम् ॥ ४ ॥

नारदवरशीलाम्बरहंसं . दयायुधिष्टरशमनदहंसम्
तनुतभवार्णवहनसामानं दानं **विजयदानं** बहुमानम् ॥ ५ ॥

दिसिविस्त्रीतसुयशोघनसारं विधिकाननपञ्चाननवारं
भुजबलनिर्जितमदरिपुमानं नमति **विजयदानं** बहुमानम् ॥ ६ ॥

करहरिबलमर्दितभवकंसं मतिं वरमुनिमौलेवतंसं
वतसुधर्मगुणौघनिधानं सूर**विजयदानं** बहुमानम् ॥ ७ ॥

केसरिसौर्यं विदारितमारं लक्षणशास्त्रविचक्षणसारम्
नामपवित्रितमुर्वीवितानं रक्ष **विजयदानं** बहुमानम् ॥ ८ ॥

वसुधापूज्यपदं शुभदन्ते गुणकाननभूधरं लभन्ते
यतयोरंकवयंतसुमानं ऐहि **विजयदानं** बहुमानम् ॥ ९ ॥

लिपिकृतविज्ञानद्रुमकक्षं रतिपतिविभवविदारणदक्षम्
सर्वशुभङ्करजगदभिधानं नमति **विजयदानं** बहुमान्म् ॥ १० ॥

नेत्रानन्दकराननचन्द्रं वेदाम्बुधिपारगमविनन्द्रम्
दारितसोहभट्टार्यभिमानं मोद**विजयदानं**बहुमानम् ॥ ११ ॥

लम्पटकपटाचारकुठारं रञ्जितविबुधहृदयकासारं
वाचंगमनमजिनसंतानं मेरु**विजयदानं** बहुमानम् ॥ १२ ॥

इति बहुमानं सुमतिनिदानं सुगतिमहोदयपथयानम्
कृतसुरगुरुगानं सुगुणनिधानं **सकलचन्द्र**कृतप्रणिधानम् ॥ १३ ॥

गगने रविचन्द्रे विचरति भद्रं यावदहो वसुधापीठम्
तावदमलसीलं सुविहितलीलं भजत**विजयदानं** सुगुरुम् ॥ १४ ॥

**इति श्रीविजयदानसूरीश्वरस्वाध्याय समाप्त** ॥

३

# श्री विजयदानसूरिनी सज्झाय

सकल सुरासुर वंदित पाय गुणमणि भूषण मंडित काय ।
विमल कला गोपी गोविंद जय श्री विजयदानसूरिंद ॥ १ ॥

आनंद जिम शोभित रुप श्रीतपगणनायक नतभूप ।
विद्याधर जितसुरसुरिंद जय श्री विजयदानसूरिंद ॥ २ ॥

हीनाचार निवारण वीर जगतीतल मुनितल मुनिजल कोटीर ।
रत्नत्रय धारक सुखकंद जय श्री विजयदानसूरिंद ॥ ३ ॥

यशभारभावित लोक अशेष विनयादिक गुण करी विशेष ।
दानव मानव नयनानंद जय श्रीविजयदानसूरिंद ॥ ४ ॥

जनमनवंछित दायक धीर नवचामीकर देह गभीर ।
यतनिइं पालइ मुनिवरविंद जय श्री विजयदानसूरिंद ॥ ५ ॥

सूधा पंच महाव्रत धरइ सूत्रविचार निरंतर करइ ।
रिपुजन दूरित परमानंद जय श्री विजयदानसूरिंद ॥ ६ ॥

रिद्धि समिद्धि लहइ जस नामि भविजन पामइ अविचल ठाम ।
मदविसहर वशकरण नरिंद जय श्री विजयदानसूरिंद ॥ ७ ॥

तुं सुरतरु चिंतामणि समउ नित उठी भवियां तुम नमउ ।
नरनारीनु तपय अरविंद जय श्री विजयजानसूरिंद ॥ ८ ॥

इम थुण्यु श्री तपगच्छनायक सुकअ दायक सुंदरो ।
श्री वर्धमान जिनेशशासन महा भार धुरंधरो ।
प्रतिपउ दिवायर जाव गयणंगणि सकल गुण पूरिउ ।
श्रीविजयदानसूरिंद गिरूउ सेवक जन सुहंकरो ॥ ९ ॥

**इति श्री विजयदानसूरि स्वाध्याय**

४

# हीरविजयसूरिकृतपट्टः

**श्री विजयदानसूरिगुरुभ्यो नमः**

संवत १६४० वर्षे पौषासित १० गुरौ श्री**हीरविजयसूरि**भिर्लिख्यते ।

अद्यप्रभृति **विबुधपदविज्ञप्तिरे**तद्विषये कर्तव्या, यो श्री दशवैकालिक-श्री **आवश्यकनिर्युक्तिभाष्य-पिंडविशुद्धी-कर्मग्रंथ-योगशास्त्र-क्षेत्रविचार-संग्रहणी-उपदेशमाला-षड्दर्शनसमुच्चय-प्रवचनसारोद्धारादि** ५००० ग्रन्थकण्ठपाठी जघन्यतोऽपि तथा **हैमद्वादशपादप्राकृतवृत्ति**सहिताथवा **प्राकृत-वृत्तिसहितप्रक्रिया-सारस्वतं** वा तथा साहित्ये **वाग्भट्टालङ्कारकाव्यकल्पलता-छन्दोऽनुशसान - वीतरागस्तव - शोभनस्तुति - जिनशत - क-षड्दर्शनसमुच्चयटीका-नाममाला-लिङ्गानुशासन-धातुपाठ-तीर्थकृच्चरित्रादि** तथा सिद्धान्ते **आवश्यक-दशवैकालिक-उत्तराध्ययन-ओघनिर्युक्ति-नंदीअनुयोगद्वारादि** तथा विचारग्रन्थे **सङ्ग्रहणी-क्षेत्रविचार-कर्मग्रन्थ-भाष्य-पिण्डविशुद्धि-सामाचारी**प्रभृत्ति तथा ज्योतिःशास्त्रं **नारचन्द्रादि** अर्थतः पाठयति, तथा तपः मासमध्ये षडुपवासकारी-चातुर्मासक-सांवत्सरिकषष्ठाष्टमकारी, तथा मार्गातीत-कालातीतत्यागी, तथा रोगादिकारणं विना दिवा त्रियामाद्ययामे स्वाप-त्यागी, त्रिविधाहारैकभक्तकारी, तथा आच्छादितास्यजल्पन-प्रमार्जनोपेतचलन-विहाराहारावश्यकप्रतिलेखनादिषु जल्पनप्रतिषेध-समिति-गुप्ति-प्रभृतिसंविज्ञ-सामाचारीप्रवर्त्तकश्चेति, स्वसंघाटकमध्ये विशेषतः ।

तथा प्राक्तनविबुधैरेतद्विषये यतितव्यमन्यथा तपस्यादेशविषये विचारः ॥

श्रीकल्याणमस्तु श्रमणसङ्घस्य ॥

श्रीमल्लिपीकृताः **पं. कनकविजय**सविधौ पट्टोऽस्ति ॥

卐

५

# श्रीहीरविजयसूरिकृतस्तुतिः

श्रीवीरोदितवाचश्च
तीर्थराजो महामहा
प्रणमद्देवराजानो
ददतां शिवसम्पदः ॥ १ ॥

६

श्रीहीरविजयसूरिकृत

# चतुरर्थी वीरस्तुतिः

## अज्ञातकर्तृकृता अवचूरिः

**विज्ञानपारगतवालकवीरमान, मातंगमुक्तममतागमदानतारि ।**
**कामं तमोहरतरो परसत्पयोजे, सूरीश हीरविजयस्य भव प्रसन्नः ॥ १ ॥**

### *अवचूरिः*

*॥ श्रीभगवत्यै नमः ॥*

**व्याख्या :- विज्ञाः** निपुणाः **नाः** प्राणिनः तान् पालयसि रक्षसीति **विज्ञान-पालः** "रलयो रैक्यत्वात्" तत्संबोधने, तथा गता बाला "बवयो-रलयो-रैक्यत्वात्" केशाः विद्यन्ते यस्य स **गतबालो** व्रते गृहीते कचोत्पत्त्यभावत्वात्! स्वार्थे क प्रत्यये **गतबालकस्**तसंबो० तथा मान(नो) गर्वस्तदेव **मातंगो** हस्ती अत्युत्कटत्वात् तेन **मुक्तो** वर्जितः । तथा ममता ममत्वं तां गमयसि निवारयसीति **ममतागमः** तत्संबो० तथा **दं** वैराग्यं विद्यते यस्य स दस्तं सं० तथा **आनतः** प्रणता अरयो वैरिणो विद्यंते यस्य स **आनतारि**स्तसं० तथा तमोऽज्ञानं अतिशयेन हरसीति **तमोहरतरः** तत्संबो० न विद्यंते परे वैरिणो यस्य सो**ऽपरः** तत्संबो० तथा सत् विद्यमानं **पयोजं कमलं** विद्यते यत्र सत्पयोजस्तत्संबो० हस्तपादादिषु कमलाद्या कमला(का)रत्वात्, तथा **ईः** लक्ष्मीस्तं सूते इति **ईसू** स्तत्संबो० तथा हे **हीर** स्वामिन्! **हि** निश्चितं **ई** लक्ष्मी (तां) रासीति **हीर**स्तत्संबो० तथा नास्ति भवः संसारो यस्य स **अभव**स्तत्संबो० एवं विध हे **वीर** हे वर्धमान त्वं कामं अभिलाषस्तत् जयसि विजयसे इति क्रियाकारकसंबंधः । कथंभूतं कामं वरकलहो विद्यते यत्र तद्विकलहकर्तृत्वात् कथंभूतस्त्वं प्रसन्नः नुम इति ।

### *इति वीरस्तुतिः*

**व्याख्या :- ( द्वितीया )** वि विशिष्टं ज्ञानं विद्यते यस्य स विज्ञानस्तत्संबो० **कं** सुखं विद्यते यस्य स कस्तत्सं० तथा हे **वीर** हे शूर तथा हे **मानो** गर्वस्तद्रूपो यो

मातंगो नीचस्वभावत्वात् चंडालस्तेन मुक्तो वर्जितस्तत्संबो० तथा ता लक्ष्मी-स्तस्या आगमो आगमनं यस्य स **तागम**स्तत्संबो० तथा दानं उत्सर्गास्तस्य **ता** लक्ष्मीस्तस्या(आ)लि: श्रेणि: विद्यते यस्य स [रलयोरैक्यत्वात्] **दानतालि:** तत्संबो० तथा विजयो जयस्तस्य तरु: वृक्ष: तत्संबो० तथा हे पर! सर्वोत्कृष्ट: तथा सतां उत्तमानां पासि रक्षसीति सत्प: तत्संबो० तथा आ: ब्रह्माविष्णुमहेशा: तेषां जि: जेता त[स्मात्] अजि: तत्संबो० तथा सूरय: पंडितास्तेषामीशा: स्वामिनस्तेष मध्ये हीर इव हीर **सूरीशहीर:** तत्संबो० तथा भवं श्रेय: तं पूरयसीति भवप्र: तत्संबो० तथा हे सन् उत्तम: एवंविध हे **पारगतवार** तीर्थंकर-समूह त्वं काममत्यर्थं मम तमोऽज्ञानं हर निवारय इति क्रियाकारकसंबंध: कथंभूत: स: या लक्ष्मी विद्यते यस्य सय: तत्संबोध० पुन: न: ज्ञानं विद्यते यस्य स न: तत्संबो० **इति सर्वतीर्थंकरसाधारण स्तुति:** ।

**व्याख्या :-** विज्ञानं कला तस्य पारो विद्यते यस्मात् स **विज्ञानवार**स्तत्संबो० तथा गतं व: कलहो विद्यते यस्य स **गतव**स्तत्संबो० तथा नास्ति र: कामो येषा ते अरा: एवंविधा ये कवय: कवितार: तेषां ई लक्ष्मीं रासि ददासि इति अरकवीर: तत्संबो, तथा मां लक्ष्मीं नयसि प्रापयस्तति मान स्तत्संबो० दानं क्षयस्तद्रूपो यो तालो वृक्षविशेष: रलयोरैक्यत्वात् तस्मिन् मातंगो हस्ती यथा हस्ती वृक्षमुन्मूलयति तथा त्वमपि क्षयं निवारय स्तत्संबो० तथा मुला मा लक्ष्मी: यै ते मुलमा: साधव: तेषां मत: इष्ट: **मुक्तममत**स्तत्संबो० तथा त: युद्धं मोहो मौढयं रतं मैथुनं तेषां लोपो नाश: रलयोरैक्यत्वात् । तं रासि ददासीति **तमोहरतलोपर**स्तत्स० तथा सत् विद्वांस्तद्रूपाणि यानि पयोजानि कमलं[लानि] तत्र सूरिस्तरणि: एवंविध: सन् ईश: स्वामी **सत्पयोजे सूरीशं:** तत्सं० तथा इ काम: तं ईरयंति प्रेरयंतीति ईरा: तेषां विजयो विद्यते यस्मात् स ईरविजय: तत्सं० तथा भव: श्रेयो विद्यते यस्य स भव: तत्सं० तथा प्रकर्षेण सन् विद्यमान: प्रसन् तत्संबो० एवंविध हे आगम हे सिद्धांत त्वं न: अस्माकं कामं कंदर्षं हि निश्चितं स्य च्छेदय इति क्रियाकारकसंबंध:

**इति सिद्धांत स्तुति: ।**

**व्याख्या :-** विज्ञानं कला तस्य वार: प्रांतस्तं गच्छसि इति विज्ञान वारग: तत्संबो० त: युद्धं तं वारयसि निवारयसी ति तवार। क्रे तवारकस्तत्संबो० तथा

वीराः शूरास्तेषु मानः पूजा विद्यते यस्य स वीरमानः तत्सं० तथा मुला त्यक्ता ममता ममत्वं येन स मुलममत स्तत्सं० तथा (आ)समन्तात् गमस्य ज्ञानस्य दानं उत्सर्गो विद्यते यस्य स आगमदानस्तत्संबो० तथा ता लक्ष्मीस्तस्या आलिः श्रेणिर्विद्यतेः यस्य स तालिस्तत्सं० रलयोरैक्यत्वात् तथा तमः पं हन्तीति तमोहः अर्थात् धर्मः तत्ररताः आसक्तास्तेषां लोपोऽर्थात्कष्टं स एव रोऽग्नि रतत्र सत् शोभनं पयो नीरं **तमोहरतलोपरसत्पयोजः** तत्सं० तथा आजिर्जेता तत्सं० एवंविध टे मातंगयक्ष त्वं काममत्यर्थं सूरीश**हीरविजयस्य श्रीहीरविजयसूरेः** प्रसन्नो भव इति क्रियाकारक संबंधः ।

**इति यक्षस्तुतिः ॥**

**इति अवचूरिः ॥**

७

श्रीहीरविजयसूरिरचित

# जम्बूद्वीपप्रज्ञप्तिवृत्तिप्रशस्तिः

आसीद्वासववृन्दमौलिमुकुटभ्राजिष्णुरत्नप्रभा-
पूरप्लावितपादपङ्कजयुगः सिद्धार्थराजाङ्गजः ।
तेजोभिः सुभगं व्यधाद् गणधरः श्रीमान् सुधर्म्माभिध-
स्तत्पट्टं चरमेतरक्षितिभृतः श्रृङ्गं विवस्वानिव ॥ १ ॥

विश्वाऽऽशयपयोराशिचन्द्रानिस्तन्द्रवृत्तयः ।
तत्परम्परयाऽभूवन् **श्रीजगच्चन्द्रसूरयः** ॥ २ ॥

वर्षे विशिखवस्वक्षि-कौमुदीकान्तसम्मिते १२८५ ।
तपोभिर्दुस्तपैर्लेभे 'तपे'तिबिरुदं च यैः ॥ ३ ॥

**आनन्दविमलाह्वानाः** सूरयः सिद्धिभूरयः ।
तेषां क्रममलञ्चक्रुः कलहंसा इवाम्बुजम् ॥ ४ ॥

पाणिसिद्धीषुशीतांशु प्रमिते परिवत्सरे १५८२ ।
विदधे यैः क्रियोद्धारः सत्त्वानुग्रहकारिभिः ॥ ५ ॥

ये वैराग्यवतां व्रजेषु परमाः सूर्या इवाऽर्च्चिष्मतां
ये मुख्याः सुधियां च येषु मरुतां वृक्षा इवोर्व्वीरुहाम् ।
ये सौभाग्यभृतां भरेषु सुभगाः सिंहा इवोजस्विनां
ये चार्या गुणीनां गणेषु सरितामीशा इवाम्भोभृताम् ॥ ६ ॥

दितदुरितनिदानः साधुतामाददानः सुविहितहितदानः स्मेरपद्मोद्यदानः ।
अजनि **विजयदानः** सूरिराट् शं ददानः कृतमनसिजदानस्तत्पदे श्रीनिदानः
॥ ७ ॥

प्रकटप्रभाभवनं भुवनाऽर्च्या **हीरविजयसूरीन्द्राः** ।
तत्पटे विजयन्ते विजयश्रीदोर्लतालालिताः ॥ ८ ॥

**मेवातमालवमरुस्थलमेदपाट-गौडा**दिदेशपतिसाहि**अकब्बरेण** ।
आकारितैः सबहुमानमनिन्द्यविद्यै-र्यैर्मध्यमण्डलमलङ्क्रियते स्म पूज्यैः ॥९॥

यद्वाक्प्रहृष्टहृदयोऽवनिजानिमुख्यः **श्रीमानकब्बरनृपः** कृपया परीतः ।
'वध्या न देहिन इहे' ति वदन् वचांसि दत्ते स्म **डाबरसरः** शमिसिन्धुराणाम्
॥ १० ॥

यद्दर्शनात्प्राप्तपरप्रमोदः साहि स च द्वादश वासराणि ।
श्रीवार्षिके पर्व्वणि सर्व्वदेशे व्यधादमारेः पटहं पटिष्ठम् ॥ ११ ॥

सिद्धान्ततर्ककाव्यादिकवाङ्मयजलधिकनकशैलानाम् ।
परवादिगगर्व्वपर्व्वत-पर्व्वतविद्वेषिलीलानाम् ॥ १२ ॥

**कल्पकिरणावली**मुखबहुशास्त्रग्रथनलब्धसिद्धीनाम् ।
**श्रीधर्म्मसागरा**ऽभिध-वाचकचक्रैकचक्रभृताम् ॥ १३ ॥

ऐदंयुगीनसुविहित-सदःसदनसदनसलसद्दर्शानाम् ।
महिममणिमण्डितानां **वानरऋषि**पण्डितानां च ॥ १४ ॥

साहाय्यात्सञ्जितोत्साहैर्विश्वोपकृतिकाङ्क्षिभिः ।
**श्रीजीवाभिगमज्योतिः-करण्डा**द्यनुसारिभिः ॥ १५ ॥

वर्षे श्री विक्रमार्काद् ग्रहदहनरसश्वेतरश्मिप्रमाणे १६३९ ।
स्वातौ दीपोत्सवीयेऽहनि निखिलकला-कौमुदीकौमुदीशैः ।
तैरेषा शास्त्ररेखा सहृदयहृदयानन्द कन्दाम्बु **जम्बू-**
**द्वीपप्रज्ञप्तिवृत्ति**र्विविधरसमयी-निर्म्ममे निर्म्ममेशैः ॥ १६ ॥ कुलकम् ।

तत्पट्टपूर्वपर्व्वतपयोजिनीप्राणवल्लभप्रतिमैः ।
वरधर्म्मकर्म्मनिर्मितिकलाकलापेन्दुशितिकण्ठैः ॥ १७ ॥

सौभाग्यभाग्यरतिशैलसुतैकपादैः प्रोत्फुल्लपद्मदलपेशलपाणिपादैः ।
दुर्व्वादिवृन्दवदनाम्बुजशीतपादैः सूरीश्वरै**र्विजयसेन**मुनीन्द्रपादैः ॥ १८ ॥

वाचकवृन्दवतंसैः सकलकलाकमलिनीकमलिनीशैः ।
**कल्याणविजयवाचक**मुख्यैः सम्प्राप्तसोख्यैश्च ॥ १९ ॥

कल्याणकेलिनिलयैः **श्रीमत्कल्याणकुशल**कुशलैश्च ।
**श्रीलब्धिसागरा**भिध-विबुधैरुपलब्धिलब्धैश्च ॥ २० ॥

सम्भूय भूयसी भक्तिं विभ्रद्भिर्भगवद्‌गिरि ।
**पत्तने** शोधयाञ्चक्रे वक्रेतरगुणैरियम् ॥ २१ ॥

तच्चरणनलिननिलयः प्रशस्तिमेतां जगत्स्थितिप्रतिमाम् ।
**हेमविजयकवि**रकरोत्पुरुषोत्तमपालनप्रथिताम् ॥ २२ ॥

यावत् शीतमरीचिमण्डलमिदं व्योमाङ्गणं गाहते
यावत्पङ्कजिनीपतिर्वितनुते भासांभरैश्चातपम् ।
रम्यालङ्कृतिशालिनीवरपदन्यासालसद्वर्णभाक्
तावद्‌वृत्तिरियं वशेव कुरुतां कामोत्सवानङ्गिनाम् ॥ २३ ॥

इति श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तिप्रशस्तिः ।

卐

जगद्गुरुश्रीहीरविजयसूरिरचित

# श्रीनाभेयजिनस्तवन-फागु

ॐ नमःसिद्धम्

त्रिभुवनप्रभुताभवनक्रमौ प्रसभभक्तिवशेन नतस्तव ।
प्रथमतिर्थपते! स्तुतिगोचरं सुविनये विनयेन नतामरम् ॥ १ ॥

**( यमकबन्धः )**

**अथ छन्द रासकाख्यम् ॥**

सकलकलायुतसोमसमानन-सुरनरकिन्नरविहितसुमानन।
मानवहितकृतदांन (दान) तुं
जय जय मानवहितकृतदां(दा)न तों ॥२॥ **( छन्दस्त्रिपदी )**

सकलमहाजनमानसमोहन निर्जितमानमनोभवमोहन।
मोह महारिसमूह तुं जय० ॥३॥

विश्वपितामह निर्गतपातक कांतनमोजनिताऽमृतसातक।
जातमहोदय देव तुं जय० ॥४॥

गुं(गु)णमणिरोहण-रोहण भूधर विनयनतामितमां(मा) नवकन्धर।
बन्धुरदर्शन नाथ तुं जय० ॥५॥

**काव्यम्**

धन्योऽहं जगतीतले जिनपते ! नाभेय ! नेतस्तरां !
प्राप्तोऽहं कृतकृत्यतां च भगवन् ! विश्वत्रयालंकृते!!
संसारार्णवमद्य तीर्णमिव हे ! तन्मन्यमानो मुं(मु)ने!
नाथस्त्वं मयका यतः कलियुगे लब्धो ह्यलब्धः पुरा ॥६॥

छन्दःरासाडुद्धः॥ आसावरीरागेण गीयते॥

विमलीकृतविमलाचलभूतल भूतलसद्गुं(गु)णराजी रे॥
लोकालोकविभासन क्ये(के)वल केवल दर्श्य(र्श)न राजी रे वि० ॥७॥

भविकजनौघ भवोदधितारक वारक कर्म महारो(रे) रे।
कुरु सुमतिं मम भगवन् ! जिनवर ! जिनवर मुख्य विचारे रे वि० ॥८॥

रुपविनिर्जतकमलानन्दन! नन्दन नाभिमहीशो रे।
भव्यजनावलिनिर्मलमानस – मानसहंस! महेशो रे वि० ॥९॥

वृषभ ! वृषभराजाऽङ्कितविग्रह ! विग्रहहृच्छिवताते! रे।
देव! विधेहि निजक्रमसेवां देवाऽञ्चितजिन ! भीते रे वि० ॥१०॥

अथ काव्यम्॥

नानावस्तुविसर्जने निपुं(पु)णताभाजा मया निर्मिता
मन्दारप्रमुखास्तथा तदितरे तत्प्रार्थने तत्पराः।
नैतेष्वस्ति शिवप्रदः परमिति ज्ञात्वा विधिस्त्वै (?) व सत्
तत्सिद्धयै विदधे विभो ! भवभृतां नाऽन्य(:) कथं त्वत्य(न्य)था ॥११॥

अढीयाबन्धः

वासववन्दितपादः नाशितसर्वविषादः।
कां(का)मित कल्पतरोः (रो) विश्वजनैकगुरो रे
जिन जिन! विश्वजनैकगुरो ! ॥१२॥

गत्या हस्तो(स्ति)समां(मा)नः सुरनरकृतगुं(गु)णगां(गा)नः।
अमृतमधुरवां(वा)णे ! कजकोमलपां(पा)णे रे
जिन जिन कजकोमलपां(पा)णे ॥१३॥

विशदचरित्राधारः लब्धभवोदधिपारः।
सारशमाम्बुनिधे! भविजनभद्रविधे रे
जिन जिन भविजनभद्रविधे॥१४॥

अव्ययपदकृतवास: वासवकृतनिजदासः।
प्रणतिमहं विदधे भाषितधर्मविधे रे
जिन जिन भाषितधर्मविधे! ॥१५॥

**अथ काव्यम् । छन्दः ॥**

स्वामिँस्त्वद्वदनाकलंकशशिनं दृष्ट्वैव नित्योदयं
चंद्र: किं भ्रमणं करोति गगनेऽनाभाभयव्याकुलः।
नैवं चेत् कथमातनोति विपद (दं) देव ! प्रतापस्य ते
मित्रोष्णत्विषि बन्धुपद्मविततेर्लब्धावकाशो ध्रुवम् ॥ १६॥

**अथ फाग, संस्कृतरागः ॥**

अमितमहामहिमालय पालय परमगुरो ! ।
मां भवतो भवभयतो भयतोदारगुरो ॥ १७॥

कुमतमतङ्गजवारण-वारणवैरिनिभ !
धि(धै)र्यतया जितमन्दर ! सुन्दरकनकनिभ ! ॥ १८॥

देवपतिस्मृतनामा नामानीशीपते ! ।
जय जय दत्तसुदर्शन ! दर्शनतोऽसुं(सु)मते ॥ १९॥

चरणयुगं शिवशरणं शरणं साधुपते ! ।
पततां भवनीराकर-याकर ! (?) विमलमते ! ॥ २०॥

**अथ काव्यभासाः ॥**

नेतस्ते विमलक्रमाम्बुजयुगोपास्तेर्यथोक्तं फलं
सम्यग् ये सुधियो वदन्ति विधिना कुर्युश्च भक्तिं तथा ।
तेषां जन्म फलेग्रहीह कृतिनां गेयं च पुण्यात्मना-
मन्येषामफलं भदन्त ! समभूत् स्वर्द्धेनुं(नु)वद् दुर्लभम् ॥ २१॥

**अथ त्रिपदी ॥**

भावि तव तनुं(नु) लता यांन (यान ?) विश्वजनता रे ।
सकलकलाकलिता रे किमियमिव नवसुरलता रे ॥ २२॥

रविमित क्ख( ?)लु समागता कांचनमिव कांता रे ।
जम्भाहितमहिता रे विलयिनक्त ति( ?)जनदुरिता रे ॥ २३॥
निधाय समसमता ममला(ता)मिव विहिता रे ।
नाभिभुवा शमिता रे सततसुरगणपरिवृता रे ॥ २४॥

धनुषां पञ्चशतीमिता नतजगती रे ।
स्वर्गजातरती रे भविकजनावलिशिवकृती रे ॥ २५॥

## अथ काव्यं च —

वक्तुं ते विभवो भवन्ति भगवन् ! नो योगिनोऽपि स्फुटं
जानन्तो महतो गुणानिह सदाऽनन्तानुदारांस्तराम् ।
तत् किं स्यादिह मादृशस्य विभू(भु)ता नूनं? तथापि प्रभो !
भक्त्या प्रेरितचेतसेति विनुतः किञ्चित् प्रसादेन ते ॥ २६॥

## अथ कलश कमलापिधां (धा) नं काव्यम् ॥

### आर्या

श्रीतपगणगगनतलाऽं(ऽ)ङ्गण—
तरणिश्रीविजयदां( दा )नसूरीणाम् ।
शिष्याणवे विधेया
भवे भवे देव ! निजसेवा (वा) ॥ २७॥

**ई( इ )ति श्री श्रीजगद्गुरुश्रीदिल्ली-अग्रसेनपुर-लाहोरादिधराधीश-पात्स्याह साह श्री १०८ अकब्बरप्रतिबोधक भ. श्री१०८ श्री हयी( ही )रविजयसूरीश्वररचितं श्रीनाभेयस्तवनं सम्पूर्णम् ॥ पं. श्रीवृद्धिकुशलगणि आत्मपठनार्थं लिखितं च श्रीमहूआनगर वृद्धालय आरां( रा )मे ॥ श्रीशेत्रुंजगिरिसुप्रसादात् ॥ ई( इ )ति श्रेयः ॥**

९

जगद्गुरुश्रीहीरविजयसूरिरचितं

# ॥ श्री वर्धमान-जिन-स्तोत्रम् ॥

भक्त्या नमस्कृत्य गुरुं गुरुं गुरुं
बुद्ध्या सतां सर्वदया दयादया।
भास्वत्प्रभावं विभयाभयाभया
मुनित्सतारं सुदरं दरंदरम् ॥ १ ॥

श्री वीरमर्हन्तमहो महोमहो—
दयं स्तुवे भक्तहितं हितं हि तम्।
देवाधिदेवं सुमनोमनोमनो—
हारानुभावं सकलं कलं कलम् ॥ २ ॥ युग्मम् ॥

श्रीत्रैशलेयोऽवृजिनो जिनो जिनो—
नगाधिराजोऽममतामतामताः ।
देयादलं वः परमारमारमा—
पीयूषगीर्देवरतीरतीरतगीः ॥ ३ ॥

श्रीज्ञातपुत्रं विरतारतारता—
सिद्ध्यै श्रयध्वं समयामयामया ।
सदा समाद्यैर्वसुधासुधासुधा—
करोपमं साधुपरंपरं परम् ॥ ४ ॥

श्रीवर्द्धमानोऽसुमतो मतोऽमतो
भवोऽवताद् वश्च कलं कलं कलम्।
तीर्थेतसत्रासदयो दयोदयो—
ऽहितोऽपि कामं जलतालतालता ॥ ५ ॥

भदन्त ! देवार्य ! भवाभवाभवा--
वतार ! कामे विहितेऽहिते हिते ।
निःश्रेयसानन्दकृते कृते कृते—
ज्ञानामृतातोद ! ममाऽममाऽऽममा ॥ ६ ॥

अकारि ते गौः सुधया धयाधया—
ग्रस्ताऽविमुक्ताऽमतयातयातया
यानन्तमाहात्म्यमयामयामया
सतर्त्तिधेया सुरसारसारसा ॥ ७ ॥

इत्थं स्तुतो जिनवरोऽखिलभाववेदी
सिद्धार्थभूपकुलकाननकल्पवृक्षः ।
सूरीशितु**र्विजयदानगुरोर्विनेय** —
**सूरीशहीरविजयेन** 'मुदा प्रसन्नः ॥ ८ ॥

卐

**श्रीहीरसूरेः** सुगुरोः प्रसादात्
कुर्वन्ति सर्वेऽपि सुखेन यात्रां ।
अद्यप्रभृत्येतदभूतपूर्वं
जातं न केनापि विनिर्मितं पुरा ॥

**महो. भानुचंद्ररचित श्रीनाभेयजिन विज्ञप्तिरुप स्तवन ।**

१०

## प्रभाति

अजब ज्योत मेरे जिनकी ॥ १ ॥ आं.

कोडे सुरज लेई एकठा कीजें होड न आवें मेरे जिनकी ॥ २ ॥ अ.

झगमग ज्योति झलामल-झलकें काया नील रतनकी ॥ ३ ॥ अ.

**हीरविजें** प्रभु पास संखेसर आरचा पूरो मेरे मनकी ॥ ४ ॥

अजब ज्योत मेरे जिनकी ॥

**इति श्री प्रभातिराग संपूर्ण**

श्रीगुरुहीरविजयसूरिंदो तपगच्छकुलनो चंदो,
देशविदसिजसभरयससुं उपशम सुरतरुकंदो,
वर्धमानविद्यानो आकर वर्धमानकरिध्यान,
वर्धमान पासइ जिनपामइ मागइ **सकलचंद** शिवदान ॥ ३३ ॥

**॥ इति श्रीवीर स्तवन ॥**

११

# श्रीहीरविजयसूरि गुरुमूर्ति गुरुपादुका लेख संग्रह

## गुरुमूर्ति

### (१) आबु

॥ सं० १६६१ वर्षे । आसू सूदि ११ दिने वार शुक्र उसवाल ज्ञातीयसा० मुला संघवी रूपा राउत कचरा जगमाल श्रीसीरोहीनगरे(र) वास्तव्यैः श्रीअर्बुदाचलचैत्ये । युगप्रधानभट्टारिकश्रीश्रीश्रीश्रीश्री **हीरविजयसूरीश्वर**नी प्रतिमा भिरापितं ॥ महोपाध्यायश्रीलब्धिसागर वासषेप करापितं ॥ शुभं भवतु ॥ सूत्र पचायणकृतं ॥ श्री ॥

સંવત્ ૧૬૬૧ના આસો શુદિ ૧૧ને શુક્રવારે શ્રી સિરોહી નિવાસી ઓસવાલજ્ઞાતીય શાહ મૂલા, સંઘવીં રૂપા, રાવત, કચરા અને જગવાલે શ્રી અર્બુદગિરિના જિનચૈત્યમાં યુગપ્રધાન ભટ્ટરક શ્રી **હીરવિજયસૂરીશ્વરજી**ની પ્રતિમા ભરાવી અને તેના ઉપર મહોપાધ્યાય શ્રી લક્ષ્મીસાગરજી પાસે વાસક્ષેપ કરાવ્યો. અર્થાત્ મ. શ્રી લક્ષ્મીસાગરજીએ આની પ્રતિષ્ઠા કરી છે. આ પ્રતિમા પંચાયણ નામના મીસ્રીએ ઘડી છે. આ સુંદર મૂર્તિ મૂળગભારામાં ડાબા હાથ તરફના ગોખલામાં વિરાજમાન છે.

### (२) पाटण

(1) एर्द ०॥ सं० १६६२ वर्षे वैशाखसुदि १५ सोमे पत्तनबास्तव्य वृद्धशाखीय प्राग्वाटज्ञातीय दो० शंकर भा० बाहलीनाम्न्याः

(2) सुत दो० कुंअरजी भ्रातृव्य दो० श्रीवंत भा० अजाई सुत दो० लालजी पुत्र रतनजी प्रमुखयुतया स्वश्रेयोर्थम् बृहत्तपा—

(3) गच्छेश शीलादिगुणधारक भ० **श्रीहेमविलमसूरि**पट्टभूषण भ० **श्रीआणंद-विमलसूरि**पट्टप्रभाव

(4) क **श्रीविजयदानसूरि**पट्टालंकाराणां स्ववचोरंजितश्रीअकब्बरपातिसाह-विहितसर्वजीवाभयदान—

(5) प्रवर्तनश्रीशत्रुंजयादिकरमोचनादिविदितयशसां लुंपाकमतेश ऋ० मेघजीनाम्नो दत्तदीक्षाणां भट्टारक—

(6) **श्रीहीरविजयसूरिणां** मूर्तिः का० प्र० च तत्पट्टालंकार कारिभिः पातिसाह **श्रीअकब्बर**सभालब्धजयवादम—

(7) नोहारिभिः गोवृषभमहिषीमहिषवधमृतध नादानबंदिग्रहण निवारकफुरमान-धारिभिः भट्टारकश्री ६

(8) **श्रीविजयसेन**सूरिभिः महोपाध्याय**श्रीसोमविजय**गणिपरिवृतैः पत्तनादिमहं० अबजीप्रमुखसकलसंघेन वंद्यमाना चिरंनन्दतात् ॥

## ( ३ ) राधनपुर

संवत् १६७० वर्षे मागसिर द्वितीयानन्तरतृतीया .... श्रीहीरविजयसूरीणां मूर्तिः ॥ श्रीराजधन्यपुरीय श्रीसंघेन कारिता । प्रतिष्ठिता च श्रीअहम्मदावादनगरे परीक्षक भीमजीप्रतिष्ठा (ष्ठिता)यां श्रीतपागच्छे सर्वजनगीयमाने गुणगणप्रधान-सद्गुरुबिरुदावदातनैरकराजाधिराजदीयमानाभयदानादिस्फुरन्मानप्रवर्द्धमानयशोविख्यात भट्टारक श्रीहीरविजयसूरिपट्टलक्ष्मीपक्ष्मलाक्षी (क्षि) वक्ष [:] स्थलालंकारहारप्रभू-तपृथ्वींपतिपरि... आमवादिवादनप्रकारभट्टारक श्रीविजयसेनसूरिभिः ॥

સંવત ૧૬૭૦ ના માગશરની બીજ પછીની ત્રીજ..... શ્રીહીરવિજયસૂરિની મૂર્તિ શ્રીરાધનપુરના શ્રીસંઘે કરાવી અને અમદાવાદ નગરમાં પરીક્ષક ભીમજીએ પ્રતિષ્ઠિત કરેલ શ્રીતપાગચ્છમાં બધા માણસોથી ગવાતા, ગુણોના સમૂહમાં મુખ્ય સદ્દગુરુ બિરુદવાળા, અનેક રાજાધિરાજોને જેમણે અભયદાનનો ઉપદેશ આપ્યો છે તેવા, વધતા યશવાળા, વિખ્યાત, ભટ્ટારક શ્રીહીરવિજયસૂરિની પટ્ટલક્ષ્મી.......વક્ષઃ સ્થલના અલંકાર હાર પ્રભૂત પૃથ્વીપતિ પરિ..... આમવાદિવાદનપ્રકારભટ્ટારક શ્રીવિજયસેનસૂરિએ.

## ( ५ ) मालपुरा मुनिसुव्रत मन्दिर

॥ संवत् १६९० वर्षे जेठ वदि ११ दिने गुरुवारे ॥ श्रीहीरविजयसूरिबिंबं कारितं श्रीसंघेन । पातस्याहिश्रीजहांगीरप्रदत्तमहातपाविरुदधारकभट्टारक श्री १६ श्रीविजयदेवसूरिभिः प्रतिष्ठितं ॥

## ( ६ ) महुवा

"१६५३ पातसाहि श्री**अकबर**प्रवर्त्तित सं. ४१ वर्षे फा० सुदि ८ दिने श्रीस्तंभतीर्थवास्तव्य श्रा० पउमा (भा०) पांची नाम्न्या श्री**हीरविजयसूरीश्वरा**णां मूर्त्ति का० प्र० तपगछे (च्छे) श्री**विजयसेनसूरि**भिः"

## गुरुचरण पादुका

## ( १ ) शत्रुंजय

ॐ ॥ स्वस्ति श्रीसंवत् १६५२ वर्षे मार्गे वदि २ सोमवासरे पुष्यनक्षत्रे निष्प्रतिमसंवेगवैराग्यनिःस्पृहतादिगुणरंजितेन साहिश्रीअकब्बरनरेंद्रेण प्रतिवर्षं षाण्मासिकसकलजंतुजाताभयदानप्रवर्तनसर्वकालीनगवादिवधनिवर्तनजीजिआदि-करमोचनमुंडकाभिधानकरमांजनपूर्वकश्रीशत्रुंजयतीर्थसमर्पणादिपुरस्सरं प्रदत्तबहु-बहुमानानां नानादेशीयसंघसमुदायेन सह श्रीशत्रुंजये कृतयात्राणां जगद्विख्यातमहिम-पात्राणां सं० १६५२ वर्षे भाद्रसितैकादश्यां उन्नतदुर्गे अनशनपूर्वकं महोत्सवेन साधितोत्तमार्थानां तपागच्छाधिराजभट्टारक**श्रीहीरविजय**सूरीणां पादुकाः कारि० स्तंभतीर्थीय सं० उदयकरणेन प्र० भ० श्रीविजयसेनसूरिभिः ॥ महोपाध्याय-श्रीकल्याणविजयगणयः पं० धनविजयगणिभ्यां स[ह]प्रणंति ॥ एताश्च भ[वा..........रा]राध्यमानाश्चिरं [नंद]तु ॥ श्रीः ॥

આદીશ્વર ભગવાનના મંદિરની પશ્ચિમે ન્હાનાં મંદિરમાં સ્થાપન કરેલાં બે પગલાંની આસપાસ, ન્હાની મ્હોટી ૧૧ પંક્તિઓમાં આ નં. ૧૩નો લેખ કોતરેલો છે.

જે ચરણયુગલ ઉપર આ લેખ છે તે **હીરવિજયસૂરિ**ની ચરણ સ્થાપના છે. સંવત્ ૧૬૫૨ માં, ભાદ્રવા સુદી ૧૧ના દિવસે કાઠિયાવાડના ઉન્નતદુર્ગ (ઉના ગાંવ) માં **હીરવિજયસૂરિ**એ સ્વર્ગવાસ કર્યો. તેજ સાલના માર્ગશિર વદિ ૨ સોમવાર અને પુષ્યનક્ષત્રના દિવસે **સ્તંભતીર્થ** (ખંભાત) નિવાસી **સંઘવી ઉદયકર્ણે** આ પાદુકાની સ્થાપના કરી અને આચાર્ય શ્રી**વિજયસેનસૂરિ**ના નામથી મહોપાધ્યાય **કલ્યાણવિજય** ગણિ અને પંડિત **ધનવિજય ગણિ**એ એની પ્રતિષ્ઠા કરી છે. લેખના બાકીના ભાગમાં **હીરવિજયસૂરિ**એ **અકબર**

**બાદશાહ**ને પ્રતિબોધ કરી જીવદયા, જીજીયામુક્તિ વિગેરે જે જે પુણ્યકાર્યો કર્યાં, તેમનું સંક્ષિપ્ત રીતે સૂચન કરેલું છે.

સં. **ઉદયકર્ણ**, **હીરવિજયસૂરિ**ના પ્રમુખ શ્રાવકોમાંનો એક હતો. ખંભાતનો તે આગેવાન અને પ્રસિદ્ધ શેઠ હતો. સં. **ઋષભદાસે હીરસૂરિરાસ**માં એનો અનેક સ્થળે ઉલ્લેખ કર્યો છે.

## (२) डभोइ

संवत १६७३ वर्षे पोष वद ६ लघु तपागच्छाधिराजश्री प **हीरविजयसूरि** पादुके सुरती बंदर वास्तव्य ओशवाल ज्ञातिय शा. वास्ता. भा. श्री बाइ सुरती देवकरण भगिनि साससटकरण भार्या ॥ (डभोइमां शामला पार्श्वनाथजी देरासर)

## (३) मेड़तासिटी

सं० १६५३ घर्षे वै० शु० ४ बुधे श्रीहीरविजयसूरिमूर्तिः मं० मेरु चपराथेन( ?)कारितं प्रतिष्ठितं श्रीतपागच्छे श्रीविजयसेनसूरिभिः ॥ पं० विनयसुन्दरगणिः प्रणमति श्रीगुरुपादुका (मूर्ति) ।

## (४) आगरा

॥ सकल भट्टारक पुरन्दर भट्टारक श्री १०८ श्री **हीरविजय सूरी**श्वरकस्य चरणप्रतिष्ठापितं तपागच्छे ।

## (५) ऊना - शाहबाग

## श्री हीरविजयसूरीश्वरजी महाराजना स्थूभ उपरनो लेख

स्वस्तिश्री संवत १६५३ वर्षे कार्तिक वदी ५ बूधे येषां जगद्गुरूणां संवेग-वैराग्य-सौभाग्यादिगुणगणश्रवणान्तःचमत्कृतैर्महाराजाधिराजपात्तिसाहि श्री **अकबरा**भिधानैः गूर्जरदेशान् दिल्लीमण्डलेशैर्बहुमानमाकार्य धर्मोपदेशाकर्णनपूर्वकं पुस्तककोशसमर्पणं डाबराभिधानमहासरोमत्स्यबन्धनिवारणं प्रतिवर्षे षड्मासिकाऽ-मारिप्रवर्तनं सर्वदा श्री शत्रुञ्जयतीर्थमुंडकाभिधानकरणनिवर्त्तनं जीजियाभिधान-करकर्त्तनं निजसकलदेशदाण-मृतस्वमोचनं सदैव बंदियत्रणनिवारणमित्यादि धर्मकृतानि प्रवर्त्तन्ते, तेषां श्रीशत्रुञ्जये सकलदेशसंघयुतकृतयात्राणां भाद्रपदशुक्लै-कादशीदिने जातनिर्वाणानां शरीरसंस्कारस्थानासन्नफलितसहकाराणां श्री**हीरविजय**-

सूरीश्वराणां प्रतिदिनं दिव्यवाद्यनादश्रवणं दीपदर्शनादिकैर्जातप्रभावाः स्तूपसहिताः पादुकाः कारिताः प० मेघेन भार्या लाडकीप्रमुखकुटुम्बयुतेन प्रतिष्ठिताश्च तपागच्छाधिराजैर्भट्टारक- श्रीविजसेनसूरिभिः, उ. श्रीविमलहर्षगणि, उ. श्रीकल्याणविजय गणि, उ. श्री सोमविजयगणिभिः प्रणता भव्यजनैः पूज्यमानाश्चिरं नन्दतु।

**लिखिता प्रशस्ति पद्मानंदगणिना श्रीउन्नतनगरे शुभं भवतु ।**

卐









શ્રી હીરવિજયસૂરિ સમાધિમંદિર ઉદ્યાન - શાહબાગ-ઊના

KIRIT GRAPHICS. AHMEDABAD. PH. 5352602